=1

# Stutikusumanjalih

# સ્તુતિકુસુમાઞ્જલિઃ

## Document Information

```
Text title : Stutikusumanjalih
File name : stutikusumAnjaliH.itx
Category : major_works, sangraha, jagaddharabhatta, kAshmIrashaivadarshanam
Location : doc_z_misc_major_works
Author : jagaddharabhaTTa
Proofread by : Ruma Dewan
Latest update : June 25, 2024
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 25, 2024

*sanskritdocuments.org*

# સ્તુતિકુસુમાઞ્જલિઃ

ॐ શ્રીગણેશાય નમઃ ।
નમઃ શિવાય નિઃશેષક્લેશપ્રશમશાલિને ।
ત્રિગુણગ્રન્થિદુર્ભેદભવભેદવિભેદિને ॥

## સૂચિપત્રમ્ ।

૧. સ્તુતિપ્રસ્તાવના પ્રથમં સ્તોત્રમ્ ।
૨. નમસ્કારાત્મકં દ્વિતીયં સ્તોત્રમ્ ।
૩. આશીર્વાદાખ્યં તૃતીયં સ્તોત્રમ્ ।
૪. મઙ્ગલાષ્ટકં ચતુર્થં સ્તોત્રમ્ ।
૫. કવિકાવ્યપ્રશંસાખ્યં પઞ્ચમં સ્તોત્રમ્ ।
૬. હરાષ્ટકં ષષ્ઠં સ્તોત્રમ્ ।
૭. સેવાભિનન્દનં સપ્તમં સ્તોત્રમ્ ।
૮. શરણાશ્રયણં અષ્ટમં સ્તોત્રમ્ ।
૯. કૃપણાક્રન્દનં નવમં સ્તોત્રમ્ ।
૧૦. કરુણાક્રન્દનં દશમં સ્તોત્રમ્ ।
૧૧. દીનાક્રન્દનં એકાદશં સ્તોત્રમ્ ।
૧૨. તમઃશમનં દ્વાદશં સ્તોત્રમ્ ।
૧૩. પ્રભુપ્રસાદનં ત્રયોદશં સ્તોત્રમ્ ।
૧૪. હિતસ્તોત્રં ચતુર્દશં સ્તોત્રમ્ ।
૧૫. કરુણારાધનં પઞ્ચદશં સ્તોત્રમ્ ।
૧૬. ઉપદેશનં ષોડશં સ્તોત્રમ્ ।
૧૭. ભક્તિસ્તોત્રં સપ્તદશં સ્તોત્રમ્ ।
૧૮. સિદ્ધિસ્તોત્રં અષ્ટાદશં સ્તોત્રમ્ ।
૧૯. ભગવદ્રૂપવર્ણનં એકોનવિંશં સ્તોત્રમ્ ।

૨૦. હસિતસ્તોત્રં વિંશં સ્તોત્રમ્ ।
૨૧. અર્ધનારીશ્વરસ્તોત્રં એકવિંશં સ્તોત્રમ્ ।
૨૨. કાદિપદબન્ધસ્તોત્રં દ્વાવિંશં સ્તોત્રમ્ ।
૨૩. શ‍ૃઙ્ખલાબન્ધસ્તોત્રં ત્રયોવિંશં સ્તોત્રમ્ ।
૨૪. દ્વિપદયમકં ચતુર્વિંશં સ્તોત્રમ્ ।
૨૫. રુચિરઞ્જનાખ્યં પઞ્ચવિંશં સ્તોત્રમ્ ।
૨૬. પાદાદિયમકસ્તોત્રં ષડ્વિંશં સ્તોત્રમ્ ।
૨૭. પાદમધ્યયમકાખ્યં સપ્તવિંશં સ્તોત્રમ્ ।
૨૮. પાદાન્તયમકસ્તોત્રં અષ્ટાવિંશં સ્તોત્રમ્ ।
૨૯. એકાન્તરયમકસ્તોત્રં એકોનત્રિંશં સ્તોત્રમ્ ।
૩૦. મહાયમકસ્તોત્રં ત્રિંશં સ્તોત્રમ્ ।
૩૧. નતોપદેશસ્તોત્રં એકત્રિંશં સ્તોત્રમ્ ।
૩૨. શરણાગતોદ્ધરણં દ્વાત્રિંશં સ્તોત્રમ્ ।
૩૩. કર્ણપૂરસ્તોત્રં ત્રયસ્ત્રિંશં સ્તોત્રમ્ ।
૩૪. અગ્ર્યવર્ણસ્તોત્રં ચતુસ્ત્રિંશં સ્તોત્રમ્ ।
૩૫. ઈશ્વરપ્રશંસાસ્તોત્રં પઞ્ચત્રિંશં સ્તોત્રમ્ ।
૩૬. સ્તુતિફલપ્રાપ્તિસ્તોત્રં ષટ્ત્રિંશં સ્તોત્રમ્ ।
૩૭. સ્તુતિપ્રશંસાસ્તોત્રં સપ્તત્રિંશં સ્તોત્રમ્ ।
૩૮. પુણ્યપરિણામસ્તોત્રં અષ્ટાત્રિંશં સ્તોત્રમ્ ।
૩૯. ગ્રન્થકર્તુર્વંશવર્ણનમ્ ।

## ૧. સ્તુતિપ્રસ્તાવના પ્રથમં સ્તોત્રમ્

હ્લાદવદ્ભિરમલૈરનર્ગલૈર્જીવનૈરઘહરૈર્નવૈરિયમ્ ।
સ્વામિનઃ ક્લમશમક્ષમૈઃ ક્ષણં રોદ્ધુમર્હતિ મનઃ સરસ્વતી ॥ ૧॥

સ્વામિનઃ સ્થિરગુણા સવક્રિમા કર્ણયોરમૃતવર્ષિણી મનઃ ।
કર્ત્તુમર્હતિ મુહૂર્ત્તમુજ્ઝિતસ્વૈરચાપલમિયં સરસ્વતી ॥ ૨॥

રમ્યરીતિરનઘા ગુણોજ્જ્વલા ચારુવૃત્તરુચિરા રસાન્વિતા ।
રઞ્જયત્વિયમલઙ્કૃતા મનઃ સ્વામિનઃ પ્રણયિની સરસ્વતી ॥ ૩॥

સત્ત્વધામ વરલાભયાચિતશ્લાઘ્યવર્ણવિશદા વિશત્વિયમ્ ।
નિર્મલં સઘનકાલવિપ્લવા માનસં સ્મરજિતઃ સરસ્વતી ॥ ૪॥

ભક્તિતઃ સપદિ સર્વમઙ્ગલા બોધિતા નિજધિયૈવ મેઽનયા ।
આરિરાધયિષતીશ્વરં વરં લબ્ધુમીપ્સિતમિયં સરસ્વતી ॥ ૫॥

ઓમિતિ સ્ફુરદુરસ્યનાહતં ગર્ભગુમ્ફિતસમસ્તવાઙ્મયમ્ ।
દન્ધ્વનીતિ હૃદિ યત્પરં પદં તત્સદક્ષરમુપાસ્મહે મહઃ ॥ ૬॥

ભાનુના તુહિનભાનુના બૃહદ્ભાનુના ચ વિનિવર્તિતં ન યત્ ।
યેન તજ્ઝગિતિ(ઝટિતિ)શાન્તિમાન્તરં ધ્વાન્તમેતિ તદુપાસ્મહે મહઃ ॥ ૭॥

કીચકાદિકુહરેષ્વિવાડમ્બરં બિમ્બમમ્બરમણેરિવોર્મિષુ ।
એકમેવ ચિદચિત્સ્વનેકધા યચ્ચકાસ્તિ તદુપાસ્મહે મહઃ ॥ ૮॥

તર્કકર્કશગિરામગોચરં સ્વાનુભૂતિસમયૈકસાક્ષિણમ્ ।
મીલિતાખિલવિકલ્પવિપ્લવં પારમેશ્વરમુપાસ્મહે મહઃ ॥ ૯॥

સ્વાવભાસમયમેવ માયયા યેન ભિન્નમવભાસ્યતે જગત્ ।
ચિત્રમિન્દ્રધનુરભ્રલેખયા ભાસ્વતેવ તદુપાસ્મહે મહઃ ॥ ૧૦॥

હૃદ્ગુહાગહનગેહગૂહિતં ભાસિતાઽખિલજગત્ત્રયોદરમ્ ।
કન્દકન્દરદરીમુખોદ્ધતપ્રાણમારુતકૃતસ્થિરસ્થિતિમ્ ॥ ૧૧॥

ત્યક્તસર્વદશમક્ષયોદયં રૂપવર્જિતમભિત્તિસંશ્રયમ્ ।
યં નિરઞ્જનમનક્ષગોચરં દીપમદ્ભુતમુશન્તિ તં સ્તુમઃ ॥ ૧૨॥

યસ્ય શસ્યમહસો નિરર્ગલં યોગમાપ્ય ચરણાબ્જરેણુભિઃ ।
અદ્ભુતાં દધતિ નીરજસ્કતાં તં જગત્પતિમુમાપતિં સ્તુમઃ ॥ ૧૩॥

ચારુચન્દ્રકલયોપશોભિતં ભોગિભિઃ સહ ગૃહીતસૌહૃદમ્ ।
અભ્યુપેતઘનકાલશાત્રવં નીલકણ્ઠમતિકૌતુકં સ્તુમઃ ॥ ૧૪॥

ઇચ્છયૈવ ભુવનાનિ ભાવયન્ યઃ પ્રિયોપકરણગ્રહોઽપિ સન્ ।
અપ્રિયોપકરણગ્રહોઽભવત્ તં સ્વશક્તિસચિવં શિવં સ્તુમઃ ॥ ૧૫॥

પદ્મસદ્મકરમર્દલાલિતં પદ્મનાભનયનાબ્જપૂજિતમ્ ।
પદ્મબન્ધુમુકુટાંશુરઞ્જિતં પાદપદ્મયુગમૈશ્વરં સ્તુમઃ ॥ ૧૬॥

અઙ્ઘ્રિયુગ્મમમરેશમસ્તકસ્રગ્ભિરુજ્જ્વલમુરશ્ચ ભસ્મભિઃ ।
શેખરઞ્ચ હિમરશ્મિરશ્મિભિર્યો બિભર્તિ તમુપાસ્મહે વિભુમ્ ॥ ૧૭॥

મૂર્ધ્નિ ચન્દ્રકરસુન્દરત્વિષં ફેનપિણ્ડપરિપાણ્ડુરસ્મિતામ્ ।
દેહિનાં વહતિ તાપહારિણીં સિદ્ધસિન્ધુમતનું તનું ચ યઃ ॥ ૧૮॥

કર્ત્તુમુત્સહત એવ સેવકો યસ્ય કસ્ય ન મનઃ સકૌતુકમ્ ।
નૈતિ શાન્તનવવિગ્રહોઽપિ સન્ ભીષ્મતાં ન ચ વિચિત્રવીર્યતામ્ ॥ ૧૯॥

આપતન્તમયમં યમં પુરો યઃ સવિગ્રહમવિગ્રહં વ્યધાત્ ।
દર્પકં વ્યધિત યોઽપ્યદર્પકં તં વિષાદમવિષાદમાશ્રયે ॥ ૨૦॥

અમ્બરેણ ગનનેન સંવૃતં જીવનૈઃ શિરસિ વારિભિઃ શ્રિતમ્ ।
ભોગિભિશ્ચ ભુજગૈર્વિભૂષિતં શઙ્કરં શુભકરં ભજામહે ॥ ૨૧॥

પાવકેન શિખિનોપશોભિતં ભાસિતં સિતરુચા હિમાંશુના ।
ભાસ્વતા ચ રવિણા વિરાજિતં લોચનત્રયમુપાસ્મહે વિભોઃ ॥ ૨૨॥

અભયઙ્કરમાશ્રિતં સ્વરૂપં દધદુદ્દામસમગ્રધામયોગમ્ ।
શુચિતારકમીશ્વરસ્ય નેત્રત્રિતયં શૂલશિખાત્રયં ચ વન્દે ॥ ૨૩॥

મીલદ્વિલોચનસમુદ્ગસમુદ્ગતાઽશ્રુ-
શ્રોતઃસ્રુ તિસ્નપિતમૂલકપોલભાગાઃ ।
દેવં શશાઙ્કકલયા કલિતાઽવતંસં
શંસન્તિ સન્ત ઇહ શઙ્કર શઙ્કરેતિ ॥ ૨૪॥

ભ્રાન્તોઽસ્મિ વૈશસમયે સમયેઽહમત્ર
મિથ્યૈવ દિગ્ભ્રમહતો મહતોઽપમાર્ગાન્ ।
વિશ્રમ્ય નન્દનવને નવને શિવસ્ય
ખેદસ્તુ સમ્પ્રતિ સમેતિ સ મેઽવસાનમ્ ॥ ૨૫॥

યત્પાર્વણેન્દુકરસુન્દરવાહહંસ-
સંવાસદુર્લલિતયાઽપિ વચોધિદેવ્યા ।
વિશ્રમ્યતે મનસિ નઃ સમલે સલીલં
તત્સૌભગં ભગવતો જયતીન્દુમૌલેઃ ॥ ૨૬॥

યં ભૂષયન્તિ કમનીયમહીનભોગાઃ
સ્તુત્વા ભવન્તિ કૃતિનો યમહીનભોગાઃ ।
ચિત્તોચિતં તમપહાય મહીનભોગાઃ
કર્તું પરત્ર ધૃતસંયમ ! હી ન ભો ગાઃ ॥ ૨૭॥

અવાપ્ય ગુરુભિર્ગુણૈર્જગતિ ગૌરવં ધ્યાયત-
સ્તમીરમણશેખરં ભવતિ ગૌરવન્ધ્યા યતઃ ।

અતસ્તમુમયા સમં કૃતમહાવિલાસં પ્રતિ
સ્તુતૌ વિરચિતા મયા મતિરનાવિલા સમ્પ્રતિ ॥ ૨૮॥

મત્ત્વા સદ્યઃ સુકૃતસુલભં દુર્લભં જીવલોકં
લબ્ધ્વા સર્વવ્યસનશમનં મિત્રમેકં વિવેકમ્ ।
ધન્યાઃ કેચિત્કૃતકુમુદિનીકાન્તલેખાऽવતંસં
હંસં શંસન્ત્યમલમધુરૈર્ભક્તિસિક્તૈર્વચોભિઃ ॥ ૨૯॥

અન્તઃશૂન્યં ગુણવિરહિતં નીરસં સર્ગહીનં
કાવ્યં હૃદ્યં નનુ સુમનસાં ન સ્થલામ્ભોરુહાભમ્ ।
તત્રાપીશઃ શ્રવણપુલિને ગાઢરાગાનુબન્ધ-
પ્રોદ્યદ્ભક્તિપ્રગુણિતમદઃ કર્તુમર્હત્યગર્હમ્ ॥ ૩૦॥

અથવાऽમૃતબિન્દુવર્ષિણીન્દુદ્યુતિરાનન્દમમન્દમર્પયન્તી ।
નયતિ ધ્રુવમાર્દ્રતામિયં ગીર્ગિરિજાજીવિતનાથમિન્દુકાન્તમ્ ॥ ૩૧॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“સ્તુતિપ્રસ્તાવના” નામકં પ્રથમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨. નમસ્કારાત્મકં દ્વિતીયં સ્તોત્રમ્

ૐ નમઃ પરમાર્થૈકરૂપાય પરમાત્મને ।
સ્વેચ્છાવભાસિતાऽસત્યભેદભિન્નાય શમ્ભવે ॥ ૧॥

નમઃ શિવાય નિઃશેષક્લેશપ્રશમશાલિને ।
ત્રિગુણગ્રન્થિદુર્ભેદભવભેદવિભેદિને ॥ ૨॥

નમઃ સમસ્તગીર્વાણકિરીટઘટિતાઙ્ઘ્રયે ।
જગન્નગરનિર્મ્માણનર્મશર્મદકર્મ્મણે ॥ ૩॥

નમસ્તમસ્વતીકાન્તખણ્ડમણ્ડિતમૌલયે ।
તાપાન્ધકારનિર્વેદખેદવિચ્છેદવેદિને ॥ ૪॥

નમઃ સમસ્તસઙ્કલ્પકલ્પનાકલ્પશાખિને ।
વિકાસિકલિકાકાન્તકલાપાય સ્વયમ્ભુવે ॥ ૫॥

નમસ્તમઃપરાભૂતભૂતવર્ગાનુકમ્પિને ।

શ્વેતભાનુબૃહદ્ભાનુભાનુભાસિતચક્ષુષે ॥ ૬॥

નમઃ શમનહુઙ્કારકતરાઽઽતુરહર્ષિણે ।
ભવાય ભવદાવાગ્નિવિવિગ્નાઽમૃતવર્ષિણે ॥ ૭॥

નમઃ સમદકન્દર્પદર્પજ્વરભરચ્છિદે ।
દુર્વારભવરુગ્ભઙ્ગભિષજે વૃષલક્ષ્મણે ॥ ૮॥

નમો જન્મજરામૃત્યુભીતિસાતઙ્કપાલિને ।
કરુણામૃતસમ્પર્કપેશલાય કપાલિને ॥ ૯॥

નમો નિસર્ગનિર્વિઘ્નપ્રસાદામૃતસિન્ધવે ।
સંસારમરુસન્તાપતાપિતાપન્નબન્ધવે ॥ ૧૦॥

નમઃ સાન્દ્રાઽમૃતસ્યન્દિઘનધ્વનિતશોભિને ।
મહાકાલાય ભીષ્મોષ્મભવગ્રીષ્મક્લમચ્છિદે ॥ ૧૧॥

નમો વાઙ્મનસાતીતમહિમ્ને પરમેષ્ઠિને ।
ત્રિગુણાષ્ટગુણાઽનન્તગુણનિર્ગુણમૂર્ત્તયે ॥ ૧૨॥

હંસાય દીર્ઘદોષાન્તકારિણેઽમ્બરચારિણે ।
સ્વમહોમહિમધ્વસ્તસમસ્તતમસે નમઃ ॥ ૧૩॥

યઃ સુવર્ણેન ચન્દ્રેણ ગાઙ્ગેયેનાગ્નિજન્મના ।
કાઞ્ચનેનશ્રિયં ધત્તે તસ્મૈ સ્મરજિતે નમઃ ॥ ૧૪॥

નિજાઙ્ગભઙ્ગભઙ્ગ્યાપિ ભક્તાનુગ્રહકારિણે ।
નમઃ સ્તમ્ભિતજમ્ભારિભુજસ્તમ્ભાય શમ્ભવે ॥ ૧૫॥

નિઃસામાન્યાય માન્યાય ન્યાયમાર્ગોપદેશિને ।
મૂર્ધન્યાય વદાન્યાય ધન્યાય સ્વામિને નમઃ ॥ ૧૬॥

નમઃ સંહૃતકાલાય કાલાયસગલત્વિષે ।
ગઙ્ગાધૌતકલાપાય કલાપાયમવિન્દતે ॥ ૧૭॥

જિષ્ણુના જિષ્ણુના લોકાન્ વિષ્ણુના પ્રભવિષ્ણુના ।
બ્રહ્મણા બ્રહ્મણાદ્યેન સ્તુતાય સ્વામિને નમઃ ॥ ૧૮॥

કુલશૈલદલં પૂર્ણસુવર્ણગિરિકર્ણિકમ્ ।
નમોઽધિતિષ્ઠતેઽનન્તનાલં કમલવિષ્ટરમ્ ॥ ૧૯॥

નિમિત્તમન્તરેણાપિ યઃ સપઙ્કજનાભયે ।
પ્રવર્તતે વિભુસ્તસ્મૈ નમઃ પઙ્કજનાભયે ॥ ૨૦॥

નમઃ સોમાર્ધદેહાય સોમાર્ધકૃતમૌલયે ।
શ્વેતાભયસમુદ્ભૂતશ્વેતાભયશસે નમઃ ॥ ૨૧॥

વિનતાનન્દનં નાગવિગ્રહોગ્રમુખં દૃશા ।
વિનાયકમુપાસીનં ભજતે સ્વામિને નમઃ ॥ ૨૨॥

નમો બ્રહ્મહરિત્ર્યક્ષશ્રવસે ભવસેતવે ।
જગત્સર્ગસ્થિતિહ્રાસહેતવે વૃષકેતવે ॥ ૨૩॥

કર્ણિકાદિષ્વિવ સ્વર્ણમર્ણવાદિષ્વિવોદકમ્ ।
ભેદિષ્વભેદિ યત્તસ્મૈ પરસ્મૈ મહસે નમઃ ॥ ૨૪॥

યમેકમેવ શ્રયતો ન જાયતે
સ્પૃહા પરસ્મૈ મહતેઽપિ નાકિને ।
નમઃ સમસ્તાપદુપેતપાલન-
વ્રતાય તસ્મૈ વિભવે પિનાકિને ॥ ૨૫॥

વિધૌ જગત્સર્ગવિધૌ યદાહિતં
પ્રતિષ્ઠિતં યત્સ્થિતિકારણે વિધૌ ।
સમૂઢમૂઢાર્ધવિધૌ લયે ચ યત્
પરાય તસ્મૈ મહસે નમો નમઃ ॥ ૨૬॥

નમઃ સમુત્પાદિતતારકદ્વિષે
નમસ્ત્રિધામાશ્રિતતારકત્વિષે ।
નમો જગત્તારકપુણ્યકર્મ્મણે
નમો નમસ્તારકરાજમૌલયે ॥ ૨૭॥

નમો નમસ્તેઽમૃતભાનુમૌલયે
નમો નમસ્તેઽમૃતસિદ્ધિદાયિને ।
નમો નમસ્તેઽમૃતકુમ્ભપાણયે
નમો નમસ્તેઽમૃતભૈરવાત્મને ॥ ૨૮॥

નમસ્તમઃપારપરાર્ધ્યવૃત્તયે
નમઃ સમસ્તાધ્વવિભક્તશક્તયે ।
નમઃ ક્રમવ્યસ્તસમસ્તમૂર્ત્તયે

નમઃ શમસ્થાર્પિતભક્તિમુક્તયે ॥ ૨૯॥

વિજયજયપ્રદાય શબરાય વરાય નમઃ
સકલકલઙ્કસઙ્કરહરાય હરાય નમઃ ।
જગદગદપ્રગલ્ભવિભવાય ભવાય નમઃ
પ્રવરવરપ્રકાશિતશિવાય શિવાય નમઃ ॥ ૩૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીજગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“નમસ્કારાત્મકં” નામકં દ્વિતીયં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩. આશીર્વાદાખ્યં તૃતીયં સ્તોત્રમ્

નિત્યં નિરાવૃતિ નિજાનુભવૈકમાન-
માનન્દધામ જગદઙ્કુરબીજમેકમ્ ।
દિગ્દેશકાલકલનાદિસમસ્તહસ્ત-
મર્દાસહં દિશતુ શર્મ મહન્મહો નઃ ॥ ૧॥

વ્યોમ્નીવ નીરદભરઃ સરસીવ વીચિ-
વ્યૂહઃ સહસ્રમહસીવ સુધાંશુધામ ।
યસ્મિન્નિદં જગદુદેતિ ચ લીયતે ચ
તચ્છામ્ભવં ભવતુ વૈભવમૃદ્ધયે નઃ ॥ ૨॥

લોકત્રયસ્થિતિલયોદયકેલિકારઃ
કાર્યેણ યો હરિહરદ્રુહિણત્વમેતિ ।
દેવઃ સ વિશ્વજનવાઙ્મનસાતિવૃત્ત-
શક્તિઃ શિવં દિશતુ શશ્વદનશ્વરં વઃ ॥ ૩॥

સર્વઃ કિલાયમવશઃ પુરુષાણુકર્મ-
કાલાદિકારણગણો યદનુગ્રહેણ ।
વિશ્વપ્રપઞ્ચરચનાચતુરત્વમેતિ
સ ત્રાયતાં ત્રિભુવનૈકમહેશ્વરો વઃ ॥ ૪॥

એકસ્ય યસ્ય સકલઃ કરણાનપેક્ષ-
જ્ઞાનક્રિયસ્ય પુરતઃ સ્ફુરતિ પ્રપઞ્ચઃ ।
પશ્યઞ્જગત્ કરતલાડમલકીફલાભં

લાભં સ પુષ્યતુ પરં પરમેશ્વરો વઃ ॥ ૫॥

યઃ કન્દુકૈરિવ પુરન્દરપદ્મસદ્મ-
પદ્માપતિપ્રભૃતિભિઃ પ્રભુરપ્રમેયઃ ।
ખેલત્યલઙ્ઘ્યમહિમા સ હિમાદ્રિકન્યા-
કાન્તઃ કૃતાન્તદલનો લઘયત્વઘં વઃ ॥ ૬॥

સેવાનમન્નિખિલખેચરમૌલિરત્ન-
રશ્મિચ્છટાપટલપાટલપાદપીઠઃ ।
પુષ્ણાતુ ધામ કપિશીકૃતશૈલશ ૃઙ્ગ-
ત્વઙ્ગન્મૃગાઙ્કમધુરાકૃતિરીશ્વરો વઃ ॥ ૭॥

અઙ્ગં ભુજઙ્ગરચિતાઙ્ગદભઙ્ગિ તુઙ્ગં
ત્વઙ્ગત્તરઙ્ગ ગગનાઙ્ગનસઙ્ગિ ગઙ્ગમ્ ।
બિભ્રદ્વિભુર્વિહિતરઙ્ગદનઙ્ગભઙ્ગ-
મઙ્ગીકરોત્વરમભઙ્ગુરમિઙ્ગિતં વઃ ॥ ૮॥

યઃ કુણ્ડમણ્ડલકમણ્ડલુમન્ત્રમુદ્રા-
ધ્યાનાર્ચનસ્તુતિજપાદ્યુપદેશયુક્ત્યા ।
ભોગાપવર્ગદમનુગ્રહમાનતાનાં
વ્યાનઞ્જ રઞ્જયતુ સ ત્રિજગદ્ગુરુર્વઃ ॥ ૯॥

શમ્ભોરદભ્રશરદભ્રતુષારશુભ્રં
ભ્રાજિષ્ણુભૂતિભરશીભરભાસ્વરાભમ્ ।
દિશ્યાદ્વપુર્ભસલનીલગલં કલઙ્કા-
લઙ્કારશારદશશાઙ્કનિભં શુભં વઃ ॥ ૧૦॥

યેનોપદિષ્ટમનપાયમુપાયમાપ્ય
સ્વર્ગાપવર્ગવિભવૈર્વિભવો ભવન્તિ ।
દેવઃ સ વઃ સકલકર્મફલોપલમ્ભ-
વિસ્રમ્ભભૂમિરભિવાઞ્છિતસિદ્ધયેઽસ્તુ ॥ ૧૧॥

મૂલોજ્ઝિતેન કલિકાકલિતેન તાપ-
શાન્તિક્ષમેણ નમતામવિપલ્લવેન ।
સદ્યઃફલેન સુમનોભિરુપાસિતેન
સ્થાણુઃ શ્રિયેઽસ્તુ ભવતાં વપુષાઽદ્ભુતેન ॥ ૧૨॥

દિવ્યાપગાપ્લવનપાવકસેવનાભ્યાં
વિભ્રત્તનું શુચિમપેતકલઙ્કશઙ્કામ્ ।
દોષાનુષઙ્ગરહિતસ્તિમિરોષ્મશાન્ત્યૈ
ભૂયાદ્દ્વિજાધિપતિરીશ્વરવન્દિતો વઃ ॥ ૧૩॥

દાનામ્બુનિર્ભરકરસ્તનયઃ સ યસ્ય
શ્રીમાન્ સ યસ્ય ધનદઃ સવિધે વિધેયઃ ।
યઃ સંશ્રિતઃ શિરસિ મુક્તકરેણ રાજ્ઞા
પુષ્ણાતુ વઃ કનકવર્ષધનઃ સ દેવઃ ॥ ૧૪॥

નિર્મત્સરૌ નિવસતઃ સમમર્કચન્દ્રૌ
નીરાનલાવમૃતહાલહલૌ ચ યત્ર ।
રાજ્ઞા નવેન તદધિષ્ઠિતમુજ્જ્વલેન
શાર્વં વપુર્ભવતુ વાઞ્છિતસિદ્ધયે વઃ ॥ ૧૫॥

વક્તા ચ યઃ સુખયિતા ચ વિભુઃ શ્રુતીનાં
વક્ષઃ કરં ચ વહતે કમલાઙ્કિતં યઃ ।
યો મૂર્ધ્નિ વર્ષ્મણિ ચ હૈમવતીં બિભર્તિ
ત્રૈધં ભવન્ ભવતુ વઃ સ શિવઃ શિવાય ॥ ૧૬॥

તાપત્રયાઽપહૃતયે ત્રિશિખં ત્રિવર્ગ-
સિદ્ધ્યૈ ત્રિધામલયનં નયનત્રયં ચ ।
ત્રિઃસ્રોતસોઽપિ સલિલં ત્રિમલાપનુત્યૈ
ભૂયાત્ત્રિલોકમહિતં ત્રિપુરદ્વિષો વઃ ॥ ૧૭॥

યદ્દર્શનાઽમૃતસુખાનુભવેન ધન્યા
નેત્રોત્પલાનિ ચિરમર્ધનિમીલિતાનિ ।
દૃઙ્માર્ગગોચરરવીન્દુકરપ્રસઙ્ગ-
ભઙ્ગ્યેવ બિભ્રતિ શિવઃ શિવદઃ સ વોઽસ્તુ ॥ ૧૮॥

કાલં દૃશૈવ શમયન્ સફલપ્રયાસં
યઃ શ્વેતમુત્તમચમત્કૃતિકૃચ્ચકાર ।
શ્વેતં યશઃ પ્રશમયન્નસતાં સતાં ચ
કાલં કૃતાર્થયતિ યઃ સ શિવોઽવતાદ્વઃ ॥ ૧૯॥

બભ્રુર્બિભર્ત્યલિકપાવકસૌહૃદં યો
યત્રાહિરેતિ શિખિના સહ સામરસ્યમ્ ।

જૂટઃ સ વઃ સમમરાતિભિરપ્યમર્ષ-
મુક્તાં સ્થિતિં પ્રથયતુ પ્રમથાધિપસ્ય ॥ ૨૦॥

અવ્યાત્સ વઃ શિરસિ યસ્ય વિલોચનાગ્નિ-
જ્વાલાવલીઢસુરસિન્ધુજલોપગૂઢઃ ।
અદ્યાપિ વાડવશિખાપરિણદ્ધમુગ્ધ-
દુગ્ધાબ્ધિમધ્યગ ઇવ શ્રિયમેતિ ચન્દ્રઃ ॥ ૨૧॥

અવ્યાત્સ વઃ સુકૃતિનામલિકેષુ ધૂલી-
પટ્ટીકૃતેષુ પદરેણુભરેણ યસ્ય ।
ધાતાક્ષરાણિ લિખતિ ક્ષિતિપાલમૌલિ-
માલાર્ચિતાઙ્ઘ્રિકમલો ભવિતા ભુવીતિ ॥ ૨૨॥

શૈવી શિવં દિશતુ શીતમરીચિલેખા
જૂટાહિરત્નકિરણચ્છુરણારુણા વઃ ।
દેવી નવીનનખલક્ષ્મધિયા પિધત્તે
યત્સઙ્ક્રમં કુચતટે પટપલ્લવેન ॥ ૨૩॥

દેવ્યાસ્તદસ્તુ કુચચૂચુકમિન્દુમૌલિ-
દેહાર્ધબદ્ધવસતેરમૃતાપ્તયે વઃ ।
અભ્યેતિ યન્મદનપૂજ્યસુવર્ણપીઠ-
પૃષ્ઠપ્રતિષ્ઠિતહરિન્મણિલિઙ્ગભઙ્ગિમ્ ॥ ૨૪॥

યાઃ ક્ષીરસિન્ધુલહરીવૃતમન્દરાદ્રિ-
મુદ્રામનઙ્ગદમનસ્ય નયન્તિ જૂટમ્ ।
દ્વિર્ભાવિતાવિરલસિદ્ધસરિત્તરઙ્ગા-
સ્તા લઙ્ઘયન્ત્વઘમઘર્મરુચો રુચો વઃ ॥ ૨૫॥

લોકત્રયાઽભ્યુદયજન્મમહી મહીયઃ
સ્થાનાધિરોહણવિધાવધિરોહિણી યા ।
સા ચન્દ્રચૂડમુકુટધ્વજવૈજયન્તી
જહ્નોરનિહ્નુતનયા તનયાઽવતાદ્વઃ ॥ ૨૬॥

ભાલાગ્નિકીલકલિતાખિલરન્ધ્રભાગં
ભર્ગસ્ય વો દિશતુ શર્મ શિરઃકપાલમ્ ।
યત્કાલવહ્નિવપુષઃ પચતઃ પ્રભૂત-
ભૂતવ્રજં વ્રજતિ તસ્ય મહાનસત્વમ્ ॥ ૨૭॥

ચાન્દ્રં ચ ધામ સુરનિર્ઝરિણી જલં ચ
હસ્તસ્થહેમકલશાઽમૃતજીવનં ચ ।
સ્નિગ્ધં ચ દૃગ્વિલસિતં હસિતં સિતં ચ
યુષ્માકમૂષ્મશમનાય ભવન્તુ શમ્ભોઃ ॥ ૨૮॥

મૂર્ધ્નિ દ્યુસિન્ધુધવલે ધવલેન્દુલેખા
કૈલાસશૈલશિખરે ધવલશ્ચ વાહઃ ।
નીહારહારિણિ વપુષ્યપિ ભૂતિરેષા
પુષ્ણાતુ વઃ સદૃશસઙ્ઘટના શિવસ્ય ॥ ૨૯॥

ઉત્તપ્તહેમરુચિ ચન્દ્રકલા કલાપે
બાલપ્રવાલરુચિરે ચ કરે કપાલમ્ ।
તામ્રેઽધરે ચ હસિતં સિતમદ્ભુતેયં
વિચ્છિત્તિરિન્દુશિરસઃ કુશલં ક્રિયાદ્વઃ ॥ ૩૦॥

શ્રેયઃ પ્રયચ્છતુ પરં સુવિશુદ્ધવર્ણા
પૂર્ણાભિલાષવિબુધાધિપવન્દનીયા ।
પુણ્યા કવિપ્રવરવાગિવ બાલચન્દ્ર-
ચૂડામણેશ્ચરણરેણુકણાવલી વઃ ॥ ૩૧॥

હારીકૃતોલ્બણફણીન્દ્રફણેન્દ્રનીલ-
નીલચ્છવિચ્છુરણશારમુરઃસ્થલં વઃ ।
પુષ્ણાતુ નિહ્નુ તનગેન્દ્રસુતાકુચાગ્ર-
કસ્તૂરિકામકરિકાકિણમિન્દુમૌલેઃ ॥ ૩૨॥

યુષ્માકમસ્તુ નવનીલસરોજદામ-
શ્યામદ્યુતિઃ સુમતયે શિતિકણ્ઠકણ્ઠઃ ।
યઃ કેતકીધવલવાસુકિભોગયોગા-
દ્ગાઙ્ગૌઘભિન્નગગનાઙ્ગનભઙ્ગિમેતિ ॥ ૩૩॥

ક્ષીરાર્ણવસ્ય ચરણાબ્જતલે નિવાસ-
માસેદુષસ્તનયમપ્રતિમપ્રસાદઃ ।
યો મૂર્ધ્નિ લાલયતિ બાલમસૌ દયાબ્ધિ-
ર્દેવસ્તનોતુ મુદમાશ્રિતવલ્લભો વઃ ॥ ૩૪॥

યા રાજહંસશિખિસમ્ભૃતકાન્તિરેતિ

સદ્યસ્તિરોહિતઘનાવરણા પ્રસાદમ્ ।
સા પ્રાવૃડન્તશરદાદિદિનેષ્વિવ દ્યૌઃ
શમ્ભોરભીષ્ટફલપાકકૃદસ્તુ દૃગ્વઃ ॥ ૩૫॥

અન્તર્ધૃતાહિમકરજ્વલનોદિતેન્દુઃ
સ્વઃસિન્ધુસઙ્ગસુભગા પરમેશ્વરસ્ય ।
ઔદન્વતીવ તનુરસ્તુ ગજાશ્વરત્ન-
શ્રીલાભકૃત્સુમનસામમૃતાય દૃગ્વઃ ॥ ૩૬॥

યત્રાગ્નિરીપ્સતિ કણં ન વિવૃત્ય જિહ્વાં
નૈતિ પ્રતિક્ષપમપેતવસુસ્તમર્કઃ ।
ક્ષીણસ્તમિન્દુરપિ ન શ્રયતિ શ્રિયેઽસ્તુ
શ્રીધામ તત્પુરરિપોર્નયનત્રયં વઃ ॥ ૩૭॥

અર્કસ્ય નોદગયનં શિશિરેઽપિ યત્ર
શીતત્વિષો ન બહુલેઽપિ કલાપલાપઃ ।
ક્ષામં ચ ધામ ન વહત્યપિ વહ્નિરહ્નિ
તત્ત્રાયતાં પુરરિપોર્નયનત્રયં વઃ ॥ ૩૮॥

યામાશ્રિતોઽમ્બરમણી રમણીયધામા
કામાન્તકાવનલસાઽનલસાદ્વ્યધાદ્યા ।
યાપીન્દુસમ્ભવસુધાવસુધા દૃશસ્તાઃ
શર્વસ્ય વઃ શિવપુષો વપુષો ભવન્તુ ॥ ૩૯॥

પુષ્ણાતુ વઃ પ્રથમસઙ્ગમભીરુગૌરી-
વિસ્રમ્ભણપ્રણયભઙ્ગભયાકુલસ્ય ।
તત્કાલકાર્યકરદર્પકદેહદાહ-
જાતાનુતાપમુરગાભરણસ્ય ચેતઃ ॥ ૪૦॥

જૂટે કપાલશકલાનિ કલાનિધિશ્ચ
હસ્તે સુધામ્બુ સરલં ગરલં ગલે ચ ।
શક્રાદિભિશ્ચ નમનં ગમનં ગવા ચ
યસ્યાસ્તુ દુર્ગતિહરઃ સ હરઃ સદા વઃ ॥ ૪૧॥

યસ્ય ક્ષિતિઃ શિરસિ સૌમનસીવ શેષા
શેષાહિરઙ્ગદપદે સ ચકાસ્તિ યસ્ય ।
તસ્ય પ્રભોરમૃતનિર્ઝરનિર્વિશેષા-

શેષાણિ હન્તુ દુરિતાનિ સરસ્વતી વઃ ॥ ૪૨॥

શ્રીમાનકલ્પત ન કલ્પતરુર્યદાસ્યૈ
તૃષ્ણા રસાયનરસાય ન યં સમેત્ય ।
લભ્યો ન યો ગહનયોગહવૈઃ સ વોઽઘ-
મપ્રાકૃતો હરકૃતો હરતુ પ્રસાદઃ ॥ ૪૩॥

મુક્તિર્હિ નામ પરમઃ પુરુષાર્થ એક-
સ્તામન્તરાયમવયન્તિ યદન્તરજ્ઞાઃ ।
કિં ભૂયસા ભવતુ સૈવ સુધામયૂખ-
લેખાશિખાભરણભક્તિરભઙ્ગુરા વઃ ॥ ૪૪॥

સ યત્ર ગુહબર્હિણો ભવભુજઙ્ગજિહ્વાઞ્ચનૈ-
ર્ગજાસ્યકરકર્ષણૈઃ સ ચ ગિરીન્દ્રકન્યાહરિઃ ।
સ ચાર્કસુતસૈરિભો રવિતુરઙ્ગહેષારવૈ-
ર્મુદં દધતિ ધામ તદ્દિશતુ શામ્ભવં ધામ વઃ ॥ ૪૫॥

યસ્મિઞ્જાતસ્ત્રિભુવનજયી ભગ્નકામઃ સ કામો
યસ્મિંલ્લેભે શલભલઘુતાં પ્રાપ્તકાલઃ સ કાલઃ ।
યસ્યૌઘો ન પ્રભવતિ મહોનિહ્નવે જાહ્નવીયઃ
શ્રેયઃ પ્રેયઃ પ્રથયતુ સ વઃ શામ્ભવો દૃક્ત્રિભાગઃ ॥ ૪૬॥

યઃ ક્રોધાગ્નેઃ સમિધમકરોદ્દર્પકં દર્પકન્દ-
ચ્છેદાભિજ્ઞં વ્યધિત જગતાં યઃ કૃતાન્તં કૃતાન્તમ્ ।
નેતું યશ્ચ પ્રભવતિ મતિહ્રાસમસ્તં સમસ્તં
નિષ્પ્રત્યૂહં પ્રથયતુ પથિ ત્રાસદે વઃ સ દેવઃ ॥ ૪૭॥

પાયાદ્વસ્ત્રિજગદ્ગુરુઃ સ્મરહરઃ સોપગ્રહાણાં શિરઃ
શ્યામાકામુકમત્સરેણ ચરણૌ પઙ્ક્તિર્ગ્રહાણામિવ ।
યસ્ય પ્રહ્વસુરાસુરેશ્વરશિરોમન્દારમાલાગલ-
ત્કિઞ્જલ્કોત્કરપિઞ્જરોન્મુખનખશ્રેણીનિભેનાશ્રિતા ॥ ૪૮॥

અર્કેન્દુભૌમબુધવાક્પતિકાવ્યમન્દા
મન્દારકુન્દકુમુદૈર્યમુદર્ચયન્તિ ।
તસ્ય પ્રભોરઘમલોષ્મશમાદમન્દા
મન્દાકિનીવ મુદમર્પયતુ સ્તુતિર્વઃ ॥ ૪૯॥

ભસ્મોદ્ધૂલિતમૂર્તિરિન્દુધવલજ્યોતીરસોર્વીધર-
સ્કન્ધાસક્તતુષારગૌરવૃષભારૂઢોઽસ્તુ ભદ્રાય વઃ ।
દેવો દુગ્ધમહાબ્ધિમધ્યવિકસત્સત્પુણ્ડરીકોપરિ-
ક્રીડદ્બાલમરાલનિર્મલરુચિઃ કાત્યાયનીકામુકઃ ॥ ૫૦॥

ત્રાતા ભીતિભૃતાં પતિશ્ચિદચિતાં ક્લેશં સતાં શંસતાં
હન્તા ભક્તિમતાં મતાં સ્વસમતાં કર્તાઽપકર્તાઽસતામ્ ।
દેવઃ સેવકભુક્તિમુક્તિઘટનાભૂર્ભૂર્ભુવઃસ્વસ્ત્રયી-
નિર્મ્માણસ્થિતિસંહતિપ્રકટિતક્રીડો મૃડઃ પાતુ વઃ ॥ ૫૧॥

કૃષ્ણેન ત્રિજગત્પ્રસિદ્ધવિજયપ્રખ્યાતિના લોચનં
ભક્ત્યા વાસવસૂનુના કૃતવતા પાદાબ્જપૂજાવિધૌ ।
યસ્માદાપ્તસુદર્શનેન નિખિલં વિશ્વં વિધેયીકૃતં
કૃષ્ણેનેવ સ ધૂર્જટિર્ઘટયતુ શ્રેયાંસિ ભૂયાંસિ નઃ ॥ ૫૨॥

શ્રીકણ્ઠસ્ય સકૃત્તિકાર્તભરણી મૂર્તિઃ સદારોહિણી
જ્યેષ્ઠા ભદ્રપદા પુનર્વસુયુતા ચિત્રા વિશાખાન્વિતા ।
દિશ્યાદક્ષતહસ્તમૂલઘટિતાષાઢા મઘાલઙ્કૃતા
શ્રેયો વૈશ્રવણાશ્રિતા ભગવતો નક્ષત્રપાલીવ વઃ ॥ ૫૩॥

ભિન્દ્ધિ ક્ષ્માધરસન્ધિબન્ધમુદધેરમ્ભોભરં જૃમ્ભય
ક્ષુન્દ્ધિ ક્ષ્માપટલં દલત્ફણિફણાપીઠીલુઠત્સૌષ્ઠવમ્ ।
પિણ્ઢ્ઢિ પ્રૌઢચપેટપાટિતરટત્તારાકુટુમ્બં નભઃ
પ્રારબ્ધોદ્ધતસાન્ધ્યતાણ્ડવ ઇતિ શ્રીભૈરવઃ પાતુ વઃ ॥ ૫૪॥

ભૂત્યૈ વોઽસ્તુ વિડમ્બિતસ્મિતરુતં મૂર્ધ્નોધૃતસ્વર્ધુની-
નિધ્વાનધ્વનદાનનૈરભિનયે ભૂષાકપાલૈઃ પ્રભોઃ ।
ત્વઙ્ગત્તુમ્બુરુનારદાહતનદદ્ગમ્ભીરભેરીરવ-
વ્યાવલ્ગદ્ગુહવાહબર્હિવિહિતક્રીડાનુસારં વપુઃ ॥ ૫૫॥

આદૌ પાદતલે કૃતસ્થિતિરથો(અથ)પ્રાપ્તઃ કરાલમ્બનં
વાલ્લભ્યં શુભદૃઙ્નિવેશનવશોત્પન્નં પ્રપન્નસ્તતઃ ।
અન્તે યેન શિરોધિરોપણમહામાહાત્મ્યમાપ્તો વિધુ-
ર્ભૂત્યૈ સ ક્રમવર્દ્ધમાનમહિમા સ્વામિપ્રસાદોઽસ્તુ વઃ ॥ ૫૬॥

યસ્યૈકસ્ય સુવર્ણસમ્ભૃતપદન્યાસાનવદ્યક્રમ-
વ્યક્તિઃ પ્રેઙ્ખતિ ગૌરનર્ગલગતિસ્વાચ્છન્દ્યહૃદ્યાકૃતિઃ ।

પ્રખ્યાતાદ્ભુતસર્ગબન્ધરચનાસંરબ્ધિરોજસ્વિનઃ
કાવ્યસ્યોદયભૂરસૌ ભવતુ વઃ પ્રીત્યૈ પુરાણઃ કવિ ॥ ૫૭॥

રાકેન્દોરપિ સુન્દરાણિ હૃદયગ્રાહીણિ બાલાઙ્ગના-
મુગ્ધાલાપકથામૃતાદપિ પરં હારીણિ હારાદપિ ।
અપ્યુત્તાલશિખાલબાલવચસઃ સમ્પૂર્ણકર્ણામૃત-
સ્યન્દીનિ ત્રિજગદ્ગુરોઃ સ્તુતિકથાસૂક્તાનિ પુષ્ણન્તુ વઃ ॥ ૫૮॥

શાણોલ્લીઢનવેન્દ્રનીલમહસિ શ્રીકણ્ઠકણ્ઠસ્થલે
સંસક્તા કનકચ્છવિર્ગિરિસુતાદોઃકન્દલી પાતુ વઃ ।
યામાલોક્ય સનીરનીરદદલશ્લિષ્યત્તડિદ્વિભ્રમ-
ભ્રાન્ત્યા નોજ્ઝતિ ચણ્ડતાણ્ડવનવોલ્લેખં શિખી ષાણ્મુખઃ ॥ ૫૯॥

યત્સર્ગાભરણાયમાનવપુષઃ કેચિત્કકુપ્કામિની-
કર્ણાલઙ્કરણાયમાનયશસઃ સ્વર્ગાયમાણશ્રિયઃ ।
દુષ્કાલાનલસન્નસજ્જનસુધાવર્ષાયમાણોક્તયઃ
પ્રેક્ષ્યન્તે મહિમા સ યસ્ય કુરુતાં શાર્વઃ સ્તવઃ શં સ વઃ ॥ ૬૦॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“આશીર્વાદાખ્યં” નામકં તૃતીયં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૪. મઙ્ગલાષ્ટકં ચતુર્થં સ્તોત્રમ્

શ્રીકમ્બુકૌસ્તુભસુધાંશુવિષામૃતાનાં
સૌદર્યસૌહૃદસુખાનુભવૈકધામ ।
યત્સત્યધર્મકૃતનિષ્પ્રતિઘપ્રતિષ્ઠં
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૧॥

આપીડબન્ધનવિધૌ શયને ચ વર્ષ્મ
પર્યાપ્તભોગવિભવં બહુમન્યમાનઃ ।
યત્ર પ્રહૃષ્યતિતરામુરગાધિરાજ-
સ્તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૨॥

અર્ધં યદુત્પલદલૈરુમયેન્દુગૌર-
મર્ધં શ્રિયાર્ચિતમલિદ્યુતિ માલતીભિઃ ।

વિચ્છિત્તિમેત્યનિમિષેક્ષણશુક્તિપેયાં
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૩॥

કેશાશ્રિતા નયનવહ્નિશિખાભ્રસિન્ધુ-
ઝાઙ્કારગર્ભવપુષો જલદા વહન્તિ ।
યત્રાદ્ભુતં સ્થિરતડિદ્ગ્રસિતપ્રસઙ્ગં
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૪॥

હીનાર્ધનાભિનલિનાલયસઙ્કટત્વ-
સાતઙ્કસઙ્કુચિતવૃત્તિકદર્થિતાઙ્ગઃ ।
અર્ધીચિકીર્ષતિ તનું દ્રુહિણોઽપિ યત્ર
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૫॥

દૃગ્વર્તિનૌ રવિતમીરમણાવખણ્ડ-
મૂર્તી નિજં ચ વપુરર્ધમવેત્ય વહ્નિઃ ।
યત્રાધિકં જ્વલતિ લાઘવમાગતોપિ
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૬॥

યસ્મિન્ ગુણી સહૃદયઃ સફલઃ સમૂલઃ
સ્વાતન્ત્ર્યધામનિ કરાત્ પતિતઃ સ પદ્મઃ ।
કમ્બુઃ સ્થિતસ્તુ ધૃતતદ્વિપરીતરીતિ-
સ્તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૭॥

પાદાગ્રનિર્ગતમવારિતમેવ વારિ
યત્રાધિરોહતિ શિરસ્ત્રિદશાપગાયાઃ ।
અત્યદ્ભુતં ચ રુચિરં ચ નિરઙ્કુશઞ્ચ
તન્મઙ્ગલં દિશતુ હારિહરં વપુર્વઃ ॥ ૮॥

ઇતિ કાશ્મીરકમહાકવિશ્રીજગદ્ધરવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“મઙ્ગલાષ્ટકં” નામ ચતુર્થં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૫. કવિકાવ્યપ્રશંસાખ્યં પઞ્ચમં સ્તોત્રમ્

આપન્નતાપહરણપ્રવણા ઘૃણેવ
ત્વઙ્ગત્તરઙ્ગસુભગા ગગનાપગેવ ।

પીયૂષસારશિશિરા શશભૃત્કલેવ
વાણી શિવૈકશરણા જયતીશ્વરીવ ॥ ૧॥

યો મૂર્ધનિ સ્રજમિવોદ્વહતે ધરિત્રી-
મુષ્ણીષતાં શ્રયતિ યસ્ય સ ભોગિરાજઃ ।
યસ્યામસૌ વસતિ વાક્પતિરુક્તિદેવીં
તાં યે વહન્તિ હૃદિ તે કવયો જયન્તિ ॥ ૨॥

ધન્યાઃ શુચીનિ સુરભીણિ ગુણોમ્ભિતાનિ
વાગ્વીરુધઃ સ્વવદનોપવનોદ્ગતાયાઃ ।
ઉચ્ચિત્ય સૂક્તિકુસુમાનિ સતાં
વિવિક્તવર્ણાનિ કર્ણપુલિનેષ્વવતંસયન્તિ ॥ ૩॥

શ્રોત્રાણ્યનર્ગલગલન્મધુબિન્દુગર્ભ-
સન્દર્ભસુન્દરપદોપચિતૈર્વચોભિઃ ।
ધન્યાઃ સતાં સુકવયઃ સુખયન્તિ તેઽપિ
તેષામકૃત્રિમચમત્કૃતિસાધુવાદૈઃ ॥ ૪॥

તે કેચિદસ્ખલિતબન્ધનવપ્રબન્ધ-
સન્ધાનબન્ધુરગિરઃ કવયો જયન્તિ ।
યેષામચર્વિતરસાપિ ચમત્કરોતિ
કર્ણે કૃતૈવ ભણિતિર્મધુરા સુધેવ ॥ ૫॥

તેઽનન્તવાઙ્મયમહાર્ણવદૃષ્ટપારાઃ
સાંયાત્રિકા ઇવ મહાકવયો જયન્તિ ।
યત્સૂક્તિપેલવલવઙ્ગલવૈરવૈમિ
સન્તઃ સદઃસુ વદનાન્યધિવાસયન્તિ ॥ ૬॥

જિહ્વાગ્રરઙ્ગભુવિ સત્કવિતુર્વિલાસ-
લાસ્યોત્સવવ્યસનિની સ્વયમુક્તિદેવી ।
ભ્રૂકાણ્ડકુણ્ડલકિરીટશિરોધરાણાં
નૃત્તોપદેશગુરુતાં કૃતિનામુપૈતિ ॥ ૭॥

આવર્જયન્તિ મઠરાઞ્જઠરાર્થમાત્ર-
પાત્રીકૃતાર્થકણિકા ગણિકાવિટાદ્યાઃ ।
પ્રૌઢાન્ પુનર્ભુજગભૂષણભક્તિસિક્ત-
સૂક્તાવલીવિરચનાચતુરાઃ કવીન્દ્રાઃ ॥ ૮॥

ધન્યઃ સ કોઽપિ સુકવિઃ કવિકર્મકૃત્ત-
લોકાર્તિ કાર્તિકતુષારકરાનુકારિ ।
ગાયન્તિ યસ્ય કૃતિનસ્ત્રિજગત્પવિત્રં
ચિત્રં ચરિત્રમિવ બાલમૃગાઙ્કમૌલેઃ ॥ ૯॥

ત્રૈલોક્યભૂષણમણિર્ગુણિવર્ગબન્ધુ-
રેકશ્ચકાસ્તિ સવિતા કવિતા દ્વિતીયઃ ।
શંસન્તિ યસ્ય મહિમાતિશયં શિરોભિઃ
પાદગ્રહં વિદધતઃ પૃથિવીભૃતોઽપિ ॥ ૧૦॥

યસ્ય સ્રવન્ત્યમૃતમેવ મુખે તુષાર-
હારાભિરામરુચિરઞ્ચિતવક્રભઙ્ગિઃ ।
સૂક્તિર્દ્યુસિન્ધુરિવ મૂર્ધ્નિ હરસ્ય ચન્દ્ર-
લેખેવ વા વસતિ તં સુકવિં નમામઃ ॥ ૧૧॥

યાતા ગુણૈરુપચયં વિમલા પ્રકૃત્યા
નૈસર્ગિકીં પરિણતિં પ્રથમાં વહન્તી ।
બુદ્ધિઃ સતાં શશિકલામુકુટપ્રસાદા-
દ્વાણી ચ ન ક્વચિદપિ પ્રતિઘાતમેતિ ॥ ૧૨॥

ચન્દ્રાવચૂડચરણસ્મરણપ્રસાદ-
સન્દર્ભનિર્ભરગભીરગિરાં કવીનામ્ ।
સૂક્તિર્બિભર્તિ મુખપઙ્કજરઙ્ગનૃત્ય-
દ્વાગ્દેવતાકનકનૂપુરનાદલીલામ્ ॥ ૧૩॥

કાવ્યં વિભાવ્ય નિજમર્ધનિમીલિતાનિ
નૈસર્ગિકં જહતિ ચાપલમીક્ષણાનિ ।
ગૃહ્ણન્તિ તન્મસૃણતાં સહજાં વિહાય
ભ્રૂવલ્લયસ્તુ કૃતિનાં કવિપુઙ્ગવાનામ્ ॥ ૧૪॥

નીહારહારધવલસ્ય જયત્યપૂર્વઃ
પાકઃ સ કોઽપિ સુકૃતસ્ય કૃતસ્ય પૂર્વમ્ ।
યઃ સમ્પ્રતિ પ્રતિફલત્યમલાસુ બાલ-
ચન્દ્રાવચૂલનુતિસૂક્તિષુ સત્કવીનામ્ ॥ ૧૫॥

સૂક્ષ્માર્થદર્શનવિમર્શવશપ્રરૂઢ-

ભ્રૂકાણ્ડતાણ્ડવનિવેદિતચિદ્વિકાસમ્ ।
આસ્વાદ્ય યત્સુમતયો મુખમુદ્વહન્તિ
સૂક્તામૃતં જયતિ તત્કવિકુઞ્જરાણામ્ ॥ ૧૬॥

શબ્દાર્થમાત્રમપિ યે ન વિદન્તિ તેઽપિ
યાં મૂર્છનામિવ મૃગાઃ શ્રવણૈઃ પિબન્તઃ ।
સંરુદ્ધસર્વકરણપ્રસરા ભવન્તિ
ચિત્રસ્થિતા ઇવ કવીન્દ્રગિરં નુમસ્તામ્ ॥ ૧૭॥

લભ્યઃ સ કુત્ર સુજનઃ સ્વકૃતીઃ પ્રદર્શ્ય
ભ્રૂકન્દલીયુગલમાકલયન્તિ યસ્ય ।
નેત્રોત્પલોપરિપરિસ્ફુરદુત્તરઙ્ગ-
ભૃઙ્ગાવલિદ્વિતયવિભ્રમભૃત્ કવીન્દ્રાઃ ॥ ૧૮॥

સ્ફારેણ સૌરભભરેણ કિમેણનાભે-
સ્તદ્ધાનસારમપિ સારમસારમેવ ।
સ્રક્સૌમનસ્યપિ ન પુષ્યતિ સૌમનસ્યં
પ્રસ્યન્દતે યદિ મધુદ્રવમુક્તિદેવી ॥ ૧૯॥

સંસારમારવપથપ્રથમાનખેદ-
વિચ્છેદકોવિદમિદં કવિકર્મ્મ જીયાત્ ।
વિસ્મારિતં યદમુના યમુનાસનાથં
પાથઃ પ્રસિદ્ધમપિ વૈબુધસૈન્ધવં નઃ ॥ ૨૦॥

ગામ્ભીર્યશાલિનિ શુચાવમૃતૌઘશીતે
નીતે સદા સદનતાં મદનાન્તકેન ।
યસ્યૈકપિઙ્ગલગિરેરિવ માનસેઽન્ત-
ર્થાઃ સ્ફુરન્તિ સ વિના સુકૃતૈઃ ક્વ લભ્યઃ ॥ ૨૧॥

યસ્ય દ્યુસિન્ધુલહરીશુચયો ન કસ્ય
દૃષ્ટિપ્રસાદમવલોકયતોઽર્પયન્ત્યઃ ।
ગાવઃ સુધારસમુચઃ પ્રસરન્તિ દિક્ષુ
વિશ્વૈકભૂષણમસૌ જયતિ દ્વિજેન્દ્રઃ ॥ ૨૨॥

સંયોગમેત્ય પરમર્થપરિષ્કૃતસ્ય
પાદાન્તગોઽપિ ગુરુતાં લઘુરેતિ યસ્ય ।
તં શઙ્કરસ્તુતિપરં પરિશુદ્ધવૃત્તં

સુશ્લોકમાપ્ય મુદમેતિ ન કસ્ય ચેતઃ ॥ ૨૩॥

ઇહ હિ મહિમા માયામોહપ્રરોહતિરોહિત-
ત્રિજગદગદઙ્કારઃ સારસ્વતઃ પ્રથતે સતામ્ ।
પ્રભવતિ જરામૃત્યુવ્યાધિપ્રબન્ધનિબન્ધન-
વ્યસનજનિતવ્યાપત્તાપક્લમાપગમાય યઃ ॥ ૨૪॥

ચમત્કારોત્કર્ષં કમપિ કમનીયં વિમૃશતાં
દિશન્તી સા કાચિજ્જયતિ કવિવાચાં પરિણતિઃ ।
યદાસૃષ્ટે (યદાતુષ્ટે)ચેતસ્યમૃતમિતિ નિશ્રેયસમિતિ
પ્રિયં ધામેત્યુચ્ચૈઃ પદમિતિ સમુદ્યન્તિ મતયઃ ॥ ૨૫॥

મધુસ્યન્દી મન્દીકૃતવિપદુપાધિર્ભવમરુ-
ભ્રમક્લેશાવેશપ્રશમકમનીયો વિજયતે ।
અખણ્ડશ્રીખણ્ડદ્રવનવસુધાસારસરસઃ
પ્રસાદો વાગ્દેવ્યાઃ પ્રવરકવિકાવ્યામૃતવપુઃ ॥ ૨૬॥

ઘનાનન્દસ્યન્દોદ્ધત (સ્પન્દોદ્ધત)વિપુલવાષ્પાર્દ્રનયનં
સલીલભ્રૂવલ્લીવલનવિવલદ્ભાલપુલિનમ્ ।
ઉદઞ્ચદ્રોમાઞ્ચસ્તવકિતકપોલં વિદધતે
સુધાર્દ્રા ધન્યાનાં વદનમનવદ્યાઃ કવિગિરઃ ॥ ૨૭॥

ધન્યાનામમૃતં દ્રવન્તિ હૃદયે કર્ણે વલન્મલ્લિકા-
લઙ્કારસ્તવકન્તિ કણ્ઠપુલિને મુક્તાકલાપન્ત્યપિ ।
શૈલાન્દોલિતદુગ્ધસિન્ધુલહરીભઙ્ગાભિરામોદ્ભ્રમા
શ્યામાકામુકખણ્ડમણ્ડનકથાસન્દર્ભગર્ભા ગિરઃ ॥ ૨૮॥

ધન્યાનાં ભણિતિચ્છલેન વદનેષૂદ્યન્તિ હૃત્કર્ણિકા-
ધામ્નઃ સૂક્તિસુધાવબોધવિધુતાપીડસ્ય ચણ્ડીપતેઃ ।
કિં જૂટાહિકિરીટરત્નરુચયઃ કિં સ્રગ્રજઃસૂચયઃ
કિં મૌલીન્દુમરીચયઃ કિમમરસ્રોતસ્વતીવીચયઃ ॥ ૨૯॥

સાન્દ્રાનન્દકરે ધૃતામૃતકરે નાસ્ત્યેષ રાકાકરે
ન પ્રૌઢપ્રસરે નિસર્ગશિશિરે સ્વર્ગાપગાનિર્ઝરે ।
ગાઢપ્રેમભરે સ્મરજ્વરહરે નોદ્દામરામાધરે
યઃ શમ્ભોર્મધુરે સ્તુતિવ્યતિકરે હ્લાદઃસુધાસોદરે ॥ ૩૦॥

ઓજસ્વી મધુરઃ પ્રસાદવિશદઃ સંસ્કારશુદ્ધોઽભિધા-
ભક્તિ વ્યક્તિવિશિષ્ટરીતિરુચિતૈરર્થૈર્ધૃતાલઙ્કૃતિઃ ।
વૃત્તસ્થઃ પરિપાકવાનવિરસઃ સદ્વૃત્તિરપ્રાકૃતઃ
શસ્યઃ કસ્ય ન સત્કવિર્ભુવિ યથા તસ્યૈવ સૂક્તિક્રમઃ ॥ ૩૧॥

પ્રાપ્તા કલ્પલતેવ ચેદ્ભગવતી વાગીશ્વરી કૈરપિ
પ્રાક્પુણ્યૈઃ સ્વપરોપકારકરણપ્રૌઢા પુનર્દુર્લભા ।
અજ્ઞૈસ્તજ્જ્ઞજનોપદેશવિહિતાવજ્ઞૈર્દુરાશાહતૈ-
રસ્તા દુર્મદકર્દમે ફલતિ કિં પાપં સશાપં વિના ॥ ૩૨॥

વિસ્રબ્ધં વિલસન્ત્યુપસ્કૃતપદન્યાસા વિલાસાલસા
સાહઙ્કારમકારણારિભિરભિધ્યાતાઽભિજાતાકૃતિઃ ।
ક્ષિપ્તા દૃપ્તનૃપાન્ધકૂપકુહરે દાશૈરિવાશાગ્રહૈ-
ર્ગ્રસ્તૈઃ સૂક્તિનિભેન તારકરુણં ગૌરીદૃશી રોદિતિ ॥ ૩૩॥

ઉષ્ણં નિઃશ્વસિતિ ક્ષિતિં વિલિખતિ પ્રસ્તૌતિ ન પ્રેયસઃ
પ્રીતિં સૂક્તિભિરીશિતુઃ કરતલે ધત્તે કપોલસ્થલમ્ ।
વાગ્દેવી હૃદયજ્વરેણ ગુરુણા ક્રાન્તા હતાશૈર્વૃથા
નીતાવિષ્કૃતકોપનિષ્કૃપનૃપસ્તોત્રત્રપાપાત્રતામ્ ॥ ૩૪॥

અસ્થાને ગમિતા લયં હતધિયાં વાગ્દેવતા કલ્પતે
ધિક્કારાય પરાભવાય મહતે તાપાય પાપાય વા ।
સ્થાને તુ વ્યયિતા સતાં પ્રભવતિ પ્રખ્યાતયે ભૂતયે
ચેતો નિર્વૃતયે પરોપકૃતયે પ્રાન્તે શિવાવાપ્તયે ॥ ૩૫॥

એતાઃ પૂર્વકવિપ્રણીતવિવિધગ્રન્થાઽમૃતાસ્વાદન-
ક્રીડાદુર્લલિતં હરન્તિ હૃદયં વાચઃ કથં ધીમતામ્ ।
કેષાઞ્ચિત્પુનરીશ્વરસ્તુતિપદવ્યાહારહેવાકિનાં
યાસ્યન્તિ સ્પૃહણીયતાં ભુવિ ભવક્લેશસ્પૃશાં માદૃશામ્ ॥ ૩૬॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“કવિકાવ્યપ્રશંસાખ્યં” નામ પઞ્ચમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૬. હરાષ્ટકં ષષ્ઠં સ્તોત્રમ્

જયત્યખિલખેચરપ્રવરમૌલિરત્નપ્રભા-
પ્રરોહપરિપીવરીકૃતનખાંશુપાદામ્બુજઃ ।
વિશાલનયનત્રયીરચિતધામધામત્રયી-
તિરસ્કૃતજગત્રયીપરિણતાન્ધકારો હરઃ ॥ ૧॥

જયત્યમરદીર્ઘિકાસલિલસેકસંવર્ધિત-
પ્રચણ્ડનયનાનલગ્લપિતતીવ્રતાપવ્યથઃ ।
અચિન્ત્યચરિતોજ્જ્વલજ્વલદનન્યસાધારણ-
પ્રભાવમહિમાહિતત્રિભુવનાપકારો હરઃ ॥ ૨॥

જયત્યચલકન્યકાલલિતદોર્લતાલિઙ્ગિત-
સ્ફુરદ્ગરલકાલિમાકલિતકાન્તકણ્ઠસ્થલઃ ।
તડિદ્વલયલઙ્ઘિતોલ્લસદમોઘમેઘભ્રમ-
પ્રમત્તગુહબર્હિણોપહૃતનૃત્તહર્ષો હરઃ ॥ ૩॥

જયત્યવિરલોચ્છલદ્ગરલવહ્નિહેતિચ્છટા-
સટાલફણભીષણક્ષપણપાશમોક્ષક્ષમઃ ।
ઉદારકરુણારસપ્રસરસારસિક્તાશયઃ
પ્રપન્નવિપદર્ણવોત્તરણકર્ણધારો હરઃ ॥ ૪॥

જયત્યુદધિનિઃસરદ્ગરનિગારલબ્ધાઽભય-
પ્રમોદભરનિર્ભરત્રિદશદૈત્યવૃન્દસ્તુતઃ ।
રસાતલતલોદ્ગતજ્વલદલઙ્ઘ્યલિઙ્ગાલ્લસ-
ન્મહામહિમમોહિતદ્રુહિણવાસુદેવો હરઃ ॥ ૫॥

જયત્યતુલવિક્રમોન્મિષદખર્વગર્વજ્જ્વર-
જ્વલચ્ચપલમન્મથોન્મથનભગ્નભોગસ્પૃહઃ ।
દશાસ્યભુજમણ્ડલીતરલિતૈકપિઙ્ગાચલ-
ત્રસદ્ગિરિસુતાહઠગ્રથિતકણ્ઠપીઠો હરઃ ॥ ૬॥

જયત્યકલિતોલ્લસન્મદભરોદ્ધુરાન્ધાસુર-
પ્રતિષ્કરણસાન્ત્વનપ્રથિતનિગ્રહાઽનુગ્રહઃ ।
જગત્ત્રયભયઙ્કરત્રિપુરઘોરદાવાવલી-
સલીલકવલીકૃતિપ્રલયવારિવાહો હરઃ ॥ ૭॥

જયત્યઘવનાશનિઃ સુમતિમાધવીમાધવઃ
કૃપામૃતપયોનિધિર્ભવમહાર્ણવૈકપ્લવઃ ।
વિપત્તૃણસમીરણઃ પ્રણયિચિત્તચિન્તામણિઃ
સમસ્તભુવનોદયપ્રલયકેલિકારો હરઃ ॥ ૮॥

॥ ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“હરાષ્ટકં” નામ ષષ્ઠં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૭. સેવાભિનન્દનં સપ્તમં સ્તોત્રમ્

નિશાન્તનિદ્રેવ દશેવ શૈશવી
નવીનવધ્વાશ્ચકિતેવ દૃક્છટા ।
સુરસ્રવન્તીવ કથેવ શામ્ભવી
કવીન્દ્રવાઙ્નિર્વૃતિમાતનોતુ વઃ ॥ ૧॥

અલૌકિકાહ્લાદનિબન્ધનં મનઃ
પ્રસાદનં સ્વાનુભવૈકસક્ષિકમ્ ।
પ્રકાશતાં વો હૃદિ પારમેશ્વરં
મહો રહસ્યં સુકવેર્ગિરામિવ ॥ ૨॥

સ યસ્ય ચાપાત્સપદિ ચ્યુતોઽચ્યુતઃ
શિખાભિરુગ્રો વિશિખઃ શિખાવતઃ ।
પુરાણ્યકાર્ષીદપુરાણિ ભૈરવો
ભયાનિ ભિન્દ્યાદભવો ભવઃ સ વઃ ॥ ૩॥

સ યસ્ય પૃષ્ઠે ચરણાર્પણં વૃષા
વૃષાધિરોહે કલયત્યનુગ્રહમ્ ।
ત્રિલોકનાથઃ સ ગિરા સુધાવૃષા
વૃષાકપિસ્તાપમપાકરોતુ વઃ ॥ ૪॥

સ યસ્ય પાદદ્વયમિદ્ધશાસનઃ
સદા સમભ્યર્ચતિ પાકશાસનઃ ।
પ્રભુઃ પ્રસાદાઽમલયા દૃશા સ નઃ
ક્રિયાદ્વિપદ્ભઙ્ગમનઙ્ગશાસનઃ ॥ ૫॥

ચમૂર્જયન્ભીજનકાનકા ન કાઃ
સ યસ્ય સૂનુઃ ક્લમહા મહામહાઃ ।
જટાઃ સ બિભ્રત્તરુણારુણારુણાઃ
શ્રિયઃ ક્રિયાદ્વઃ શુભયાભયાઽભયા ॥ ૬॥

મયિ ધ્રુવં દૃગ્ભવતા વતાઽવતા
કૃપામૃતાર્દ્રા મહિતા હિતાઽઽહિતા ।
અતસ્તવાસ્તપ્રમયામયા મયા
કૃતા નુતિઃ સાતિશયાશયાઽઽશયા ॥ ૭॥

અનભ્રવર્ષપ્રતિમં વિમત્સરા
નરા જરારુઙ્મરણાર્ત્તિભીરવઃ ।
મુધા સુધાસૂતિવતંસશંસનં
વિહાય ધાવન્તિ રસાયનાય કિમ્ ॥ ૮॥

મણિઃ સુસૂક્ષ્મોઽપિ યથોલ્બણં વિષં
કૃશોપિ વહ્નિઃ સુમહદ્યથા તૃણમ્ ।
શિશુર્મૃગેન્દ્રોપિ યથા ગજવ્રજં
તનુઃ પ્રદીપોઽપિ યથા તમોભરમ્ ॥ ૯॥

યથાલ્પમપ્યૌષધમુન્મદં ગદં
યથામૃતં સ્તોકમપિ ક્ષયાદ્ભયમ્ ।
ધ્રુવં તથૈવાણુરપિ સ્તવઃ પ્રભોઃ
ક્ષણાદઘં દીર્ઘમપિ વ્યપોહતિ ॥ ૧૦॥

અમન્દસન્દર્ભગભીરવિભ્રમઃ
પ્રગલ્ભવૈદર્ભપરિશ્રમઃ ક્રમઃ ।
અવશ્યમાસાદ્ય ગુણોચિતં વિભું
બિભર્ત્તિ સૌભાગ્યમભઙ્ગુરં ગિરઃ ॥ ૧૧॥

યથા હિ શીલેન વિના કુલાઙ્ગના
યથા વિવેકેન વિના મનીષિતા ।
સદર્થબોધેન વિના યથા શ્રુતિ-
ર્મહીભુજઙ્ગેન વિના યથા મહી ॥ ૧૨॥

યથા વિના દ્યૌરરવિન્દબન્ધુના
વિના શશાઙ્કેન યથા નિશીથિની ।

વિદગ્ધવર્ગેણ વિના યથા સભા
વિના વિભૂતિર્વિનયેન વા યથા ॥ ૧૩॥

કૃપાવિપાકેન વિના યથા મતિ-
ર્યથા સુપુત્રેણ વિના ગૃહસ્થિતિઃ ।
તથૈવ શોચ્યા હરિણાઙ્કશેખર-
સ્તવોપયોગેન વિના સરસ્વતી ॥ ૧૪॥

રમાપિ દેવી મમ નો મનોરમા
ક્ષમાપિ મામભ્યવપત્તુમક્ષમા ।
મમ ક્ષમૈકા ભગવત્પરાનુતિ-
ર્ભવાર્ત્તિભઙ્ગે સરસા સરસ્વતી ॥ ૧૫॥

અચેતનો યઃ કિલ કુસ્થિતિપ્રિયઃ
પૃથગ્વિધોપાધિશતક્ષતાશયઃ ।
નિષેવ્યતે પાદતલે સ યદ્ગિરિ-
શ્ચિરં મુનીન્દ્રૈરપિ શુદ્ધમાનસઃ ॥ ૧૬॥

નિસર્ગતઃ સત્પથગર્હિતસ્થિતિ-
ર્મલીમસો જિહ્મગતિશ્ચ યઃ ફણી ।
સ કુણ્ડલી યન્મણિમૌલિમણ્ડિતો
મહાભુજઙ્ગઃ પૃથુભોગભાગપિ ॥ ૧૭॥

યદપ્યજસ્રં જડસઙ્ગમોચિતઃ
સ્વભાવતુચ્છઃ શશભૃત્ કલામયઃ ।
કલઙ્કમુક્તં વહતે સુધામયં
વિધૂતદોષોદયમુજ્જ્વલં વપુઃ ॥ ૧૮॥

સ એષ ગૌરીશ્વરસંશ્રયાત્મનઃ
ફલોદ્ગમઃ કલ્પમહામહીરુહઃ ।
અમું સમાસાદયિતું હિતાયતિ-
ર્યતેત કો નામ ન ચેતનો જનઃ ॥ ૧૯॥

નિદાઘનિર્દગ્ધમહામરુભ્રમ-
ક્લમચ્છિદો માર્ગમહીરુહાદપિ ।
કલિન્દકન્યાસલિલૌઘસઙ્ગત-
ત્રિમાર્ગગામ્ભોભરસમ્પ્લવાદપિ ॥ ૨૦॥

સરસ્વતીસૌભગસારસમ્ભૃત-
પ્રસન્નગમ્ભીરપદક્રમાદપિ ।
કુરઙ્ગનાભીઘનકુઙ્કુમાઙ્કિત-
સ્તનાઙ્ગનાલિઙ્ગનવિભ્રમાદપિ ॥ ૨૧॥

અમન્દમાનન્દસુધારસદ્રવં
સ્રવન્નવન્ધ્યં ભવદુઃખિતે હૃદિ ।
ઇયત્યમુષ્મિન્ભુવનાધ્વનિ ધ્વનિ-
ર્નમઃ શિવાયેતિ ચમત્કરોતિ મે ॥ ૨૨॥

વિચિન્તયઞ્જીવનમેવ જીવનં
સમર્થયન્ પાર્થિવમેવ પાર્થિવમ્ ।
વિભાવયન્ વૈભવમેવ વૈ ભવં
કદાઽઽશ્રયે શઙ્કરમેવ શઙ્કરમ્ ॥ ૨૩॥

વરં ભવેદપ્યવરં કલેવરં
પરં હરારાધનસાધનં હિ યત્ ।
ન તુ ક્રતુધ્વંસિનિષેવણોત્સવં
વિનિઘ્નતી મુક્તિરયુક્તિપાતિની ॥ ૨૪॥

ક્વ નીલકણ્ઠાયતનોપસર્પણ-
સ્ફુટોપકારૌ ચરણૌ મહાગુણૌ ।
ક્વ ચાઞ્ચનોદ્વર્ત્તનચર્ચનાદિભિઃ
પુરારિપૂજાર્પણતર્પણૌ કરૌ ॥ ૨૫॥

ક્વ નામ નામગ્રહણોત્સવં વિભો-
રભિપ્રવૃત્તા રસના દિને દિને ।
ક્વ ચાદ્રિપુત્રીપતિપાદપઙ્કજ-
સ્ફુરદ્રજોરાજિવિરાજિતં શિરઃ ॥ ૨૬॥

ક્વ દૃક્ચિરં પારિતચન્દ્રશેખર-
સ્વરૂપસૌભાગ્યવિલોકનસ્પૃહા ।
ક્વ સન્તતાકર્ણિતદર્પકદ્વિષ-
દ્વિચિત્રચારિત્રપવિત્રિતા શ્રુતિઃ ॥ ૨૭॥

ક્વ નિર્ધુતાઽનલ્પવિકલ્પવિપ્લવ-

ત્રિલોચનધ્યાનનિબન્ધનં મનઃ ।
ક્વ ચાઽપવર્ગોઽયમમાર્ગ એવ યઃ
સ્મરારિસેવાસુખસર્વસમ્પદામ્ ॥ ૨૮॥

ઇદં વિદન્તઃ સુધિયો ભિયોજ્ઝિતાઃ
સમાધિમાધિચ્છિદમાશ્રિતા અપિ ।
પ્રભુપ્રણામસ્તુતિચિન્તનાર્ચન-
સ્ફુટોપયોગં બહુ મન્વતે વપુઃ ॥ ૨૯॥

કિમઙ્ગમઙ્ગલ્યમનઙ્ગભઙ્ગદ-
પ્રસાદનાદન્યદધન્યમન્યસે ।
યદર્થમર્થક્ષતિકૃત્સુદુષ્કરપ્રયાસ-
સાધ્યેષુ મખેષુ ખિદ્યસે ॥ ૩૦॥

ઇમા હિમાનીવિમલા હવિર્ભુજાં
પ્રભુપ્રસાદપ્રભવા વિભૂતયઃ ।
કરોષિ યત્તર્પણમાત્રકામ્યયા
દયાસ્પદપ્રાણ્યુપઘાતપાતકમ્ ॥ ૩૧॥

સખે ! સખેદસ્ય ધનાર્જનં પ્રતિ
પ્રતિગ્રહાધ્યાપનયાજનાદિભિઃ ।
પ્રયાતિ તે વાયુરિવાયુરિઙ્ગિતં
વિહન્તિ હન્ત ક્રતવે તવેહિતમ્ ॥ ૩૨॥

અતઃ સ્વતઃ પ્રાર્થિતસમ્પદાં પદં
કદર્થનાહીનમદીનમેનસા ।
નિદાનમાનન્દભુવઃ સ્વયમ્ભુવો
ભજસ્વ પાદામ્બુજસેવનોત્સવમ્ ॥ ૩૩॥

અક્લેશપેશલમલઙ્ઘ્યકૃતાન્તદૂત-
હુઙ્કારભઙ્ગભિદુરં દુરિતેન્ધનાગ્નિમ્ ।
કો નામ નામયહરં હરપાદપદ્મ-
સેવાસુખં સુમતિરન્વહમાદ્રિયેત ॥ ૩૪॥

રોમન્થમન્થરકુરઙ્ગશતાશ્રિતેષુ
ભાગીરથીશિશિરશીકરશીતલેષુ ।
રોહન્મહાર્હફલકન્દલસુન્દરેષુ

બદ્ધાસ્પદાસ્તુહિનભૂધરકન્દરેષુ ॥ ૩૫॥

ધન્યાઃ સમાધિમવધાનધના ધનાદિ-
સમ્બન્ધબન્ધમવધૂય ધિયાઽધિયન્તઃ ।
જ્યોતિઃ પરં ગલદનલ્પવિકલ્પજાલ-
માલોકયન્તિ ભગવન્તમનન્તમન્તઃ ॥ ૩૬॥

ધન્યા ભજન્તિ નૃપવેશ્મસુ વેત્રિવક્ત્ર-
હુઙ્કારકાતરધિયસ્તરુણેન્દુમૌલિમ્ ।
વૈરાગ્યનિર્વૃતમનસ્વિજનાવકીર્ણ-
સ્વર્ગાપગાપુલિનબાલલતાલયેષુ ॥ ૩૭॥

સન્તઃ સ્મરન્તિ શશિખણ્ડશિખણ્ડસેવા-
હેવાકિનઃ સુરસરિત્પુલિનસ્થલેષુ ।
લક્ષ્મીલવોલ્લસદમન્દમદાઽવલેપ-
ભૂપાલવાલિશવિલઙ્ઘનવિપ્લવાનામ્ ॥ ૩૮॥

ઇદં મધુમુખં વિષં હરતિ જીવિતં તત્ક્ષણા-
દપથ્યમિદમાશિતં વ્યથયતે વિપાકે વપુઃ ।
ઇદં તૃણગણાવૃતં વિલમધો વિધત્તે ક્ષણા-
દ્યદત્ર મલિનોલ્બણૈર્દ્રવિણમર્જિતં કર્મભિઃ ॥ ૩૯॥

અતઃ પ્રતનુવૈભવોદ્ભવદખર્દગર્વક્ષમા-
પતિપ્રણયસમ્ભવં ભુવિ વિડમ્બનાડમ્બરમ્ ।
વિહાય સુરવાહિનીપુલિનવાસહેવાકિનો
ભજન્તિ કૃતિનસ્તમીરમણખણ્ડચૂડામણિમ્ ॥ ૪૦॥

કિં ભૂયોભિઃ પરુષવિષયૈઃ શ્રીવિકારૈરસારૈઃ
કિં વા ભૂયઃ પતનવિરસૈઃ સ્વર્ગભોગાભિલાષૈઃ ।
મન્યે નાઽન્યદ્ભવભયવિપત્કાતરાણાં નરાણાં
મુક્ત્વા ભક્તિં ભગવતિ ભવે શસ્યમાશાસ્યમસ્તિ ॥ ૪૧॥

દૂરોદઞ્ચચ્ચટુલલહરીહારિહસ્તવ્યુદસ્ત-
વ્યાપત્તાપત્રિદશતટિનીમજ્જનોન્મજ્જનેષુ ।
શ્રદ્ધાબન્ધં શશધરશિરઃપાદરાજીવસેવા-
હેવાકૈકવ્યસનમનસસ્તેન તન્વન્તિ સન્તઃ ॥ ૪૨॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"સેવાભિનન્દનં" નામકં સપ્તમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૮. શરણાશ્રયણં અષ્ટમં સ્તોત્રમ્

કલ્યાણિનઃ સુરગિરેરિવ સંશ્રિતસ્ય
લક્ષ્મ્યા હરેરિવ રવેરિવ દીપ્તિભાજઃ ।
પદ્મસ્ય શમ્ભુવિષયસ્ય જયન્તિ પાદા
યે મણ્ડયન્તિ ચ પુનન્તિ ચ વિષ્ટપાનિ ॥ ૧॥

યાઃ પઙ્કિલેન કલિલેન વિયોજયન્તિ
નિત્યોજ્જ્વલેન કુશલેન ચ યોજયન્તિ ।
તા ધૂર્જટેરમરનિર્ઝરિણીતરઙ્ગ-
ભઙ્ગાભિરામગતયઃ સ્તુતયો જયન્તિ ॥ ૨॥

સંસારદારુણદવાનલદહ્યમાન-
વાક્ચિત્તકાયકુશલીકરણૌષધાનિ ।
શ્રીભુક્તિમુક્તિવશકર્મ્મણિ કાર્મણાનિ
શમ્ભોર્જયન્તિ નુતિચિન્તનપૂજનાનિ ॥ ૩॥

દોષાકરસ્ય શિરસિ સ્થિતિમુત્તમાઙ્ગ-
ચ્છેદં વિધેરવિરહં નરવાહનસ્ય ।
ભસ્મીકૃતિં ત્રિપુરપાશધરસ્મરાણાં
વશ્યં દિશાઞ્ચ દશકં દશકન્ધરસ્ય ॥ ૪॥

શૌર્યાનલસ્ય પરશુવ્યજનેન દીપ્તિં
રામસ્ય બાહુપરિઘપ્રતિઘં મઘોનઃ ।
હૈમં મરુત્તનૃપતેર્દિવસાનિ સપ્ત
વર્ષં સુદર્શનસમર્પણમચ્યુતસ્ય ॥ ૫॥

શ્વેતસ્ય કણ્ઠપુલિનાત્સમવર્તિપાશ-
પ્રોત્સારણં નયનનિર્હરણં ભગસ્ય ।
દુગ્ધાબ્ધિદાનમુપમન્યુમુનેઃ ક્રિયાસુ
દક્ષસ્ય વિઘ્નકરણં મખદીક્ષિતસ્ય ॥ ૬॥

શૂલાધિરોહણપરાભવમન્ધકસ્ય
પૂષ્ણો હનુગ્રહમનુગ્રહમર્જુનસ્ય ।
નન્દીશ્વરસ્ય રવિજાદભયં ભુજઙ્ગ-
ભઙ્ગ્યાભિમાનમથનં મુનિમાનિનીનામ્ ॥ ૭॥

કિં વાઽપરં દ્રુહિણકૃષ્ણહરત્વમેત્ય
સર્ગસ્થિતિપ્રશમનાનિ જગત્ત્રયસ્ય ।
ક્રીડન્નિવ વ્યધિત યેન નિરઙ્કુશં તત્
સ્વાતન્ત્ર્યમપ્રતિહતં જયતીશ્વરસ્ય ॥ ૮॥

યસ્યાઽતિઘોરગરલાદપિ કણ્ઠપીઠા-
ત્સઞ્જીવનૌષધમુદેતિ વચો નતાનામ્ ।
યસ્ય જ્વલદ્ઘનકૃશાનુશિખોલ્બણાપિ
વર્ષત્યમોઘમમૃતદ્રવમેવ દૃષ્ટિઃ ॥ ૯॥

દંષ્ટ્રાકરાલમપિ ઘોરમઘોરવક્ત્રં
યસ્ય પ્રપન્નભયભઞ્જનભઙ્ગિમેતિ ।
યસ્યાઙ્ગભસ્મકણિકાશ્ચરણાશ્રિતેષુ
કર્પૂરધૂલિપટલશ્રિયમાશ્રયન્તિ ॥ ૧૦॥

યસ્યાપિ કૃષ્ણભુજગા ભુજગા ભજન્ત-
મિન્દીવરસ્રજ ઇવ પ્રવિનન્દયન્તિ ।
કિં ચાઙ્ગસઙ્ગિ મરુદીરિતમેતિ યસ્ય
મુણ્ડં નમત્સ્વમલમઙ્ગલકમ્બુશોભામ્ ॥ ૧૧॥

યસ્યેભચર્મઘનશોણિતપઙ્કલિપ્ત-
મઙ્ગેષુ મઙ્ગલદુગૂલ વિલાસમેતિ ।
યસ્યાપિ તાપવિધુરેષુ કરે કપાલ-
માલમ્બતેઽમૃતકમણ્ડલુખણ્ડલીલામ્ ॥ ૧૨॥

યત્પાદપાંસુપરિમર્શશુચિ શ્મશાનં
શ્રીશૈલનૈમિષમુખાન્યધરીકરોતિ ।
યત્સંસ્તવાદવિકલં કુશલં કપાલ-
પાલી કરોતિ કૃતિનાં કમલાવલીવ ॥ ૧૩॥

યં દેવમસ્તશિરસં સુરભર્તુરઙ્કે
લઙ્કેશવૈરિકરવીજિતતાલવૃન્તમ્ ।

આસીનસુપ્તસુખિતં શતરુદ્રિયાદિ-
મન્ત્રૈઃ સ્વરેણ મધુરેણ ગૃણાતિ વેધાઃ ॥ ૧૪॥

હેલાવલીઢભુવનત્રિતયેન યેન
ગીર્ણાઃ પુરન્દરમુકુન્દરવીન્દવોઽપિ ।
યસ્ય જ્વલદ્વિપુલભાલવિલોચનાગ્નિ-
જ્વાલાવલીશલભતામગમત્સ કાલઃ ॥ ૧૫॥

શ્વેતં વિધોરુદયહેતુમવેત્ય પક્ષં
કાલં ચ યઃ ક્ષયકરં દૃશમાશ્રિતસ્ય ।
શ્વેતં દયાવિશદયાશુ દૃશાનુગૃહ્ય
કાલં દૃશૈવ નયતિ સ્મ શમં વિપક્ષમ્ ॥ ૧૬॥

ચક્રી મુખાગ્રવિલસજ્જ્વલનોગ્રજિહ્વા-
લીઢામ્બરઃ ક્ષિતિધરેન્દ્રધનુર્ધરસ્ય ।
યસ્યાગમન્નિધનસાધનતાં પુરાણાં
વાણીકૃતશ્ચ રણમૂર્ધ્નિ ગુણીકૃતશ્ચ ॥ ૧૭॥

ચક્રાયુધં વિશિખતામુડુચક્રવર્તિ-
ચક્રાભિધાનસુહૃદૌ રથચક્રભાવમ્ ।
નીત્વાઽસૃજત્ત્રિદશધામ્નિ રસાતલે ચ
યો હર્ષશોકમયમશ્રુ પુરાઙ્ગનાનામ્ ॥ ૧૮॥

આરૂઢરીઢમપિ યેન સમર્પિતેન
પ્રીતિં રતિં ચ હૃદિ વિસ્મરતિ સ્મ કામઃ ।
તં દૃષ્ટિપાતમધિગમ્ય બિભર્તિ યસ્ય
પ્રીતિં રતિં ચ હૃદિ કો ન સુસિદ્ધકામઃ ॥ ૧૯॥

કૃષ્ણોપદર્શિતપથઃ પૃથુલોષ્મભીષ્મ-
શ્લાઘ્યં દધદ્વપુરુપાત્તવનાન્તવાસઃ ।
વ્યાધાકૃતેરપિ ધનઞ્જય એવ યસ્ય
દૃગ્ગોચરે કૃતપદો મહસા દિદીપે ॥ ૨૦॥

યુક્તં સુધાકરસુધાકરકદ્યુસિન્ધુ-
તોયાદિ યન્મનસિ તાપમપાકરોતિ ।
યસ્યાઙ્ગસઙ્ગિ શવભસ્મકપાલમાલા-
હાલાહલાહિદહનાદ્યપિ હૃદ્યમેવ ॥ ૨૧॥

મૂર્તિઃ કૃમેઃ શતપદી શ્રવણં પ્રવિષ્ટા
દૃષ્ટા રુજામસુહૃતં સૃજતી જનાનામ્ ।
સૌરી તનુર્નનુ સહસ્રપદી યદીય-
નેત્રસ્થિતા હરતિ મૃત્યુભયં શ્રિતાનામ્ ॥ ૨૨॥

આકર્ણ્ય યઃ કૃપણમાર્ત્તવચઃ કૃપાબ્ધિ-
રાધૂતમૂર્ધસુરનિર્ઝરિણીકણૌઘૈઃ ।
ઉત્સઙ્ગસઙ્ગતગિરીન્દ્રસુતાકુચાગ્ર-
સંસક્તમૌક્તિકમણીન્દ્વિગુણીકરોતિ ॥ ૨૩॥

ઉદ્ગાઢભક્તિવિધુરવ્યપનીતતીવ્ર-
દોષાન્ધકારમતિમાત્રશુચિપ્રકાશમ્ ।
પીયૂષમુદ્વમતિ યસ્ય વિવિક્તવર્ણં
કર્ણાન્તગામિ વચનં ચ વિલોચનં ચ ॥ ૨૪॥

પાત્રીભવન્તિ ન યદઙ્ઘ્રિસરોજરેણુ-
મૈત્રીપવિત્રશિરસઃ સ્થિરસત્યવાચઃ ।
સાટોપકોપવિકટભ્રુકુટિચ્છટાના-
મુત્તાલકાલભટવક્ત્રવિભીષિકાણામ્ ॥ ૨૫॥

સૂક્તિં શુચિં શ્રવણયોરમૃતં સ્રવન્તીં
વક્રામભઙ્ગુરગુણાં મહતીં વહન્તઃ ।
ગાયન્તિ યં શ્રિતવતઃ પરિશુદ્ધવંશ-
વિદ્યા યશાંસિ કવયઃ પરિવાદકાશ્ચ ॥ ૨૬॥

યત્સેવકસ્ય મદનોલ્બણબાણપૂગ-
ક્રાન્તાઽલિકાન્તવિકસત્તિલકોજ્જ્વલશ્રીઃ ।
સેવ્યા ભવત્યવસરે કલકણ્ઠનાદ-
હૃદ્યા વધૂઃ કુસુમિતોપવનસ્થલી ચ ॥ ૨૭॥

યસ્મિન્નખિન્નમનસો વ્યસનાવસન્ન-
સન્તાપશાન્તિકૃતસમ્મતયો વસન્તિ ।
કાત્યાયની ચ કરુણા ચ કલા ચ ચાન્દ્રી
સ્નિગ્ધા ચ દૃક્ સુરસરિચ્ચ સરસ્વતી ચ ॥ ૨૮॥

સન્તાપસમ્પદપહારપટૂનિ સિદ્ધ-

સિન્ધોરિવેન્દુધવલાનિ જલાનિ યસ્ય ।
આકલ્પયન્તિ મદયન્તિ પવિત્રયન્તિ
સઞ્જીવયન્તિ ચ જગન્તિ ભૃશં યશાંસિ ॥ ૨૯॥

દુષ્કાલસઙ્કટકટાહકદર્થિતાનાં
તીવ્રાભિમાનમનસાં ઘનસારભાંસિ ।
ભિન્દન્ત્યમન્દહરિચન્દનબિન્દુવૃન્દ-
સન્દોહદોહદમહો ચરિતાનિ યસ્ય ॥ ૩૦॥

ફુલ્લારવિન્દમકરન્દધૃતપ્રસઙ્ગ-
ભૃઙ્ગાઙ્ગનાગુમગુમારવગીતિગર્ભમ્ ।
ગાયન્તિ યસ્ય ચરિતં હરિતામધીશા
ધીશાલિનઃ કમલિનીપુલિનસ્થલીષુ ॥ ૩૧॥

વ્યક્તોજ્જ્વલાલિકચિતં મુખમાયતાક્ષં
વિસ્તીર્ણકર્ણિકમનર્ગલરૂઢનાલમ્ ।
યં શંસતોઽધિવસતિ સ્વયમુક્તિદેવી
રાજીવસદ્મકમલા વિજિગીષયેવ ॥ ૩૨॥

આપન્નબાન્ધવમબન્ધ્યવચોવિલાસ-
માસન્નમજ્જનનમજ્જનસાન્ત્વનેષુ ।
દેવં સુધાકરકિશોરકૃતાવતંસં
તં સંશ્રિતાર્ત્તિહરણં શરણં શ્રયામિ ॥ ૩૩॥

દેવં શ્રયામિ તમહં મુકુટોરગેન્દ્ર-
સ્ફૂર્જત્ફણામણિસહસ્રમિષેણ યસ્ય ।
ભાલાનલેન સુરસિન્ધુજલોક્ષિતેન
પ્રોન્મુક્તમઙ્કુરસહસ્રમિવાચકાસ્તિ ॥ ૩૪॥

સાનુગ્રહોત્તમગણાશ્રિતપાદમૂલં
મૂર્ધ્ના ધૃતાભ્રસરિતં સતુષારમૂર્તિમ્ ।
આસેવિતં વિષધરૈઃ કટકેષુ તાપ-
શાન્ત્યૈ ગિરીશમતિહૃદ્યગુહં શ્રયામિ ॥ ૩૫॥

યઃ ક્ષીરનીરનિધિમઙ્ઘ્રિતલે સુધામ્ભઃ-
કુમ્ભં કરે શિરસિ દેવનદીમદીનામ્ ।
હર્તું બિભર્તી ભવિનામણુકર્મમાયા-

મૂલં મલત્રયમયં તમહં શ્રયામિ ॥ ૩૬॥

યસ્યાપગા સ્રગિવ સૌમનસી જટાસુ
યઃ કૌમુદીં વિરચનામિવ મૂર્ધ્નિ ધત્તે ।
દેવીં વરાઽભયકરામપિ યો બિભર્તિ
પ્રીતઃ શિવાં દૃશમિવ પ્રભુમાશ્રયે તમ્ ॥ ૩૭॥

ગૌરીં ગજાસ્યજનનીં હિમવત્પ્રસૂતિં
સદ્યઃપવિત્રિતજગત્ત્રિતયાં ચ એકઃ ।
કાત્યાયનીં સુરધુનિં ચ વિભુર્બિભર્તિ
નિર્વાણદં શરણમેમિ તમિન્દુમૌલિમ્ ॥ ૩૮॥

ક્વાપ્યુદ્ધૃતક્રતુવિધાતૃમૃગોત્તમાઙ્ગ-
મુત્સઙ્ગસઙ્ગતમૃગં ક્વચિદોષધીશમ્ ।
ક્રૂરં ક્વચિન્મૃગવધૈકરતિં કિરાતં
વાતં ક્વચિન્મૃગરથં વિભુમાશ્રયામિ ॥ ૩૯॥

ઉદ્દામદોષમપિ દીર્ઘગુણં ભુજઙ્ગ-
ભોગોપગૂઢમપિ રૂઢશિખિપ્રસઙ્ગમ્ ।
કાપાલિકવ્રતસમેતમપિ દ્વિજેન્દ્ર-
ચૂડામણિં વિભુમનઙ્કુશમાશ્રયામિ ॥ ૪૦॥

અઙ્ગે ધૃતાઙ્ગનમનઙ્ગકૃતાઙ્ગભઙ્ગં
વિશ્વાધિનાથમથ ખણ્ડકપાલપાણિમ્ ।
ઉગ્રં શિવં હરમઘોરમજં ચ સદ્યો-
જાતં ચ વિસ્મયનિધિં વિભુમાશ્રયામિ ॥ ૪૧॥

અસ્મિન્ભવાધ્વનિ મહાવિષમેઽસમેષુ-
રોષાદિતસ્કરતિરસ્કરણૈકવીરમ્ ।
ભીરુઃ શ્રયામિ શરણં ક્ષણદાકુટુમ્બ-
લેખાશિખામણિમનુત્તમશક્તિમીશમ્ ॥ ૪૨॥

કિં મેરુમન્દરમુખૈર્ગિરિભિર્ગરીયાન્
કૈલાસ એવ જગદેકગુરુર્ગિરીશઃ ।
યસ્યાઽભયઙ્કરમસઙ્કરમસ્તશઙ્ક-
મઙ્કં સુટઙ્કમકલઙ્કમલઙ્કરોતિ ॥ ૪૩॥

ઉલ્લઙ્ઘ્ય શાસનમનન્યજશાસનસ્ય
કોઽપ્યન્યશાસનમુપાસિતુમેતિ નિષ્ઠામ્ ।
હિત્વા વનં હિ નવનાગરપર્ણપૂર્ણ-
મુષ્ટ્રઃ શ્રયત્યવટમેવ સકણ્ટકૌઘમ્ ॥ ૪૪॥

અન્યાર્થમપ્યુપહિતા શિતિકણ્ઠસેવા
લોકસ્ય કલ્પલતિકેવ ફલત્યવશ્યમ્ ।
ઉદ્દીપિતા ખલુ પરસ્ય કૃતેઽપિ યેન
તસ્યાપિ દર્શયતિ દીપશિખાઽર્થસાર્થમ્ ॥ ૪૫॥

યદ્યર્થિતઃ (યદ્યર્થિતઃ)સ ભગવાનપિ જીવિકાર્થં
તત્રાપિ કિલ્વિષવિપાકમપાકરોતિ ।
યોઽપિ દ્યુસિન્ધુપયસિ પ્લવતે નિદાઘ-
ઘર્મચ્છિદે ભવતિ સોપિ હિ ધૌતપાપઃ ॥ ૪૬॥

કુર્વન્તિ ભક્તિમપરૈરપિ યે નિયુક્તા
ભર્ગસ્ય તેઽપિ ભવદુર્ગતિમુત્સૃજન્તિ ।
સ્તન્યાર્થમપ્યુપહિતા પૃથુકસ્ય ધાત્રી
પાત્રીભવત્યખિલભોગસુખાસિકાનામ્ ॥ ૪૭॥

દમ્ભાદપિ ધ્રુવમનઙ્ગજિતઃ પ્રયુક્તઃ
સેવાવિધિઃ પ્રમદસમ્પદ(પ્રમદસમ્મદ)માદધાતિ ।
વેશ્યાજનસ્ય ન સુખાય કિમઙ્ગરાગ-
માલાદુગૂલધવલઃ કૃતકોઽપિ વેષઃ ॥ ૪૮॥

તસ્માદુપેત વિભુમેવ યથાતથાપિ
મુક્તિર્ન ચેદ્ભવતિ કિં ન ગલન્ત્યઘાનિ ।
યઃ સ્વેચ્છયૈવ નિપતત્યમૃતહૃદેઽન્ત-
ર્મજ્જત્યસૌ યદિ ન તત્કિમુદેત્યસિક્તઃ ॥ ૪૯॥

ક્ષીરાબ્ધેરવહેલયા વિતરણં નિર્યન્ત્રણં વર્ષણં
હેમ્નઃ ક્રુદ્ધકૃતાન્તમુક્તફણભૃત્પાશગ્રહોદ્બર્હણમ્ ।
યચ્ચાપ્યુત્કટકાલકૂટકવલીકારાદિકર્માદ્ભુતં
ક્રીડામાત્રકમેવ યસ્ય તદસૌ દેવઃ કથં વર્ણ્યતે ॥ ૫૦॥

સ્વચ્છન્દસ્ય યદૃચ્છયા ગમયતઃ પ્રેઙ્ખોલતાં ભ્રૂલતા-
માજ્ઞાઽનુગ્રહલાભકત્થનઘનસ્પર્ધાનુબન્ધોદ્ધુરાઃ ।

સોષ્માણઃ કલયન્તિ યસ્ય કલહં સેવાસુ દેવાસુરા
દેવસ્યાઽસ્ય મહેશ્વરસ્ય મહિમશ્લાઘાવિધૌ કે વયમ્ ॥ ૫૧॥

ઉર્વીનીરસમીરણારુણશિખિવ્યોમાત્મસોમાત્મકૈ-
રષ્ટાભિર્વિભવૈર્બિભર્તિ ભુવનં ભોક્તા ચ ભોગ્યશ્ચ યઃ ।
બ્રૂમસ્તસ્ય કિમીશ્વરસ્ય મહતઃ સ્વૈરી સ્વકૈરેવ યઃ
સ્ફારૈર્બ્રહ્મપુરન્દરપ્રભૃતિભિઃ શારૈરિવ ક્રીડતિ ॥ ૫૨॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગ્દ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“શરણાશ્રયણં” નામાઽષ્ટમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૯. કૃપણાક્રન્દનં નવમં સ્તોત્રમ્

દીપોત્કરૈરવિરુચાં પરિપૂરણેયં
નીહારવારિભિરિદં ભરણં પયોધેઃ ।
અસ્માદૃશાં મિતદૃશાં નિયતૈર્વચોભિઃ
પ્રસ્તૂયતે ભવ તવ (તવ ભવ)સ્તવચાપલં યત્ ॥ ૧॥

અત્રાઽપરાધ્યતિ ગિરો હર ધૃષ્ટતેય-
મેષા નિસર્ગમુખરા મુખરાગિણી યત્ ।
પ્રૌઢિં પરામનુપયત્યપિ વાઞ્છતિ ત્વાં
સ્વામિન્ હઠાદિવ પરં પુરુષં ગૃહીતુમ્ ॥ ૨॥

યદ્વા ભવત્યસુલભો ભવદાશ્રિતસ્ય
શસ્યઃ સ કોઽપિ મહિમા ન હિ માદૃશોઽપિ ।
સ્વચ્છન્દમન્દમપિ યત્ર પદં ત્વદુક્ષા
ધત્તે મહી ભવતિ હેમમયી હિ તત્ર ॥ ૩॥

ભીષ્મો વિષાદપિ વિષાદપિનદ્ધમેત-
ચ્ચેતશ્ચકાર સવિકારમકારણારિઃ ।
મોહામયસ્તમયમસ્તમયં નયામિ
સ્વામિઁસ્તવ સ્તવરસાયનસેવનેન ॥ ૪॥

એષઃ સ્તવસ્તવ નવપ્રમદોપદેશ-
માદેશયઞ્જયતિ કોઽપિ ગુરુર્ગિરીશ ।

સદ્યઃ પુરઃ સ્ફુરતિ મે દુરતિક્રમેણ
યત્સઙ્ગમક્રમવશેન વચોધિદેવી ॥ ૫॥

નાસ્ય સ્પૃહાઽસ્તિ સરસાય રસાયનાય
નાઽયન્ત્રિતેન્દુવદનાવદનાઽમૃતાય ।
નિર્બન્ધમેતિ તુ ભવત્સવિધે વિધેહિ
નિર્બન્ધમન્ધકરિપો તદિદં મનો મે ॥ ૬॥

આભાતિ શક્રનગરી ન ગરીયસી મે
પ્રીતિં ચ સિઞ્ચતિ ન કાઞ્ચન કાઞ્ચનાદ્રિઃ ।
જાને પરં હર શરણ્યમરણ્યમેવ
યત્ર ત્વદઙ્ઘ્રિનલિનાર્ચનનિર્વૃતિઃ સ્યાત્ ॥ ૭॥

પુષ્પેષુ દોહદવશાદવશા(શં)ભૃશં યા
બભ્રામ વામનયનાભુજમઞ્જરીષુ ।
સા સામ્પ્રતં દૃગલિની વલિની(નીં)વ્યનક્તિ
ત્વદ્ભક્તિકલ્પલતિકાફલભોગતૃષ્ણમ્ ॥ ૮॥

કિં નિર્મિતા મુકુટચન્દ્રકલાં નિપીઽય
કિં વા શિરઃશરણનિર્ઝરિણીજલેન ।
કિં વા કરસ્થકલશામૃતસમ્પ્લવેન
ભક્તિસ્ત્વયા પ્રણયિનાં ભવતાપશાન્ત્યૈ ॥ ૯॥

સ્વામિન્વિચિત્રચરિતસ્ય તવાઽપદાન-
ગીતામૃતેષુ દૃઢરૂઢરતિર્મમેયમ્ ।
દૂરીકૃતાઽન્યસરણિર્હરિણીવ વાણી
સત્યં પદાત્પદમપિ ક્ષમતે ન ગન્તુમ્ ॥ ૧૦॥

આશ્વાસનં યમભયાકુલતામૃતાનાં
સઞ્જીવનં ભવદવવ્યથયા મૃતાનામ્ ।
આલમ્બનં સુકવિરાજગિરામૃતાનાં
સઙ્કીર્તનં જયતિ તે ચરિતામૃતાનામ્ ॥ ૧૧॥

દાનં તરઙ્ગતરલઃ કિલ દુગ્ધસિન્ધુ-
ર્મુક્તિઃ કરાલતરકાલભયાત્પ્રસાદઃ ।
ત્યાગોઽપિ સપ્તદિવસાનિ સુવર્ણવૃષ્ટિઃ
કિં કિં ન ચારુચરિતં ભવતઃ પ્રશસ્યમ્ ॥ ૧૨॥

સ્વામિન્ રજઃપરિચિતં ચપલસ્વભાવં
જાત્યા મલીમસમિદં હૃદયં મદીયમ્ ।
ત્વત્પાદપદ્મવિષયે કૃતપક્ષપાતં
ધત્તે પ્રમોદભરનિર્ભરભૃઙ્ગલક્ષ્મીમ્ ॥ ૧૩॥

ત્વાં વામદેવમપિ દક્ષિણમાશ્રિતેષુ
સર્વત્ર શઙ્કર વસન્તમપિ સ્મરારિમ્ ।
અપ્યન્તકોપશમહેતુમનન્તકોપ-
શાન્ત્યેકકારણમચિન્ત્યગતિં શ્રયામિ ॥ ૧૪॥

ક્વાપિ પ્રસીદસિ દિશન્વિશદં પ્રકાશં
ક્વાપિ પ્રયચ્છસિ ઘનાવરણોપરોધમ્ ।
કુર્મઃ કિમત્ર મહનીયમહામહિમ્નો
નાસ્ત્યેવ નામ નિયતિર્નભસઃ પ્રભોશ્ચ ॥ ૧૫॥

ચિત્તં નતાપદુપતાપહૃતિપ્રવૃત્તિં
ભીતાऽભયાર્પણપણપ્રવણાં ચ વાણીમ્ ।
લોકોપકારપરતન્ત્રમિદં વપુશ્ચ
કસ્ત્વત્પરઃ પરમકારુણિકો બિભર્તિ ॥ ૧૬॥

ચિત્તં વિષાદમગમન્ન પરં પ્રસાદ-
મૌજ્ઝદ્વિચારમુચિતં ન બહિઃ પ્રચારમ્ ।
લેભે ન કુત્ર વિવરં પ્રવરં ન બોધ-
મેતત્ત્વયૈવ ભગવન્ધૃતવિપ્રયોગમ્ ॥ ૧૭॥

અશ્રાન્તમાન્તરમશાન્તરજોવિકારં
સારઙ્ગકેતુમુકુટસ્ફુટમન્ધકારમ્ ।
યુક્તં યદન્ધયતિ યદ્બધિરીકરોતિ
કોऽતિપ્રસઙ્ગ ઇતિ તત્ર ન તર્કયામિ ॥ ૧૮॥

લીલાવિલોલલલનાનયનાન્તવાસ-
માસાદ્ય યઃ ક્વ ન ભનક્તિ મનસ્વિનોऽપિ ।
સોऽયં નિવિશ્ય વિમલે હૃદયે મદીયે
ધિઙ્મર્મમર્મ ન ભિનત્તિ કથં મનોભૂઃ ॥ ૧૯॥

સ્વામિન્નસન્તમિવ તત્ર વસન્તમેવ

સત્વામવૈતિ કિમિદં યદિ વા કિમન્યત્ ।
દગ્ધોઽપિ યં પુનરવાપ્ય બિભર્તિ ગર્વં
સર્વઙ્કષો વિજયતે સ તવ પ્રસાદઃ ॥ ૨૦॥

શ્રીખણ્ડચન્દનનિઘૃષ્ટકુરઙ્ગનાભિ-
કર્પૂરકુઙ્કુમકરમ્બશુભાઙ્ગરાગમ્ ।
ઉદ્યન્નવીનકદલીદલસૌકુમાર્યં
બિભ્રત્યનઙ્ગનટમઙ્ગલરઙ્ગમઙ્ગમ્ ॥ ૨૧॥

ફુલ્લારવિન્દવદના વિકસચ્છિરીષ-
માલાભુજાભિનવનીલસરોજનેત્રા ।
બ્રહ્માસ્ત્રમપ્રતિહતં વિહિતા હિતાય
પુષ્પાયુધસ્ય કુસુમૈરિવ માધવેન ॥ ૨૨॥

નાથેતિ જીવિતહરેતિ દયાપરેતિ
સપ્રેમકોપમતિકોમલમાલપન્તી ।
ગાઢાનુરાગવિવૃતાખિલગૂઢભાવ-
માવર્જયન્ત્યવિષયૈર્વચસાં વિલાસૈઃ ॥ ૨૩॥

કિંવા પરં કુપિતનિર્ઘૃણપઞ્ચબાણ-
બાણૌઘભિન્નહૃદયા પરિરભ્ય ગાઢમ્ ।
મુગ્ધાજનસ્ય સહજામવજિત્ય લજ્જા-
મૌત્સુક્યસાન્દ્રમધરામૃતમર્પયન્તી ॥ ૨૪॥

આક્ષિપ્તસિન્ધુમથનોત્થમહામૃતૌઘ-
ભાવત્કભક્તિરસપારણનિત્યતૃપ્તમ્ ।
પ્રત્યાહૃતેન્દ્રિયમવાપ્તસમાધિસૌખ્યં
ન ત્વત્પરં હરતિ સા હરિણેક્ષણાઽપિ ॥ ૨૫॥

હેલાવલન્મલયમારુતકમ્પિતાનાં
શીર્ણૈઃ ફલૈઃ સ્વયમરણ્યમહીરુહાણામ્ ।
વૃત્તિર્હરસ્મરણઘૂર્ણિતચેતસઃ ક્વ
દીનં મુખં ક્વ ચ પુરઃ કુમહીપતીનામ્ ॥ ૨૬॥

નેત્રત્વમીશ તવ મૂર્તિવિલોકનેષુ
વાક્ત્વં ભવચ્ચરિતચર્વણવિભ્રમેષુ ।
ત્વત્સઙ્કથાશ્રવણકર્મણિ કર્ણભાવ-

મિચ્છન્તિ ગન્તુમપરાણિ (ઇતરાણિ)મમેન્દ્રિયાણિ ॥ ૨૭॥

યચ્છત્રચામરસિતા કૃતિનાં વિભૂતિઃ
સઃ સ્વલ્પ એવ ભગવન્ ભવતઃ પ્રસાદઃ ।
ત્વત્સામ્યમેવ (તત્સામ્યં)તુ સતામધિકસ્તતોઽપિ
યદ્વલ્કલં ચ વસનં વિપિનં ચ વાસઃ ॥ ૨૮॥

ત્વત્પાદપઙ્કજરજશ્છુરિતૌ ચ પાણી
વાણી ભવચ્ચરિતચર્વણગર્વિતા ચ ।
ચિત્તં ભવદ્ગુણગણસ્મરણવ્રતં ચ
ભૂયો ભવન્તિ મમ ચેદહહાસ્મિ ધન્યઃ ॥ ૨૯॥

ભિક્ષાશનોઽપિ ભગવંસ્ત્વમકિઞ્ચનોઽપિ
જીર્ણશ્મશાનનિલયોઽપિ દિગમ્બરોઽપિ ।
કિં વા પરં વરદ ઘસ્મર ભસ્મરૂક્ષ-
ગાત્રોઽપિ સન્મમ વિભુઃ પ્રતિજન્મ ભૂયાઃ ॥ ૩૦॥

યાચે ન કિઞ્ચિદપરં વસતિર્ગિરીન્દ્રે
કૈલાસનામ્નિ ભવદધ્યુષિતે મમાસ્તુ ।
કિં વા ન તત્ર ભગવન્ મમ યે સખાય-
સ્તેઽન્યેઽપિ સન્તિ ગવયાઃ કપયઃ કુરઙ્ગાઃ ॥ ૩૧॥

વાચામમી ન વિષયે વિષયેષુ યેષુ
તૃષ્ણાઽન્વભાવિ વિષમા વિષમાકિરન્તી ।
તન્માં ભજોજ્જ્વલવિલોલવિલોચનાન્ત-
વિન્યાસભાસુરસુધારસુધારસેન ॥ ૩૨॥

નાનુગ્રહસ્તવ વિના ત્વયિ ભક્તિયોગં
નાનુગ્રહં તવ વિના ત્વયિ ભક્તિયોગઃ ।
બીજપ્રરોહવદસાવનયોર્ન કસ્ય
ભૂત્યૈ પરસ્પરનિમિત્તનિમિત્તિભાવઃ ॥ ૩૩॥

શાન્તં મનો યદિ યમૈર્નિયમૈઃ કિમન્યૈ-
ર્વાણી યદિ પ્રિયહિતા સ્તુતિચાટુભિઃ કિમ્ ।
કારુણ્યમસ્તિ યદિ કિં વ્રતહોમદાનૈ-
ર્ભક્તિર્ભવે યદિ કિમન્યસુખાભિલાષૈઃ ॥ ૩૪॥

ભુક્તં વિકલ્પકવલૈઃ સુરલોકસૌખ્ય-
માલોકિતા વિવિધશાસ્ત્રદૃશૈવ મુક્તિઃ ।
પીતા સુધા શ્રવણશુક્તિપુટૈઃ સમક્ષ-
માસ્વાદિતા પુનરિયં શિવભક્તિરેવ ॥ ૩૫॥

દીર્ઘાણ્યઘાન્યધિશુચીવ ભવન્ત્યહાનિ
હાનિર્બલસ્ય શરદીવ નદીજલસ્ય ।
દુઃખાન્યસત્પરિભવા ઇવ દુઃસહાનિ
હા નિઃસહોઽસ્મિ કુરુ નિઃશરણેઽનુકમ્પામ્ ॥ ૩૬॥

નિર્ભર્ત્સિતો વિપદિ બન્ધુરિવાઽભિમાની
મા નીરસં સ્પૃશતુ નામ મનો વિવેકઃ ।
વિદ્ધાં નિદાઘ ઇવ ઘર્મરુચિર્હિમાની-
માનીયનાશમુપતાપયતે તુ મોહઃ ॥ ૩૭॥

તસ્માદુપૈતિ ન તનુસ્તરસાઽવસાયં
સાયન્તની પ્રતિપદિન્દુકલેવ યાવત્ ।
તાવત્કૃપાં કુરુ હતોઽસ્મ્યહમંહસાઽયં
સા યન્ત્રિતા મયિ તવાસ્તનયેન યેન ॥ ૩૮॥

અભ્યેતિ મૃત્યુભટસંહતિરસ્તકમ્પા
કમ્પામહે મનસિ યાં વિનિવેશયન્તઃ ।
એકા ગતિર્ગિરિશ તત્ર તવાનુકમ્પા
કમ્પાત્રતાં નયતિ યા ન શુભોદયાનામ્ ॥ ૩૯॥

યન્નિઃસ્પૃહોપ્યજનયસ્તનયં કુમારં
મારં વિધાય શલભં નયનાનલસ્ય ।
તત્તે પરાર્થમિતિ વિશ્રુતમાકુમારં
મા રંહસા જહિહિ દેહિ તદેહિ વાચમ્ ॥ ૪૦॥

સર્વસ્વમેવ મમ દત્તમહાપ્રહારા
હારામલં હર હરન્ત્યરયો વિવેકમ્ ।
રક્ષાકરી તવ કૃપાઽત્ર કૃતાઽવહારા
હા રાજશેખરમણેઃ પુરતો હતોઽહમ્ ॥ ૪૧॥

દેવાલયે વસતિમર્થયતે કપોતઃ
સિન્ધૌ વણિગ્ભજતિ વૃત્તિમશઙ્કુપોતઃ ।

પૃષ્ઠે શ્રિયં વહતિ નિત્યમનેકપોઽત-
સ્ત્વદ્ભક્તિમેમિ સરસીમિવ ભેકપોતઃ ॥ ૪૨॥

લબ્ધા ધૃતિર્દિવિ કદાચન વાસવેન
સૈન્યેન સા પરિવૃતેન ન વાસવેન ।
નો વા બલેન ભુવિ પીતનવાસવેન
ત્વાં ભેજુષો ભવતિ યાઽભિનવા સવેન ॥ ૪૩॥

યા દુર્લભા દિવિ મહર્ષભયાન કસ્ય
કાલસ્ય યા નિધનધામ ભયાનકસ્ય ।
વાચા તયા કૃતનતેરભયાનકસ્ય
તુલ્યશ્રિયાઽર્પયસિ શં શુભયા ન કસ્ય ॥ ૪૪॥

યં વીક્ષસે ક્ષતમહાકલિકાલ સન્તં
ક્લિષ્ટં કૃતીકૃતબૃહત્કલિકાલ સન્તમ્ ।
ઇન્દોરિવાઽમૃતમયી કલિકા લસન્તં
બાલાઽવલોકયતિ સોત્કલિકાલસં તમ્ ॥ ૪૫॥

મુક્તાવલીવ રહિતા શિવ નાયકેન
મુક્તા ભવદ્ગુણસભેવ વિનાયકેન ।
વાણી ત્વયા પરિહૃતાઽખિલનાયકેન
સમ્ભાવ્યતે હૃદયસંવનનાય કેન ॥ ૪૬॥

યસ્યોચિતઃ પ્રથિતમાન સમાધિનાન્ત-
સ્તેનાર્તિમુદ્વહતિ માનસમાધિનાન્તઃ ।
શુદ્ધાં મતિં સ્પૃશતિ પાંસુલભાવલેપ-
સ્તત્રાપ્યુપૈષિ ન કૃપાં સુલભાવલેપઃ ॥ ૪૭॥

કામં ભવેઽત્ર બહવઃ સુભગસ્વભાવા
ભાવા ભવન્તુ મમ તુ દ્વિતયં સ્પૃહાયૈ ।
શબ્દાર્થપાકરુચિરા કવિરાજગીર્વા
ગીર્વાણસિન્ધુધરભક્તિરભઙ્ગુરા વા ॥ ૪૮॥

જ્યોત્સ્નાછટાભિરિવ દેવ ચકોરકસ્ય
ભાસ્વત્પ્રભાભિરિવ પઙ્કજકોરકસ્ય ।
દૈવીભિરદ્ભિરિવ બર્હિકિશોરકસ્ય
પ્રીતિર્ન તે નુતિકથાભિરઘોર કસ્ય ॥ ૪૯॥

વૃત્તં ક્વ તે સકલવાઙ્મનસાતિવૃત્તં
ચેતઃ સ્ખલદ્ગતિ ભવાવરણાત્ક્વ ચેતઃ ।
વિત્રાસવન્તમિતિ મામનુદત્પવિત્રા
ભક્તિઃ સ્તુતિસ્તવ કૃતેયમતઃ સુભક્તિઃ ॥ ૫૦॥

વન્દામહે ચ વિવિધં વિવદામહે ચ
લજ્જામહે ચ કલુષાણિ ભજામહે ચ ।
ઈહામહે ચ કુવચાંસિ સહામહે ચ
દહ્યામહે ચ દુરિતૈર્જઠરસ્ય હેતોઃ ॥ ૫૧॥

લબ્ધં ચિરેણ સુકૃતૈરચિરસ્થિરં ચ
માનુષ્યકં પુનરિદં સુલભં ચ ચેતિ ।
જાનીમ એવ ચ ન ચ સ્વહિતં વિધાતુ-
મીહામહે વયમહો બત યદ્ભવિષ્યાઃ ॥ ૫૨॥

તસ્માદવશ્યમવશાનવિશઙ્કમેવ
ભોગોપભોગરસિકાનસમાપ્તકૃત્યાન્ ।
યાવન્ન ધીવર ઇવૈત્ય તિમીનકસ્મા-
ન્મૃત્યુઃ ક્ષણાદશરણાન્ હરતે હઠેન ॥ ૫૩॥

તાવત્પ્રસીદ કુરુ નઃ કરુણામમન્દ-
માક્રન્દમિન્દુધર મર્ષય મા વિહાસીઃ ।
બ્રૂહિ ત્વમેવ ભગવન્ કરુણાર્ણવેન
ત્યક્તાસ્ત્વયા કમપરં શરણં વ્રજામઃ ॥ ૫૪॥

જાતસ્ય મૃત્યુરિતિ ચેત્સ ન લઙ્ઘિતઃ કિં
શ્વેતેન શીતકરશેખરનન્દિના ચ ।
તાભ્યામસૌ યદિ જિતો વિપુલૈસ્તપોભિ-
રસ્માકમલ્પતપસાં ત્વનિવાર્ય એવ ॥ ૫૫॥

તર્હ્યર્ચનાન્તસમયે તવ પાદપીઠ-
માલિઙ્ગ્ય નિર્ભરમભઙ્ગુરભક્તિભાજઃ ।
નિદ્રાનિભેન વિનિમીલિતલોચનસ્ય
પ્રાણાઃ પ્રયાન્તુ મમ નાથ તવ પ્રસાદાત્ ॥ ૫૬॥

એતેન કિં નિવિડબન્ધભૃતો ભુજઙ્ગાઃ

કિં વા ન વક્રિમવિલાસવિકાસભાજઃ ।
કિન્તુ ક્રમાદપચિતાઃ પદગુમ્ફહીનાઃ
સૂક્તામૃતાનુકરણે કથમુત્સહન્તે ॥ ૫૭॥

તસ્માદ્ભયઙ્કરમદઃ ફણિકર્ણપૂર-
હેવાકદુર્લલિતમસ્તનયં વિહાય ।
સ્વામિન્નિમાઃ શ્રવણયોઃ પ્રણયોપચાર-
ગર્ભા ગિરશ્ચતુરમાભરણીકુરુષ્વ ॥ ૫૮॥

સ્વામિન્નબન્ધવતયા વત યા તવેયં
વાણી મયા નિજગદે જગદેકબન્ધોઃ ।
તામન્તકાન્તકર શઙ્કર શંસતો મે
કર્ણે કુરુષ્વ કરુણાં કરુણામ્બુરાશે ॥ ૫૯॥

પશ્યન્તમન્ધમભિમાનિનમસ્તમાનં
વિસ્તીર્ણકર્ણમપિ યા બધિરં કરોતિ ।
સાઽઽર્ત્તિર્ન નર્તયતિ કિં કુનૃણામિવ શ્રીઃ
તસ્માત્ક્ષમસ્વ ભગવન્નતિલઙ્ઘનાનિ ॥ ૬૦॥

ઉચ્છૃઙ્ખલં ખલમલઙ્ઘ્યબલં જ્વલન્ત-
મન્તઃ કૃતાન્તમવિકલ્પમનલ્પદર્પમ્ ।
આશઙ્ક્ય શઙ્કરચરિત્રપવિત્રચિત્ર-
સૂક્તિષ્વપિ સ્થિરરુષં પ્રતિબોધયામઃ ॥ ૬૧॥

પ્રત્યગ્રકર્કશમશલ્કમુદર્કપથ્યં
તથ્યં સતોષમપદોષમરોષપોષમ્ ।
સન્ધિત્સવસ્તવ કૃતાન્તહિતં મિતં ચ
યદ્બ્રૂમહે તદવધારય સાવધાનઃ ॥ ૬૨॥

અન્યત્ર દર્શય નિરઙ્કુશ હુઙ્કૃતાનિ
કીનાશ નાશય દુરાશય માઽભિમાનમ્ ।
નાથીકૃતેન્દુમુકુટાનપિ નામ મન્યે
નિર્ભર્ત્સયિષ્યસિ હતૈવ તવેયમાશા ॥ ૬૩॥

યેનેશ્વરેણ મહતા વિહિતાગસસ્તે
કૃત્વાઽપિ શાસનમકારિ પુનઃ પ્રસાદઃ ।
તત્સેવકા વયમતસ્તવ વિદ્વિષોઽપિ

યદ્બ્રૂમહે હિતમદો મનુષે રુષેતિ ॥ ૬૪॥

રે દુર્વિનીત ખલ કાલ પુરા પુરારે-
ર્યામાસ્રવાનસિ નિજાવિનયપ્રશાસ્તિમ્ ।
શ્રુત્વૈવ તાં ધૃતિમતામપિ કમ્પમેતિ
ચેતઃ કથં પુનરુપક્રમસે તદેવ ॥ ૬૫॥

પાણૌ નિધેહિ પવનાશનપાશમાશુ
નાસ્તીહ તે પુરુષપાશ રુષોઽવકાશઃ ।
નિઃસઙ્કુરેષુ શરણીકૃતશઙ્કુરેષુ
રે કાલ કાતરભયઙ્કુર કિં કરોષિ ॥ ૬૬॥

વ્યાપારય સ્વપુરુષં પુરુષં પરેષુ
મા રોષમઙ્કુરય શઙ્કુરકિઙ્કુરાણામ્ ।
કિં વિસ્મૃતં વિષધરાયુધ નિર્નિરોધ-
ક્રોધપ્રબોધપટહં હરહુઙ્કૃતં તે (તત્)॥ ૬૭॥

કીનાશ બાલિશ નિરઙ્કુશ નિર્વિમર્શ
નિસ્ત્રિંશ નિષ્કરુણ નિઃશરણેષુ ચેત્ત્વમ્ ।
નિષ્કારણં નિરનુરોધ કરોષિ રોષં
તત્કિં ચિકીર્ષસિ મહેશ્વરસંશ્રિતેષુ ॥ ૬૮॥

કુર્વન્ વિરોધમનિરોધમબાન્ધવેષુ
ધત્સે મુધા યમ સમુદ્ધતકન્ધરત્વમ્ ।
તીવ્રાઽપરાધવિધુરેષ્વપિ સાધવો હિ
બાધાં વિધાતુમધમેષ્વપિ ન ક્ષમન્તે ॥ ૬૯॥

યત્પ્રાણિષુ પ્રભવસિ પ્રસભં પ્રહર્તું
પ્રાપ્ય પ્રભોઃ પ્રમથનાથપિતુઃ પ્રસાદમ્ ।
તત્પ્રાક્કૃતસ્ય દુરિતસ્ય દુરુત્તરસ્ય
તેષાં ફલં તવ કિમન્તક પૌરુષં તત્ ॥ ૭૦॥

તત્તથ્યમેવ કિમકારણકણ્ટકં ત્વાં
યદ્ધર્મરાજ ઇતિ કાલ જનાઃ સ્તુવન્તિ ।
લોકા ન કિં જગદમઙ્ગલમૂલકોષં
શંસન્તિ મઙ્ગલવિહઙ્ગમ ઇત્યુલૂકમ્ ॥ ૭૧॥

ત્વાં જીવિતેશ ઇતિ યત્સ્તુવતે રુદત્યઃ
કાપાલિકાઃ શવદહો ગુરવો દ્વિજાશ્ચ ।
તદ્યુક્તમન્તક યતઃ પરમઃ સુહૃત્ત્વં
તેષામકારણરિપુસ્ત્વસુહૃત્પરેષામ્ ॥ ૭૨॥

ક્લિશ્યન્ત્યવશ્યમપમાર્જનભૂતયાગ-
નિર્યાણકર્મચરમેષ્ટિશિવક્રિયાદ્યૈઃ ।
યે દૈશિકાઃ પરમકારુણિકાઃ પરાર્થે
ત્વાં શ્રાદ્ધદેવ ઇતિ તે રવિજ સ્તુવન્તિ ॥ ૭૩॥

દેશં ન યત્ત્યજતિ સન્તમસન્તમન્તં
ધ્વાન્તં નયંસ્તવ પિતા સમવર્ત્યતોઽર્કઃ ।
ત્વં સત્સ્વસત્સ્વપિ સમં પ્રહરસ્યતોઽપિ
સદ્યઃ સ્તુવન્તિ સમવર્ત્તિનમન્તક ત્વામ્ ॥ ૭૪॥

કોપં વિધાય તવ યેન કૃતઃ પ્રસાદ-
સ્તત્સેવકેષ્વપિ ચિકીર્ષસિ યત્પ્રસાદમ્ ।
કિં તત્ર વર્તયસિ માં સમવર્ત્યતોઽપિ
ત્વં સ્તૂયસે વિષમવર્ત્યપિ મર્મવિદ્ભિઃ ॥ ૭૫॥

ભાલસ્થલાનિ કલયસ્યમલેન્દુમૌલિ-
પાદારવિન્દમકરન્દસિતાનિ યેષામ્ ।
ત્વં માનવાનસિ વિમાનય મા નયઞ્ન
તન્માનવાનવસિ રૌદ્ર યદિ સ્વમૌદ્રમ્ ॥ ૭૬॥

દુર્વૃત્તદર્પશમનાચ્છમનોઽસિ યત્ત્વં
યદ્વા યમોઽસ્યધમસંયમનાત્તદન્યત્ ।
મન્યે મદં શમયિતું પ્રભવસ્તવૈવ
ત્વામેવ વા યમયિતું ભવભક્તિભાજઃ ॥ ૭૭॥

ઉદ્વૃત્તમન્તક નૃશંસ ભૃશં સગર્વ
શર્વસ્તવવ્યવસિતેષ્વપિ ચેષ્ટસે યત્ ।
તદ્ભાવિ ભાવિભવભૈરવભૈરવોગ્ર-
ભાલાનલોદ્ભવપરાભવકૃત્પુનસ્તે ॥ ૭૮॥

કિં વાઽન્યદર્કજ વિશઙ્કુ વિશઙ્કુટાસ્ય
હાસ્યં ચિકીર્ષસિ યદીશ્વરસંશ્રયાણામ્ ।

તન્મા કૃથા ન હિ તવાશ્રિતવત્સલોઽસૌ
સાનુગ્રહોપ્યનુચિતં ક્ષમતે મહેશઃ ॥ ૭૯॥

ભાલસ્થલીવ તિલકેન વધૂકટાક્ષ-
વિક્ષોભિતેન તિલકેન વનાવલીવ ।
વિજ્ઞમિરેણતિલકેન વિભાવરીવ
શોભાં વસન્તતિલકેન બિભર્ત્તિ શમ્ભોઃ ॥ ૮૦॥

વાસઃ ક્ષીણદશં વયશ્ચ કરણગ્રામં મનશ્ચાઽક્ષમં
નિઃસારેષુ દુરીશ્વરેષ્વપચિતેરુદ્વેગમઙ્ગેષ્વપિ ।
વ્યર્થં વેશ્મ નૃજન્મ ચાખિલમિદં કલ્યાણશૂન્યં વપુઃ
કોષં ચોદ્વહતઃ કુરુષ્વ કરુણાં ચિત્તે ગિરં ચ શ્રુતૌ ॥ ૮૧॥

અજ્ઞસ્તાવદહં ન મન્દધિષણઃ કર્તું મનોહારિણી-
શ્ચાટૂક્તીઃ પ્રભવામિ યામિ ભવતો યાભિઃ કૃપાપાત્રતામ્ ।
આર્તેનાઽશરણેન કિં તુ કૃપણેનાક્રન્દિતં કર્ણયોઃ
કૃત્વા સત્વરમેહિ દેહિ ચરણં મૂર્ધન્યધન્યસ્ય મે ॥ ૮૨॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“કૃપણાક્રન્દનં” નામ નવમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૦. કરુણાક્રન્દનં દશમં સ્તોત્રમ્

જયતિ ચિત્તચકોરકચન્દ્રિકા
સુકૃતિનાં વદનાબ્જરવિચ્છવિઃ ।
શ્રવણબર્હિણવર્ષણવર્તની
હરિણકેતુકલામુકુટસ્તુતિઃ ॥ ૧॥

જયતિ ભક્તિલતાનવમાધવઃ
સુકૃતપાદપપક્વફલોદ્ભવઃ ।
વિપદુપદ્રવવિક્લવબાન્ધવઃ
સુકવિસૂક્તિવધૂવદનાસવઃ ॥ ૨॥

ભવમહાર્ણવનિસ્તરણપ્લવઃ
પ્રવરસૂરિમયૂરઘનારવઃ ।

હૃદયદાહહૃતાવમૃતદ્રવઃ
કુમુદિનીરમણાભરણસ્તવઃ ॥ ૩॥

મધુરમિન્દુમુખીવદનાદપિ
ક્લમહરં સુરસિન્ધુજલાદપિ ।
ત્રિભુવનાધિપતિસ્તુતિપાવનં
જયતિ સત્કવિસૂક્તિરસાયનમ્ ॥ ૪॥

નવનવભ્રમરસ્વનશોભિની
ભવમરુભ્રમઘર્મશમક્ષમા ।
હૃદયનન્દનચન્દનકન્દલી
જયતિ શઙ્કરભક્તિરભઙ્ગુરા ॥ ૫॥

અથ કથઞ્ચન રૂઢમપિ ક્ષણં
મનસિ વીક્ષ્ય વિવેકનવાઙ્કુરમ્ ।
બહુવિધવ્યસનૌઘવિઘટ્ટિતં
સપદિ વિજ્ઞપયામિ જગદ્ગુરુમ્ ॥ ૬॥

અપિ જગદ્વિદિતઃ કરુણાપરઃ
પરહિતાઽઽહિતમૂર્ત્તિપરિગ્રહઃ ।
કિમિતિ હંસિ ન હંસ હૃદમ્બુજે
કૃતપદો વિપદઃ શરણાર્થિનામ્ ॥ ૭॥

યદિ ભવાન્ વિદધીત હૃદિ સ્થિતિં
વ્યસનસમ્પદસૌ પ્રસરેત્કથમ્ ।
યદિ ન સા પ્રસરેત્પ્રસજેત્કથં
બુધજનોઽપ્યસમઞ્જસકર્મ્મસુ ॥ ૮॥

ઇહ બૃહદ્ભિરુદગ્રપરિગ્રહ-
ગ્રહગૃહીતમતિર્વ્યસનોદ્ગમૈઃ ।
યદિ ન કાતરતાં પરતન્ત્રતા-
મફલતાં ખલતાં ચ ભજેજ્જનઃ ॥ ૯॥

યદિ ભજેત ન સજ્જનસઙ્ગમ-
વ્યસનસર્પદનલ્પકૃપાસ્પદમ્ ।
હૃદયમિન્દુમયૂખસુખાહતિ-
વ્યતિકરદ્રુતચન્દ્રમણિશ્રિયમ્ ॥ ૧૦॥

અભિલષેયુરનર્ગલદુર્ગતિ-
પ્રસરદીર્ઘનિદાઘનિપીડિતાઃ ।
યદિ ઘનાગમવન્ન ઘનાગમં
પ્રણયિનસ્તૃષિતા હરિણા ઇવ ॥ ૧૧॥

યદિ ન પીનઘનસ્તનભઙ્ગુર-
ત્રિવલિભઙ્ગિતરઙ્ગિતમધ્યમાઃ ।
ઇહ હરેયુરપાઙ્ગવિલોકિતૈર્ધૃત-
રતિપ્રમદાઃ પ્રમદા મનઃ ॥ ૧૨॥

બલવદિન્દ્રિયતસ્કરસઙ્કુલે
વિષયભીમભુજઙ્ગમભીષણે ।
દુરિતદીર્ઘદવાનલદુઃસહે
બહલમોહતમોહતસંવિદિ ॥ ૧૩॥

કૃતધિયોઽપિ ભવાધ્વનિ ધાવતઃ
પ્રબલકર્મરયાપહૃતાત્મનઃ ।
અવસરે પ્રહરેયુરમી ન ચે-
ન્મદન માનમુખાઃ પરિપન્થિનઃ ॥ ૧૪॥

ઉપચિતોઽભિનવામ્રદલાવલી
કવલનાકુલકોકિલકૂજિતૈઃ ।
યદિ ન તર્જયિતું પ્રભવેન્મધૌ
મદનદિગ્વિજયોદ્યમડિણ્ડિમઃ ॥ ૧૫॥

યદિ મધૌ મધુપાનમદોન્મદ
ભ્રમરગાયનગુઞ્જિતગીતયઃ ।
સુખલવાનુભવાય કૃતસ્પૃહં
હર હરેયુરિમં ન મનોમૃગમ્ ॥ ૧૬॥

અભિનવસ્તવકસ્તનસન્નતાઃ
પવનનર્તિતપલ્લવપાણયઃ ।
યદિ ન બન્ધનિબન્ધનમૃદ્ધયુ-
ર્મધુપગુઞ્જિતમઞ્જુગિરો લતાઃ ॥ ૧૭॥

યદિ શુચૌ મનસીવ ન માનિનાં

ઘનમનેહસિ તાપમુપાવહેત્ ।
સરજસો હરિતસ્તરુણૈઃ કરૈ-
રવિરલં પરિરિપ્સુરહર્પતિઃ ॥ ૧૮॥

પૃથુલસજ્જઘનોરુપયોધરા
ગુરુમરુચ્ચપલાકુલિતામ્બરાઃ ।
યદિ ભવેયુરિમા ન ઘનાગમે
મૃગદૃશશ્ચ દિશશ્ચ ધૃતિચ્છિદઃ ॥ ૧૯॥

સુરભિગન્ધિસહાસમુખામ્બુજા
ધૃતમનોહરહંસકવિભ્રમાઃ ।
યદિ ન મજ્જનધામ નતભ્રુવઃ
શરદિ સંસ્મરયેયુરગાપગાઃ ॥ ૨૦॥

યદિ ન દીર્ઘતમાઃ સમવાપ્નુયુઃ
સહસિ દુર્વિષહોલ્બણવાયવઃ ।
ધૃતઘનોષ્મબૃહત્તરુણીસ્તન-
સ્મરણકારણતામપિ રાત્રયઃ ॥ ૨૧॥

યદિ ભવેન્ન ઘનાવરણોદ્ગમ-
ગ્લપિતધામનિ ઘમનિધૌ બહિઃ ।
તપસિ ચેતસિ ચ વ્યસનાકુલે
તપસિ રૂઢરસોઽપ્યલસો જનઃ ॥ ૨૨॥

તદખિલાપદુપોદ્ધરણક્ષમં
સમધિગમ્ય દુરાપમિદં પુનઃ ।
પવનવેલ્લિતબાલમૃણાલિની-
દલચલજ્જલબિન્દુનિભં વપુઃ ॥ ૨૩॥

ભવ ભવત્પદપઙ્કજપૂજન-
વ્યસનસૌમનસીમપહાય કઃ ।
ઇહ સહેત વિભૂતિલવોન્મિષ-
ન્મદકદર્યવિકારકદર્થનામ્ ॥ ૨૪॥

ઇદમુદઞ્ચતિ મેઘમયં મહત્
પિહિતભાસ્વદમન્દમહસ્તમઃ ।
ઘનબલોઽપિ સ કાલ ઉપસ્થિત-

સ્તદિહ હંસ પદં કુરુ માનસે ॥ ૨૫॥

ઇતિ યદન્તરનન્ત તિરોદધન્
મુદમુદઞ્ચતિ મોહમહાતમઃ ।
તવ રવીન્દુહુતાશનચક્ષુષો
હૃદિ નિવેદયતીદમસન્નિધિમ્ ॥ ૨૬॥

ન હિ મહેશ મનસ્ત્વદધિષ્ઠિતં
ભ્રમયિતું પ્રભવન્તિ ભવોર્મયઃ ।
ન હિ વનં હરિણાધિપરક્ષિતં
ક્ષપયિતું કપયઃ ક્વચન ક્ષમાઃ ॥ ૨૭॥

વરમરણ્યસરિત્પુલિનસ્થલી-
તરુતલે ફલમૂલજલાશિનઃ ।
સ્થિતિરનર્ગલવલ્કલવાસસો
ન શિવભક્તિમૃતે ત્રિદશેન્દ્રતા ॥

ભવતિ પશ્યતિ નશ્યતિ દુર્ગતિઃ
સ્ફુરતિ શક્તિરુપૈતિ ધૃતિં મતિઃ ।
સ્તુતિકૃતિ પ્રતિપત્તિમતિ શ્રુતિસ્મૃતિ-
ભૃતિ સ્થિતિમેતિ ચ નિર્વૃતિઃ ॥ ૨૮॥

કતિ ન બુદ્બુદવદ્ભવવારિધા-
વિહ લસન્તિ ગલન્તિ ચ જન્તવઃ ।
સમજનિ સ્પૃહણીયજનિઃ પુન-
ર્જગતિ કશ્ચન યઃ શિવસેવકઃ ॥ ૨૯॥

સપદિ પીઠવિલોઠિતમૂર્તિભિ-
ર્ભગવતઃ શુચિભિર્ધૃતભક્તિભિઃ ।
ચરણરેણુકણૈરિવ માદૃશૈ-
ર્દિવિષદામપિ મૂર્ધ્નિ પદં કૃતમ્ ॥ ૩૦॥

નિપતતાં વિષમે વિપદમ્બુધૌ
યદવલમ્બનમસ્તવિડમ્બનમ્ ।
જગદમઙ્ગલભઙ્ગવિધાયિ ત-
જ્જયતિ રત્નમહો શિવસેવનમ્ ॥ ૩૧॥

જયતિ જન્મજરામરણવ્યથા-
શમસમર્થમનર્થ નિવર્હણમ્ ।
સકલમઙ્ગલધામ સુધામયં
ભગવદર્ચનનામ મહૌષધમ્ ॥ ૩૨॥

ઇદમસાધિતમેવ રસાયનં
નિરુપભોગમિદં સુખમક્ષયમ્ ।
અમૃતમેતદનમ્બુધિમન્થનં
યદવિનશ્વરમીશ્વરસેવનમ્ ॥ ૩૩॥

કિમફલૈરપરૈર્ભવશમ્બરૈઃ
કરિતુરઙ્ગરથામ્બરડમ્બરૈઃ ।
ભગવદઙ્ઘ્રિસરોરુહસેવન-
વ્યસનમસ્તુ મમાનિધનં ધનમ્ ॥ ૩૪॥

વહતુ સા રમણી રમણીયતા-
મમૃતમસ્ત્વમૃતં મધુ વા મધુ ।
ભવતુ નિર્વૃતિધમ તુ યામિની-
રમણમણ્ડનસેવનમેવ નઃ ॥ ૩૫॥

અહમહર્નિશમેકમના મના-
ગુપરમન્મદમન્મથમત્સરઃ ।
ભગવતીરવગત્ય દુરત્યયાઃ
શરધરાભરણં શરણં શ્રયે ॥ ૩૬॥

ઇદમહ કરુણામૃતસાગરં
શશિકિશોરશિરોમણિમર્થયે ।
વ્રજતુ જન્મનિ જન્મનિ મે વપુ-
ર્ભવદુપાસનસાધનતામિતિ ॥ ૩૭॥

કમપિ નામ નિકામમનોહરં
વહતિ ટઙ્કમનઙ્કુશમેવ યત્ ।
તદકલઙ્કમલઙ્કરણં મુખે
ભવતુ મે શિવનામ નિરામયમ્ ॥ ૩૮॥

હૃદય ભાવય ભાવમનાવિલં
નિરવધાન બધાન દૃઢાં ધૃતિમ્ ।

ત્વમસમર્થ સમર્થયસે સુખં
કિમવિનાશિ વિના શિવસેવનમ્ ॥ ૩૯॥

ભવરસં પ્રતિ સમ્પ્રતિ તૃષ્ણયા
ત્યજસિ માનસ માનસમુન્નતિમ્ ।
મદનશાસનશાસનતઃ પરં
કમનપાયમુપાયમુદીક્ષસે ॥ ૪૦॥

ઉપવને પવનેરિતમાધવી-
ધવલિતે વલિતે તરુપઙ્ક્તિભિઃ ।
અમલકોમલકોષનિષણ્ણષટ્-
ચરણપારણપાવનપઙ્કજે ॥ ૪૧॥

સમદને મદનેન વશીકૃતા
વરવધૂરવધૂય ભજ પ્રભુમ્ ।
અશરણોદ્ધરણોદ્ધતધીઃ શુચા-
મુપરમં પરમં સ કરોતિ તે ॥ ૪૨॥

જહિહિ મોહમુપેહિ નિજાં સ્થિતિં
ત્યજ શુચં ભજ માનપરિગ્રહમ્ ।
અહરહર્હરપાદસરોરુહ-
સ્મૃતિરસાયનપાનપરં ભવ ॥ ૪૩॥

તદસમઞ્જસમઙ્ગ યદઙ્ગના-
નયનચાપલશાપમુપેયતામ્ ।
નયસિ નિત્યબહિર્મુખ શઙ્કર-
સ્મરણસૌમનસીમપિ હેયતામ્ ॥ ૪૪॥

યદિ સમર્થયસે દુરતિક્રમં
કુપિતકાલભટભ્રુકુટીભયમ્ ।
તદચિકિત્સ્યભવામયભેષજં
ભજ ભુજઙ્ગમભૂષણતોષણમ્ ॥ ૪૫॥

યદિ ચિકીર્ષસિ સૌહૃદમાત્મનઃ
પરિજિહીર્ષસિ યદ્યઘબન્ધનમ્ ।
યદિ તિતીર્ષસિ સંસૃતિસાગરં
શ્રયમયસ્કરમીશ્વરસેવનમ્ ॥ ૪૬॥

યદિ વરાક સુકર્મવિપાકતઃ
કરતલે પતિતસ્તવ શેવધિઃ ।
તમખિલાપદપાકરણક્ષમં
નયસિ મૂઢ નિરર્થકતાં કથમ્ ॥ ૪૭ ॥

અમલશીલકુલશ્રુતવિશ્રુતં
સદસદર્થવિચારવિશારદમ્ ।
પુરજિદર્ચનસૌખ્યપરાઙ્મુખં
નયસિ માનસ માનુષજન્મ યત્ ॥ ૪૮ ॥

ભ્રમદમન્થરમન્થરયાહતિ-
ધ્વનદમુદ્રસમુદ્રસમાનયા ।
શમિતશાપદશાપદમેહિ મે
હર ગિરા વિતરાવિતથં વરમ્ ॥ ૪૯ ॥

અનુગૃહાણ ગૃહાણ ઘૃણાર્ણવ
પ્રણયિનઃ પ્રણયાનુગુણં વચઃ ।
ઉપકુરુષ્વ કુરુષ્વ દૃઢં મના-
ગશરણોદ્ધરણપ્રવણં મનઃ ॥ ૫૦ ॥

પૃથુશિરસ્ત્રિદશાપગયા શ્રિતં
કરુણયા હૃદયં શિવયા વપુઃ ।
કથમતિપ્રમિતે ભગવન્ ધૃતિઃ
શ્રવણરન્ધ્રપદેઽપિ ન મે ગિરઃ ॥ ૫૧ ॥

ત્વદનુરાગભરેણ કદર્થિતા
ત્વદનુરઞ્જનકર્મણિ ચાક્ષમા ।
ઇતિ મતિર્મમ ચાટુપરાઙ્મુખી
હર કરોતિ નિજાર્તિનિવેદનમ્ ॥ ૫૨ ॥

પ્રિયતમોઽસિ મતેર્મમ સા પુન-
ર્ન ગુણવત્યપિ તે હૃદયઙ્ગમા ।
ઇતિ મહેશ ભવદ્વિરહાતુરા
ભજતિ કામપિ કામકદર્થનામ્ ॥ ૫૩ ॥

ભવ ભવત્પરિરમ્ભસુખોઽસ્તુ મા

ત્વદુપભોગવિધૌ તુ કથૈવ કા ।
તવ તુ દર્શનમાત્રકકાઙ્ક્ષિણીં
મમ મતિં કથમિત્થમુપેક્ષસે ॥ ૫૪॥

કુટિલતાં ન જગામ નિકામતો
ન સહજં મલિનત્વમુપેયુષી ।
વહસિ કિં ઘનરાગકદર્થિતાં
મમ મતિં પ્રતિ કર્કશમાશયમ્ ॥ ૫૫॥

અથ ગતા પરિણામદશામિતિ
ત્યજસિ ચેન્મમ મુગ્ધતમાં મતિમ્ ।
કિમપરં ઘનમોહવિમૂર્છિતા
પ્રથયતાં તવ નિર્દયતામિયમ્ ॥ ૫૬॥

ઇદમનઙ્ગજનઙ્ગમસઙ્ગમ-
ભ્રમદમન્દમલં ચપલં મનઃ ।
અમૃતકુમ્ભકર ધ્રુતરઙ્ગિણી-
ધર સુધાકરશેખર શોધય ॥ ૫૭॥

ભવ મરુભ્રમખેદકદર્થિતં
સુવિષમૈસ્તૃષિતં વિષયોષ્મભિઃ ।
મદયતે હૃદયં મમ નિર્ભરં
ભવ ભવચ્ચરણસ્મરણામૃતમ્ ॥ ૫૮॥

વિષયપન્નગપાશવશીકૃતં
ભવમહાર્ણવમગ્નમનીશ્વરમ્ ।
બહલમોહમહોપલપીડિતં
હર સમુદ્ધર માં શરણાગતમ્ ॥ ૫૯॥

યમભટૈર્હ્રિયમાણમયન્ત્રણૈ-
રશરણં શરણં ચરણૌ શ્રિતમ્ ।
ઘનઘૃણામૃતનિર્ભરયા દૃશા
મદનમર્દન મામવલોકય ॥ ૬૦॥

અભયઘોષમિષોન્મિષિતાઽમૃત-
દ્રવમબન્ધ્યધૃતસ્મિતચન્દ્રકમ્ ।
વદનચન્દ્રમસં તવ પશ્યતો

મમ કદા નુ તમઃ શમમેષ્યતિ ॥ ૬૧॥

પ્રબલતાપકદર્થિતવિગ્રહં
દ્વિજપતિં પરિપાલયિતું શિશુમ્ ।
વહસિ કિં ન વિભો હૃદયે દયાં
શિરસિ નિર્જરનિર્ઝરિણીમિવ ॥ ૬૨॥

પ્રણતતાપવિપક્ષપણક્ષમાં
દલિતસન્તતસન્તમસસ્થિતિમ્ ।
હૃદિ નિધેહિ દયામમૃતસ્રુતં
હરિણકેતુકલામિવ મૂર્ધનિ ॥ ૬૩॥

અભિમતાધિકસિદ્ધિવિધાયિનીં
ભવદવચ્છિદમવ્યભિચારિણીમ્ ।
વહ વિભો હૃદયે દયિતાં દયાં
વપુષિ ભૂધરરાજસુતામિવ ॥ ૬૪॥

ચિન્તામણિઃ સ્ફટિકજાતિરચેતનોઽપિ
કલ્પદ્રુમઃ કઠિનકાષ્ઠવિનિર્મિતોઽપિ ।
તિર્યગ્દશામપિ ગતા કિલ કામધેનુ-
ર્ભાગ્યૈરભીષ્ટફલદા કૃતિનાં ભવન્તિ ॥ ૬૫॥

ત્વં તુ પ્રભો ત્રિભુવનૈકમહેશ્વરોઽપિ
પર્યાપ્તશક્તિરપિ પૂર્ણકૃપાર્ણવોઽપિ ।
આક્રન્દતોઽપિ કરુણં વિધિવઞ્ચિતસ્ય
ત્યક્તાદરોસિ મમ દર્શનમાત્રકેઽપિ ॥ ૬૬॥

ચિરં દ્વારોપાન્તે સ્થિતમવસરોદ્વીક્ષણધિયા
તિરસ્કારઃ સોઢઃ કુપિતમુખરદ્વાઃસ્થવિહિતઃ ।
મુખં દીનં કૃત્વા વિભવલવગર્વાન્વિતદૃશાં
કદીશાનામગ્રે ક ઇવ ન વિસોઢઃ પરિભવઃ ॥ ૬૭॥

પરિમ્લાનો માનસ્તનુરપિ તનુસ્તામ્યતિતમાં
મનો મોહાવર્તે ભ્રમતિ ધૃતિરસ્તં વ્રજતિ ચ ।
કથાપિ ક્લેશાનામવતરતિ નોચ્છેદપદવીં
દવીયસ્યામસ્યાં ભવભુવિ મુધા ધાવતિ મતિઃ ॥ ૬૮॥

તદેવં દુર્વારવ્યસનશતસમ્પાતવિષમં
વિશન્નેષ સ્વામિન્નહહ સુમહન્મોહગહનમ્ ।
અવિન્દન્નાશ્વાસક્ષમમપરમાપન્નસુહૃદં
જનોઽવજ્ઞાપાત્રં ભવતિ કરુણાબ્ધેર્ન ભવતઃ ॥ ૬૯॥

કદર્યાણામગ્રે તરલનલિનીપલ્લવતલ-
પ્રલીનપ્રાલેયપ્રચલકમલામૂઢમનસામ્ ।
અદભ્રભ્રૂભઙ્ગપ્રભવમવમાનં હતધિયઃ
સહન્તે હન્તેહ દ્રવિણકણતૃષ્ણાન્વિતદૃશઃ ॥ ૭૦॥

અહં તુ પ્રત્યગ્રપ્રભુચરણરાજીવરજસા
પવિત્રં મૂર્ધાનં દધદધિકભક્તિગ્રહગુરુમ્ ।
ભ્રુકુંસત્વં બિભ્રત્પ્રમદભરસન્દર્ભરભસા-
દ્ભજેયં ભૂતેશભ્રુકુટિઘટનાભાજનભુવમ્ ॥ ૭૧॥

સુરસ્રોતઃસ્વત્યાસ્તટવિટપિપુષ્પૌઘસુરભૌ
ગિરિગ્રાવગ્રામસ્ખલનમુખરસ્રોતસિ જલે ।
શ્રમક્ષામૈરઙ્ગૈરગણિતભવક્લેશવિપદાં
કદા સ્યાન્નસ્તૃપ્તિર્હરચરણસેવાસુખરસૈઃ ॥ ૭૨॥

અમન્દાનન્દાનાં દલદલઘુસન્તાપવિપદાં
પદામ્ભોજદ્વન્દ્વં શિરસિ દધતામિન્દુશિરસઃ ।
કદા નઃ કાલિન્દીસલિલશબલૈરમ્બરસરિ-
ત્તરઙ્ગૈરઙ્ગારીભવતિ ભવબન્ધેન્ધનચયઃ ॥ ૭૩॥

સાન્દ્રાનન્દસ્તિમિતકરણઃ પુણ્યનૈપુણ્યભાગી
ભાગીરથ્યાસ્તટવિટપિનઃ ક્વાપિ મૂલે નિલીનઃ ।
સર્વાકારં ગિરિપતિસુતાકાન્તમેકં પ્રપન્નઃ
સ્વાત્મારામઃ શમસુખસુધાસ્વાદમભ્યેતિ ધન્યઃ ॥ ૭૪॥

અભિજનગુણખ્યાતિપ્રજ્ઞાભિમાનભરોદ્ધુરાં
ક ઇવ સદસિ પ્રહ્વીકર્તું ક્ષમેત (સહેત)શિરોધરામ્ ।
વિદધતિ મુહુર્હેલાખેલં ભવત્યવધીરણં
ભ્રમયિતુમમી યુક્તા ન સ્યુર્યદીન્દ્રિયવૈરિણઃ ॥ ૭૫॥

માનઃ કસ્ય ન વલ્લભઃ ખલમુખપ્રેક્ષિત્વદુઃસ્થા સ્થિતિઃ
કસ્ય પ્રીતિકરી ત્રપાભરનતં કસ્મૈ શિરો રોચતે ।

કિન્તુ સ્વામિનિ સાઽવલેપહૃદયે દાસીકૃતાઃ શત્રુભિઃ
ક્ષુદ્રાનઘૈતનેશ્વરાન્ધનમદક્ષીવાન્નિષેવામહે ॥ ૭૬॥

સ્તબ્ધા દ્વારિ યદાસ્મહે ક્ષિતિભુજાં નિર્ભર્ત્સિતા વેત્રિભિ-
ર્યદ્દ્રર્વાન્ધનરેન્દ્રવલ્લભદુરુદ્ગારૈર્વિદહ્યામહે ।
યન્મિથ્યાસ્તુતિપાતકૈર્ભગવતીં વાચં તિરસ્કુર્મહે
તત્સર્વં તવ વક્રવક્ત્રવલનામાત્રસ્ય વિસ્ફૂર્જિતમ્ ॥ ૭૭॥

દૃષ્ટ્વા પાટલગણ્ડલેખમરુણોદ્વાષ્પેક્ષણં પ્રસ્ફુરદ્-
બિમ્બોષ્ઠં પ્રથમાપરાધકુપિતં વક્ત્રં કુરઙ્ગીદૃશઃ ।
યત્સપ્રેમ સવિસ્મયં સવિનયં સાપત્રપં સસ્પૃહં
સત્રાસં ચ મનોઽભવત્તદધુના શ્રાન્તં ચ શાન્તં ચ નઃ ॥ ૭૮॥

યત્ખર્વીક્રિયતે સુખં વિષયજં ત્વદ્ભાવનાજન્મના
હ્લાદેન ક્ષણિકં સ્થિરેણ મહતા સ્વલ્પં કિમત્રાદ્ભુતમ્ ।
તચ્ચિત્રં ભવદુઃખજં ભવદનુધ્યાનપ્રમોદાશ્રુણા
વાષ્પામ્બુ ધ્રુવમધ્રુવેણ સુમહત્સૂક્ષ્મેણ યદ્ભિદ્યતે ॥ ૭૯॥

અજ્ઞાનાન્ધમબાન્ધવં કવલિતં રક્ષોભિરક્ષાભિધૈઃ
ક્ષિપ્તં મોહમહાન્ધકૂપકુહરે દુર્હૃદ્ભિરાભ્યન્તરૈઃ ।
ક્રન્દન્તં શરણાગતં ગતધૃતિં સર્વાપદામાસ્પદં
મા મા મુઞ્ચ મહેશ પેશલદૃશા સત્રાસપ્રાશ્વાસય ॥ ૮૦॥

યદ્વિશ્વોદ્ધરણક્ષમાઽપ્યશરણત્રાણૈકશીલાપિ તે
મામાર્ત્તં દૃગુપેક્ષતે સ મહિમા દુષ્ટસ્ય મે કર્મ્મણઃ ।
દેવ્યાં દિવ્યમૃતૈઃ પયોધરધૃતૈઃ પૃથ્વીં પૃણત્યાં (સ્તૃણન્ત્યામ્)કણા
દ્વિત્રાશ્ચેન્ન મુખે પતન્તિ શિખિનઃ કિં વાચ્યમેતદ્દિવઃ ॥ ૮૧॥

શુભ્રં બિભ્રત્તરુણકરુણાઽઽક્રાન્તમશ્રાન્તમન્તઃ
સ્વાન્તં શાન્તપ્રણતજનતાક્લેશલેશપ્રવેશમ્ ।
પ્રાણત્રાણપ્રણયકૃપણપ્રાકૃતપ્રાણિવર્ગ-
વ્યાપત્તાપક્ષપણનિપુણાં મુઞ્ચ ચણ્ડીશ વાણીમ્ ॥ ૮૨॥

અદભ્રશ્વભ્રેયં ભવસરણિરાતઙ્કબહુલા
ગલદ્બોધજ્યોત્સ્ના નિરવધિરસૌ મોહરજની (મોહજનની)।
નયન્ત્યેતે શાન્તિં વિષમવિષયોત્પાતમરુતઃ
પ્રદીપં પ્રજ્ઞાખ્યં પ્રતિદિશ દૃશં ક્લેશશમનીમ્ ॥ ૮૩॥

શરીરં નીરોગં નવમપિ વયઃ સંસ્કૃતિમતી
મતિર્વન્દ્યા જાતિઃ પ્રભુરપિ ભવાન્ ભક્તિસુલભઃ ।
ઇતીયં સામગ્રી સુકૃતશતલભ્યા વિઘટતે ન
યાવત્તાવન્મે શ ृણુ કરુણમાક્રન્દિતમિદમ્ ॥ ૮૪॥

જયન્તિ કૃતિનઃ કવેરમૃતસારસિક્તાક્ષરા
વિકસ્વરશરત્સુધાકરકરાનુકારિત્વિષઃ ।
પુરારિપદપઙ્કજસ્તવપવિત્રચિત્રક્રમાઃ
સમુન્મિષિતમાલતીમુકુલકોમલાઃ સૂક્તયઃ ॥ ૮૫॥

શિવસ્તવકૃતો મધૌ મલયવાયુવેલ્લલ્લતા-
ગલન્મધુમદોન્મદભ્રમરપુઞ્જગુઞ્જચ્છલાત્ ।
નદન્મદનશિઞ્જિનીઝણિતભીતસીમન્તિની-
ભુજાકલિતકન્ધરા અધિવસન્તિ લીલાવનમ્ ॥ ૮૬॥

અદૂરબહિરઙ્ગનોપવનજાતચૂતાવલી-
વિલીનકલકોકિલાકલિતકાકલીકૂજિતૈઃ ।
વલન્મલયમારુતપ્રચલદુલ્લસન્મલ્લિકા-
વિકાસિકુસુમસ્ખલદ્ભ્રમરમણ્ડલીગુઞ્જિતૈઃ ॥ ૮૭॥

નિગૂઢતિમિઘટ્ટનસ્ફુરિતદીર્ઘિકાસમ્ભ્રમ-
ત્રસત્કમલકોટરસ્થિતમરાલબાલસ્વનૈઃ ।
રટત્પટહઝલ્લરીમુરજતૂર્યભેરીગણ-
પ્રણાદમુખરીભવદ્ભવનબર્હિકેકારવૈઃ ॥ ૮૮॥

સુધામધુરવારુણીરસકષાયકણ્ઠોદ્ભવ-
ન્નવશ્રુતિરસાયનપ્રગુણગાયનીગીતકૈઃ ।
પ્રવીણપરિવાદકોદિતવિભાસરાગસ્વર-
ક્રમાનુગતવલ્લકીવિકચકીચકપ્રક્વણૈઃ ॥ ૮૯॥

પ્રભાતગુણવર્ણનપ્રવણબન્દિવૃન્દસ્તુતિ-
પ્રબુદ્ધશુકસારિકાકલહકેલિકોલાહલૈઃ ।
બહિર્વિહરદઙ્ગનારણિતરત્નકાઞ્ચીગુણ-
ક્વણત્કનકકિઙ્કિણીઝણઝણારવાડમ્બરૈઃ ॥ ૯૦॥

ખુરક્ષતવસુન્ધરોદ્ધુરતુરઙ્ગહેષોન્મિષ-

ત્પ્રબોધધુતકન્ધરદ્વિરદકણ્ઠઘણ્ટારવૈઃ ।
સ્મરાઽલસવિલાસિનીસ્તનભરોપરુદ્ધોરસ-
સ્ત્યજન્તિ શયનં શનૈરુષસિ શમ્ભુશંસાજુષઃ ॥ ૯૧॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“કરુણાક્રન્દનં” નામકં દશમં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૧. દીનાક્રન્દનં એકાદશં સ્તોત્રમ્

ધન્યોઽસ્મિ સમ્યગમૃતં કિમપિ સ્રવન્તી
સઞ્જીવનં ભગવતી વિદધાતિ યસ્ય ।
સ્નેહસ્નુતસ્તનયુગા જનનીવ જીવ-
રક્ષાર્થમાર્ત્તિવિધુરસ્ય મમોક્તિદેવી ॥ ૧॥

ધન્યોઽસ્મિ દુઃસહવિપત્પતિતસ્ય યસ્ય
વાણીધૃતોન્નતિરપુણ્યકૃતામભૂમિઃ ।
કલ્યાણિની સુમનસામુપસેવનીયા
સૌમેરવીવ પદવી ન દવીયસીયમ્ ॥ ૨॥

ધન્યોઽસ્મિ મોહતિમિરાન્ધદૃશોઽપિ યસ્ય
સાનુગ્રહેણ વિધિના પરિકલ્પિતા મે ।
વલ્ગુસ્વના ગુણવતી ધૃતવક્રભઙ્ગિ-
રારાધનાય ગિરિશસ્ય સરસ્વતીયમ્ ॥ ૩॥

સઞ્જીવનૌષધિરબૈમિ નવા ભવાગ્નિ-
ભસ્મીકૃતસ્ય વિધિના મમ નિર્મિતેયમ્ ।
વાણી શિવૈકવિષયાભિનવોઢગૌરી-
દૃષ્ટિચ્છટેવ ચકિતા મકરધ્વજસ્ય ॥ ૪॥

જાને કથઞ્ચિદુદિતા મમ શોકવહ્નિ-
તસ્માત્સ્ખલન્મૃદુપદા હૃદયાદિયં ગૌઃ ।
ચેતઃ પ્રવેક્ષ્યતિ શનૈઃ કરુણામૃતૌઘ-
નિઃષ્યન્દશીતમપિ શીતમયૂખમૌલેઃ ॥ ૫॥

યચ્ચાટુચાપલમલઙ્ઘ્યભવભ્રમોઽહં

મોહં વહન્નિહ મુહુર્મુહુરાચરામિ ।
તત્ર સ્પૃહાવહમહાર્યમહાર્યપુત્રી-
ભર્તુઃ પરાર્ધ્યમપરાધ્યતિ સૌકુમાર્યમ્ ॥ ૬॥

યો મૂર્ધનિ ધ્વનદનર્ગલનિર્ઝરૌઘ-
ઝાઙ્કારિણીમમરનિર્ઝરિણીં દધાનઃ ।
ગૃહ્ણાતિ ભક્તજનતઃ કલશાભિષેકં
કસ્તં ન વિજ્ઞાપયિતું વિભુમુત્સહેત્ ॥ ૭॥

દગ્ધોસ્મિ તાવદમુના દમુના મમાઽન્ત-
ર્યઃ પ્રજ્જ્વલત્યઘનિદાઘનિદાનજન્મા ।
મુક્તસ્ય મે પ્રતિભયાતિભયાકુલસ્ય
વાણી કથં વિગલતો ગલતોઽભ્યુદેતિ ॥ ૮॥

ક્રન્દામ્યતઃ કિમપિ નામ પિનાકપાણે
તીવ્રાર્ત્તિનિસ્તરણકારણ કાતરોઽહમ્ ।
મોહાટવીવિકટસઙ્કટસંસ્થિતસ્ય
તન્મેઽવધારય શિવાય શિવાતુરસ્ય ॥ ૯॥

આક્રન્દમિન્દુધર ધારય દેવ કર્ણે
કસ્ત્વત્પરઃ પરમકારણ કર્ણધારઃ ।
મૂર્ધ્ના વહન્નુડુપખણ્ડમખણ્ડપુણ્યં
કં કં ન તારયસિ સંસૃતિસાગરાધઃ ॥ ૧૦॥

અસ્માદૃશૈરશુચિભિશ્ચટુચાપલાનિ
ક્લૃપ્તાન્યવૈમિ ન મનસ્તવ નન્દયન્તિ ।
આવર્જનાય વિહિતાન્યપિ ચન્દ્રમૌલે
કૌલેયકસ્ય લડિતાનિ કિમાદ્રિયન્તે ॥ ૧૧॥

યદ્વા ન મુગ્ધચરિતાન્યપિ ન પ્રસાદ-
મુત્પાદયન્તિ ભવતઃ કરુણાર્ણવસ્ય ।
સ્વામિન્દરત્પુરવિહારપરસ્ય કિં ન
ચેતો હરન્તિ તવ બાલકવલ્ગિતાનિ ॥ ૧૨॥

દીનૈર્વિમુગ્ધવચનૈરસમઞ્જસાર્થૈ-
ર્યદ્વદ્દ્રવન્તિ હૃદયાનિ દયાનિધીનામ્ ।
તદ્વન્ન દૃષ્ટસભસપ્રતિભપ્રગલ્ભ-

સન્દર્ભગર્ભરચનાઞ્ચિતવાક્પ્રપઞ્ચૈઃ ॥ ૧૩॥

દુગ્ધાબ્ધિદોઽપિ પયસઃ પૃષતં વૃણોષિ
દીપં ત્રિધામનયનોઽપ્યુરરીકરોષિ ।
વાચાં પ્રસૂતિરપિ મુગ્ધવચઃ શ ૃણોષિ
કિં કિં કરોષિ ન વિનીતજનાનુરોધાત્ ॥ ૧૪॥

યત્સત્યવત્યપિ જગદ્વિદિતાઽનસૂયા
વાણી મમેયમિદમેવ હિ દેવ ચિત્રમ્ ।
અત્યદ્ભુતં પુનરિદં યદરુન્ધતીયં
ત્વામારિરાધયિષુરેવમુદીરિતાઽપિ ॥ ૧૫॥

સ્વે ધામ્નિ હૃદિ કૃતસ્થિતિમુક્તિદેવીં
કૃત્વા પ્રવેશમનયઃ સ્વયમુન્મુખત્વમ્ ।
ધારાધિરૂઢવિરહવ્યથિતામિદાની-
માધાય ધૈર્યમવધારયસીત્યયુક્તમ્ ॥ ૧૬॥

એકા ત્વમેવ ભવિતાસિ મમ પ્રિયેતિ
દત્તં વરં સ્મરસિ ચેદ્ગિરિરાજપુત્ર્યાઃ ।
પ્રેમ્ણા બિભર્ષિ કથમમ્બરસિન્ધુમિન્દુ-
લેખાં ચ મૂર્ધ્નિ હૃદયે દયિતાં દયાં ચ ॥ ૧૭॥

એતાં નિસર્ગસરલામભિજાતમુગ્ધા-
મદ્ધાઽવધીરયસિ ધીરગભીરમાની ।
જાનાસિ કિં ન શતશો નતસાન્ત્વનેષુ
યદ્બુદ્ધ્યા કરુણયા નરિનર્તિતોઽસિ ॥ ૧૮॥

પ્રસ્તૌતિ નિસ્ત્રપતયાર્ત્તિકદર્થિતેયં
ચાટૂનિ કર્ત્તુમપિ મૌગ્ધ્યવિસંસ્થુલાનિ ।
કાત્યાયનીવચનદુર્લલિતસ્ય તાનિ
મુક્તોપમાનિ ન મનસ્તવ નન્દયન્તિ ॥ ૧૯॥

અસ્યામસહ્યવિરહજ્વરકાતરાયાં
પ્રીતિર્ન તે યદિ પરં નિરવગ્રહસ્ય ।
સર્વાન્તરાર્ત્તિદલનાય દૃઢા પ્રતિજ્ઞા
વિજ્ઞાતતત્ત્વ કથમીશ્વર વિસ્મૃતા તે ॥ ૨૦॥

સત્યં કલાં વહસિ બિભ્રદુમાં યદર્ધે
ધત્સે દયાં હૃદિ યયાર્થિષુ નર્તયન્ત્યા ।
નીતોઽસિ નીલગલ નીલગલત્વમેવ
મદ્યાચિ સાચિ તુ મુખં કુરુષે રુષેવ ॥ ૨૧॥

ગૃહ્ણાસિ મૂર્ધનિ જલૈર્ધવલૈર્વિલોલૈ-
રુદ્વેલિતાં નિજપદસ્ખલિતાં દ્યુસિન્ધુમ્ ।
એતામનન્યગતિમુજ્ઝસિ સાધુવૃત્તાં
વાચં સ્વતન્ત્રચરિતસ્ય કિમુચ્યતે તે ॥ ૨૨॥

કિં ભૂયસા યદિ ન તે હૃદયઙ્ગમેય-
મસ્યા ગૃહે વસસિ કિં હૃદયે મદીયે ।
સાર્ધં પ્રિયેણ વસનં તદુપેક્ષણં ચ
દુઃખાવહં હિ મરણાદપિ માનિનીનામ્ ॥ ૨૩॥

માતઃ સરસ્વતિ બધાન ધૃતિં ત્વદીયાં
વિજ્ઞપ્તિમાર્ત્તિવિધુરાં વિભવે નિવેદ્ય ।
દેવી શિવા શશિકલા ગગનાપગા ચ
કુર્વન્ત્યવશ્યમબલાજનપક્ષપાતમ્ ॥ ૨૪॥

એષા નિસર્ગકુટિલા યદિ ચન્દ્રલેખા
સ્વર્ગાપગા ચ યદિ નિત્યતરઙ્ગિતેયમ્ ।
દેવી દયાર્દ્રહૃદયા તુ નગેન્દ્રકન્યા
ધન્યા કરિષ્યતિ ન તે નિબિડામવજ્ઞામ્ ॥ ૨૫॥

ત્વામેવ દેવિ શરણીકરવાણિ વાણિ
કલ્યાણિ સૂક્તિભિરુપસ્તુહિ ચન્દ્રમૌલિમ્ ।
માતર્નયામિ ન પુનર્ભવતીમલીક-
વાચાલબાલિશવિલઙ્ઘનભાજનત્વમ્ ॥ ૨૬॥

દેવિ પ્રપન્નવરદે ગુણગૌરિ ગૌરિ
યદ્ગૌરિયં પરિમિતં સ્રવતીહ કિઞ્ચિત્ ।
તત્સ્વામિને સમુચિતે સમયે સુપાક-
માકૂતવેદિનિ નિવેદયિતું પ્રસીદ ॥ ૨૭॥

સ્વેચ્છાવિકલ્પિતમદૃષ્ટવિશિષ્ટપાકં
માત્રાવિહીનમિદમાર્યજનૈરજુષ્ટમ્ ।

ઉન્મત્તભાષિતમથાપિ ભવત્યવશ્યં
સદ્ભેષજં વિષમયસ્ય ભવામયસ્ય ॥ ૨૮॥

ભાલાનલં તવ યથા મુકુટસ્થિતૈવ
શક્નોતિ નો શમયિતું કિલ સિદ્ધસિન્ધુઃ ।
તદ્વજ્જ્વલન્તમનિશં હૃદિ શોકવહ્નિં
વક્ત્રે વસન્ત્યપિ મમાઽત્ર સરસ્વતીયમ્ ॥ ૨૯॥

પ્રાક્ચેન્મયા વિહિતમાવિલમેવ કર્મ
સ્વામિન્ કુતસ્ત્વયિ મમૈષ દૃઢોઽનુરાગઃ ।
એકાન્તશુક્લમથ ચેદતિદુઃસહોઽયં
શોકાનલો હૃદયદાહકરઃ કિમન્તઃ ॥ ૩૦॥

ક્વાપ્યન્યજન્મનિ વિધાય વિભોરવશ્ય-
મારાધનામનુશયાલુ મનો મમાભૂત્ ।
નો ચેત્ કથં કુલગુણાદિપવિત્રમેત-
ત્સર્વં નૃજન્મ મમ નિષ્ફલમેવ જાતમ્ ॥ ૩૧॥

માનુષ્યનાવમધિગમ્ય ચિરાદવાપ્ય
નિસ્તારકં ચ કરુણાભરણં ભવન્તમ્ ।
યસ્યાઽભવદ્ભરવશસ્તરિતું ભવાબ્ધિં
સોઽહં બ્રુડામિ વદ કસ્ય વિડમ્બનેયમ્ ॥ ૩૨॥

સ્વામી પ્રસાદમુપકારિષુ સેવકેષુ
યોગ્યેષુ સાધુષુ કરોતિ કિમત્ર ચિત્રમ્ ।
સન્તસ્ત્વભાજનજનેષ્વપિ નિર્નિમિત્તં
ચિત્તં વહન્તિ કરુણામૃતસારસિક્તમ્ ॥ ૩૩॥

તસ્માત્સમાપ્તસકલાઽભ્યુદયાભ્યુપાય-
માયસ્તચેતસમસમ્ભવભગ્નવૃત્તમ્ ।
સીદન્તમન્તકભયાદભયાર્પણેન
સમ્ભાવય સ્વયમનર્થકદર્થિતં મામ્ ॥ ૩૪॥

ત્વાં નીતિમાન્ ભજતિ યઃ સ ભવત્યનીતિ-
ર્મુક્તઃ સ યો હિ ભવતા હૃદયાન્ન મુક્તઃ ।
યસ્તે રતોઽપચિતયેઽપચિતિં સ નૈતિ
તત્ત્વાં શ્રિતોઽસ્મિ ભવમસ્મ્યભવો ન કસ્માત્ ॥ ૩૫॥

સ્વાપઃ સચિન્તમનસો નિશિ મે દુરાપો
નિર્દાહ એવ ગમયામિ કદા સદાહઃ ।
રક્ષ ત્વદેકવશગં શિવ મામવશ્યં
કસ્માદ્ભવસ્યપરુષો મમ કર્કશસ્ત્વમ્ ॥ ૩૬॥

પાપઃ ખલોઽહમિતિ નાઽર્હસિ માં વિહાતું
કિં રક્ષયા કૃતમતેરકુતોભયસ્ય ।
યસ્માદસાધુરધમોઽહમપુણ્યકર્મા
તસ્માત્તવાસ્મિ સુતરામનુકમ્પનીયઃ ॥ ૩૭॥

સ્વૈરેવ યદ્યપિ ગતોઽહમધઃ કુકૃત્યૈ-
સ્તત્રાપિ નાથ તવ નાસ્મ્યવલેપપાત્રમ્ ।
દૃપ્તઃ પશુઃ પતતિ યઃ સ્વયમન્ધકૂપે
નોપેક્ષતે તમપિ કારુણિકો હિ લોકઃ ॥ ૩૮॥

અત્યુન્નતાન્નિજપદાચ્ચપલશ્ચ્યુતોઽયં
ભૂરીન્ભ્રમિષ્યતિ જડપ્રકૃતિઃ કુમાર્ગાન્ ।
મત્વેતિ ચેત્ત્યજસિ મામયમીદૃગેવ
ગાઙ્ગસ્ત્વયા કિમિતિ મૂર્ધ્નિ ધૃતઃ પ્રવાહઃ ॥ ૩૯॥

હન્તાઽયમાર્તિમપિ નારકિણાં ધૃતશ્ચે-
ન્મૂર્ધ્ના કિલેતિ વહસે યદિ ગાઙ્ગમોઘમ્ ।
એતત્તવોચિતમનાથજનાર્તિભઙ્ગ-
હેવાકિનો ઘનઘૃણામૃતસાગરસ્ય ॥ ૪૦॥

અસ્માદૃશસ્ય રસના તુ સહસ્રધેયં
ગચ્છેદવાપ્ય તવ શીર્ષમિતીરયન્તી ।
કિં તૂદ્ધરામિ ભવદગ્રપદાવમર્શ-
માત્રાદહં ત્રિજગતીમિતિ મે પ્રતિજ્ઞા ॥ ૪૧॥

ક્ષામો નિકામજડિમા કુટિલઃ કલાવાન્
દોષાકરોઽયમિતિ ચેત્ત્યજસિ પ્રભો મામ્ ।
એતાદૃશૈરુપગતોઽપિ સમસ્તદોષૈઃ
કસ્માત્ત્વયા શિરસિ નાથ ધૃતઃ શશાઙ્કઃ ॥ ૪૨॥

શાન્તાકૃતિર્દ્વિજપતિર્વિમલઃ કલઙ્ક-

મુક્તઃ કિલેતિ યદિ મૂર્ધ્નિ વિધું બિભર્ષિ ।
એવંવિધોऽપિ ભવતા કથમઙ્ઘ્રિ પીઠ-
પ્રાન્તેऽપિ ધર્તુમુચિતો ન સમર્થિતોऽહમ્ ॥ ૪૩॥

પાપગ્રહો ધૃતિમુપૈતિ વિના પરેષાં
ન સ્વાપહારમયમિત્યથ માં જહાસિ ।
એવંવિધોऽપિ તવ દક્ષિણદૃષ્ટિપાત-
પાત્રત્વમીશ્વર કથં રુચિમાનુપેતઃ ॥ ૪૪॥

મિત્રત્વમેષ ભવતો ગુણિબન્ધુતાં ચ
પ્રખ્યાપ્ય ચેદુપગતસ્તવ વલ્લભત્વમ્ ।
દાસત્વમેવ તવ નિત્યમુપેત્ય ભૂત્વા
સેવાપરશ્ચ ગુણિનાં કથમપ્રિયોऽહમ્ ॥ ૪૫॥

અત્યૂષ્મલં મલિનમાર્ગમનેકજિહ્વં
સ્પર્શેऽપ્યનર્હમવધાર્ય જહાસિ ચેન્મામ્ ।
એતાદૃશોऽપિ શુભદૃષ્ટિનિવેશનસ્ય
પાત્રીકૃતઃ કથમયં ભવતાऽऽશ્રયાશઃ ॥ ૪૬॥

યદ્બન્ધુજીવદલસદ્રુચિરર્થિભાવ-
માયાતિ સાધુવિબુધવ્રજજીવનાય ।
યન્મિત્રમણ્ડલમુખેન ચ વિશ્વમેષઃ
પુષ્ણાતિ તેન દહને યદિ સાદરોऽસિ ॥ ૪૭॥

આપ્યાયનં સુમનસામનિશં વિધાતુ-
મર્થીભવામિ યદિ કોऽપિ ન મેऽસ્તિ દાતા ।
કર્તું ચ બન્ધુજનજીવનમક્ષમોऽહં
વિશ્વં ચ પોષયિતુમીશ સુહૃન્મુખેન ॥ ૪૮॥

તેનાऽત્ર માં નિરપરાધમવેહિ દેહિ
દૃષ્ટિં પ્રસાદવિશદામમૃતદ્રવાર્દ્રામ્ ।
દીનં દયાસ્પદમદભ્રમદભ્રમેણ
ભ્રૂવિભ્રમેણ સદયં ભજ ભઙ્ગુરેણ ॥ ૪૯॥

અન્વગ્રહીરમલદૃષ્ટિસમર્પણેન
મિત્રં શુચિં દ્વિજપતિં યદિ યુક્તમેતત્ ।
એવંવિધેऽપિ ભગવન્ દૃશમપ્રસન્નાં

ધત્સે મયીતિ વિધિરેષ પરાઙ્મુખો મે ॥ ૫૦॥

નિષ્કર્ણ એષ કુસૃતિવ્યસની દ્વિજિહ્વો
મત્વેતિ ચેત્ત્યજસિ નિઃશરણં પ્રભો મામ્ ।
એતાદૃશોઽપિ પવનાશન એષ કસ્મા-
ચ્છ્રીકણ્ઠ કણ્ઠપુલિને ભવતા ગૃહીતઃ ॥ ૫૧॥

જિહ્વાસહસ્રયુગલેન પુરા સ્તુતસ્ત્વ-
મેતેન તેન યદિ તિષ્ઠતિ કણ્ઠપીઠે ।
એકૈવ મે તવ નુતૌ રસનાઽસ્તિ તેન
સ્થાનં મહેશ ભવદઙ્ઘ્રિતલે મમાઽસ્તુ ॥ ૫૨॥

શ‍ૃઙ્ગી વિવેકરહિતઃ પશુરુન્મદોઽયં
મત્વેતિ ચેત્પરિહરસ્યતિકાતરં મામ્ ।
એવંવિધોઽપિ વૃષભશ્ચરણાર્પણેન
નીતસ્ત્વયા કથમનુગ્રહભાજનત્વમ્ ॥ ૫૩॥

પૃષ્ઠે ભવન્તમયમુદ્વહતે કદાચિ-
દેતાવતા યદિ તવૈતિ દયાસ્પદત્વમ્ ।
સ્વામિન્નહં તુ હૃદયેઽન્વહમુદ્વહામિ
ત્વામિત્યતઃ કથમહો ન તવાઽનુકમ્પ્યઃ ॥ ૫૪॥

ક્રૂરઃ પરાઙ્મુખમસાવનૃજુર્જહાતિ
યોગ્યં ગુણગ્રહણકર્મણિ માર્ગણૌઘમ્ ।
મત્વેતિ ચેત્ત્યજસિ માં કથમીદૃગેવ
સ્વામિન્ધૃતઃ કરતલે ભવતા પિનાકઃ ॥ ૫૫॥

કોટિં પરામુપગતેઽપિ ગુણે નિતાન્તં
નમ્રં વિમૃશ્ય યદિ નાઽજગવં જહાસિ ।
સ્વલ્પે ગુણેઽપિ નતિમાનતિમાત્રમેવ
કિં તચ્ચ યેન ન ભવામિ તવાનુકમ્પ્યઃ ॥ ૫૬॥

અત્યન્તતીક્ષ્ણમતિકર્કશમાર્જવેન
કૃત્વા પ્રવેશમતિમાત્રમરુન્તુદં મામ્ ।
મત્વા જહાસિ યદિ નાથ કિમર્થમેત-
દેવંવિધં વહસિ હસ્તગતં ત્રિશૂલમ્ ॥ ૫૭॥

જ્ઞાત્વાઽથ ચેત્સમરસંહિતકર્મયોગ્યં
કોટિત્રયોજ્જ્વલમુખં ત્રિશિખં બિભર્ષિ ।
નિઃસ્વં ન કિં સમરસં હિતકર્મયોગ્યં
માં વેત્સિ યેન કુરુષે મયિ ન પ્રસાદમ્ ॥ ૫૮॥

ન્યગ્ભાવિતદ્વિજમખર્વિતપૂર્વદેવ-
ગુર્વાઽપદર્પણપરં કૃતગોત્રભેદમ્ ।
સમ્ભાવ્ય ચેત્ત્યજસિ માં કથમીદૃગેવ
નેત્રોત્સવસ્તવ જગદ્વિજયી કુમારઃ ॥ ૫૯॥

મત્ત્વાઽથ નાથ શુચિજાતિમમું વિશાખ-
મસ્મિન્મનો યદિ બિભર્ષિ દૃઢપ્રસાદમ્ ।
એવંવિધોઽપ્યહમનન્યપરાયણસ્તે
કસ્માદ્ભવામિ ભગવન્નવલેપભૂમિઃ ॥ ૬૦॥

સર્વાપહારરતિરુન્મદવક્રવક્ત્ર-
સ્ત્યાજ્યોઽસ્મિ કર્ણચપલો યદિ તુન્દિલસ્તે ।
એવંવિધોઽપિ ભગવન્ ગણનાયકત્વે
કસ્માદયં ગજમુખો ભવતા નિયુક્તઃ ॥ ૬૧॥

હસ્તં સદા વહતિ દાનજલાવસિક્તં
તેનૈષ ચેદલભત પ્રમથાધિપત્યમ્ ।
દાનં પ્રદાતુમધનો યદિ ન ક્ષમોઽહં
દાસત્વમસ્તુ મમ દેવ ભવદ્ગણાનામ્ ॥ ૬૨॥

હેયોઽસ્મ્યસેવકતયા તવ ચેદ્ ગ્રહેષુ
કુર્વત્સુ તુલ્યમખિલેષ્વપિ રાશિભોગમ્ ।
દ્વાવુજ્ઝતસ્તવ ન દૃક્પથમર્કચન્દ્રા-
વેતાવતા પરિહૃતા ભવતા કિમન્યે ॥ ૬૩॥

બલાવુભૌ દ્વિજપતી તવ નાથ ભક્તા-
વેકસ્તયોર્હરતિ સન્તમસં પ્રજાનામ્ ।
તેનાવૃતં યદિ પરં સહસે મહેશ
દ્રષ્ટું તતો વિષમદૃષ્ટિરિતિ શ્રુતોઽસિ ॥ ૬૪॥

યુક્તં રિપૌ સુહૃદિ વા સમદર્શનસ્ય
દોષોદ્ધતેઽપિ યદિ તે હૃદયં દયાર્દ્રમ્ ।

તત્સામ્પ્રતં ગતિવિહીનમનાત્મનીનં
દીનં જનં પ્રતિ કુતઃ કરુણાઽવલેપઃ ॥ ૬૫॥

અભ્યુદ્ગમોઽયમશનેરમૃતાંશુમ્બિમ્બા-
ત્સ્વામિન્નસૌ દિનમણેસ્તિમિરપ્રરોહઃ ।
યુષ્માદૃશસ્ય કૌણામ્બુનિધેરકસ્મા-
દસ્માદૃશેષ્વશરણેષ્વવધીરણં યત્ ॥ ૬૬॥

સ્વામિન્ મૃડસ્ત્વમુરુદુઃખભરાર્દિતોઽહં
મૃત્યુઞ્જયસ્ત્વમથ મૃત્યુભયાકુલોઽહમ્ ।
ગઙ્ગાધરસ્ત્વમહમુગ્રભવોપતાપ-
તપ્તઃ કથં કથમહં ન તવાનુકમ્પ્યઃ ॥ ૬૭॥

ભવજીર્ણજ્વરાતાપ-મોહકમ્પાકુલાય મે ।
એકં સુદર્શનસ્યાંશં દેહિ વિશ્વચિકિત્સક ! ॥

ભક્તપ્રિયઃ સ્વયમપિ ક્ષુધયાઽન્વિતસ્ય
પાનોત્સવૈકરસિકોઽપિ પિપાસિતસ્ય ।
તાપાતુરસ્ય ઘનસેવનસાદરોઽપિ
જાનાસિ નાથ ન કથં સહસા મમાર્તિમ્ ॥ ૬૮॥

સર્વજ્ઞ સર્વમવગચ્છસિ ભૂતભાવિ
ભાગ્યક્ષયઃ પુનરસૌ ભગવન્ મમૈવ ।
જાનાસિ યસ્ય હૃદયસ્થિત એવ નાર્તી
જ્ઞાત્વાઽપિ વા ગજનિમીલિતમાતનોષિ ॥ ૬૯॥

ભાલેઽનલં તવ ગલે ગરલં કરે ચ
શૂલં પ્રકાશમખિલોઽયમવૈતિ લોકઃ ।
અન્તર્ગતં ત્રયમિદં તુ મમ ત્વમેવ
જાનાસિ નાસિ ચ દયાલુરતો હતોઽહમ્ ॥ ૭૦॥

એકસ્ત્વમેવ ભવિનામનિમિત્તબન્ધુ-
ર્નૈસર્ગિકી તવ કૃપા સવિતુઃ પ્રભેવ ।
વામઃ પુનર્મમ વિધિઃ પરિદેવિતાનિ
જાતાન્ય(જાનાસિ)રણ્યરુદિતેન સમાનિ યસ્ય ॥ ૭૧॥

અત્યન્તદુર્ભગમયોગ્યમભાગ્યભાજ-

માજન્મનર્મવિમુખં મુખરોગ્રવાચમ્ ।
દૈવાદવાપ્ય સકલાપસદં મહેશ
નૈવાऽત્યજત્કુલવધૂરિવ દુર્ગતિર્મામ્ ॥ ૭૨॥

મુક્ત્વા સમાધિમસમાધિહરં પરં ચ
પ્રોદ્દામધામ શિવ ધામ સુધામયં તે ।
ભ્રાન્તોऽસ્મિ તેન મલયાનિલવેલ્લ્યમાન-
કલ્લોલલોલનિધનાનિ ધનાનિ લબ્ધુમ્ ॥ ૭૩॥

આરાધિતાઃ પ્રચપલાશ્ચપલાવદેવ
દુષ્ટેશ્વરા ન ગુરવો ગુરવો ગુણૌઘૈઃ ।
યાતાનિ તાનિ મમ હાનિમહાનિ મિથ્યા
શ્રાન્તોऽસ્મિ હા વિતતમોહતમોહતોऽહમ્ ॥ ૭૪॥

તૃષ્ણા દિનાદ્દિનમબૃંહત બંહિમન-
માયામિની મનસિ હૈમનયામિનીવ ।
નાથ ત્રિધામનયનાऽર્પયદૃક્પ્રસાદં
સાદં નયાન્ધતમસં ભ્રમસમ્ભૃતં મે ॥ ૭૫॥

સ્તમ્ભં વિજૃમ્ભયતિ દમ્ભમયં ભ્રમં ચ
કઞ્ચિત્પ્રપઞ્ચયતિ યચ્છતિ વાચિ મુદ્રામ્ ।
કં નામ નાऽऽમયમયં પ્રથયત્યખર્વ-
ગર્વજ્વરજ્વલનદુઃસહસન્નિપાતઃ ॥ ૭૬॥

તત્સામ્પ્રતં ભુવનવિશ્રુતહસ્તસિદ્ધિં
ત્વામોષધીપતિશિખામણિમાશ્રયામિ ।
મૌનં વિમુદ્રય દરિદ્રય મોહનિદ્રાં
વિદ્રાવય દ્રુતમુપદ્રવમિન્દ્રિયાણામ્ ॥ ૭૭॥

વિસ્રમ્ભમમ્ભસિ ભજે ભગવન્નગાધે
બાધે રિપુવ્યવસિતેऽપ્યલસીભવામિ ।
જાગર્મિ યન્ન સમવર્તિનિ હન્તુકામે
કા મે ગતિર્યદિ કરોષિ મનાગવજ્ઞામ્ ॥ ૭૮॥

મોહાન્ધ્યહરણાત્તીવ્રભવજ્વર-નિવારણે ।
દેહિનાં દક્ષ એકસ્ત્વમોષધીશશિખામણિઃ ॥

યસ્તે દદાતિ રવમસ્ય વરં દદાસિ
યો વા મદં વહતિ તસ્ય દમં વિધત્સે ।
ઇત્યક્ષરદ્વયવિપર્યયકેલિશીલઃ
કિં નામ કુર્વતિ નમો ન મનઃ કરોષિ ॥ ૭૯॥

ચન્દ્રઃ કરે શિરસિ ચક્ષુષિ પાદમૂલે
મૂર્તાવપીતિ શિવ ચન્દ્રસુભિક્ષમેતત્ ।
તાપાન્ધકારવિધુરં શરણાગતં કિ-
માયાતુ લઙ્ઘિતવતસ્તવ મોઘભાવમ્ ॥ ૮૦॥

કૌટિલ્યમિન્દુદલતો ન સુધામયત્વ-
મૂષ્માણમૂર્ધ્વનયનાન્ન પરં પ્રકાશમ્ ।
માલિન્યમેવ ગલતો ન ગભીરભાવં
ત્વત્તોઽપિ મે તિતઉ કલ્પમવાપ ચેતઃ ॥ ૮૧॥

કિં વર્ણયામિ ગુરુતાં વિપદઃ પદે માં
સ્થાણોર્ન્યયુઙ્ક્ત યદિયં સહસોપદિશ્ય ।
નિઃશાખતાં સુમનસામનુમેયભાવં
વિચ્છાયતાં વિફલતાં રસહીનતાં ચ ॥ ૮૨॥

સર્વજ્ઞશમ્ભુશિવશઙ્કરવિશ્વનાથ-
મૃત્યુઞ્જયેશ્વરમૃડપ્રભૃતીનિ દેવ ।
નામાનિ તેઽન્યવિષયે ફલવન્તિ કિન્તુ
ત્વં સ્થાણુરેવ ભગવન્ મયિ મન્દભાગ્યે ॥ ૮૩॥

શ્વેતે સુદર્શનસમર્પણતત્પરસ્ય
કૃષ્ણે ચ યસ્ય ન બભૂવ વિશેષબુદ્ધિઃ ।
સત્ત્વં શ્રિયં સૃજસિ પુણ્યજનેષુ માં ચ
મુઞ્ચસ્યપુણ્યજનમેષ વિધિઃ ક્ષતો મે ॥ ૮૪॥

આવર્જનં ક્રતુભુજાં ગજવાજિરત્ન-
શ્રીપારિજાતમદિરેન્દુસુધાઽર્પણેન ।
કૃત્વાઽગ્રહીર્ગરલમાત્મનિ યન્મહિમ્ના
સા તે ક્વ સમ્પતિ કૃપા મયિ મન્દભાગ્યે ॥ ૮૫॥

દૃપ્તેષુ તે મદનદક્ષયમાઽન્ધકેષુ
પ્રાદુર્ભવન્મનસિ રોષવિષપ્રરોહઃ ।

સિક્તઃ સુધામયમસૂત યયા પ્રસાદં
સા તે ક્વ સમ્પ્રતિ કૃપા મયિ ભાગ્યહીને ॥ ૮૬॥

કેચિદ્દરસ્ય ભગવન્નભયસ્ય કેચિ-
ત્સાન્દ્રસ્ય કેચિદમૃતસ્ય કરસ્થિતસ્ય ।
પ્રાપુઃ કૃપાપ્રણયિનસ્તવ ભાજનત્વં
શૂલસ્ય કેવલમભાગ્યપરિક્ષતોઽહમ્ ॥ ૮૭॥

અભ્રાન્તવૃત્તિ ભવતાન્તરધિષ્ઠિતં મે
ચેતઃ પ્રકાશવપુષા રવિણેવ બિમ્બમ્ ।
સોપપ્લવં યદિ કૃતં તમસા કદાચિ-
દક્ષીણપુણ્યમહિમૈવ તદા વિભાતિ ॥ ૮૮॥

જાનામિ નાઽમૃતમયં હૃદયં પ્રવેષ્ટુ-
મુદ્દામદુઃખદવદાહહતસ્તવાઽહમ્ ।
ધર્તું હૃદિ ત્રિદશસિન્ધુસુધાસુધાંશુ-
શીતં ભવન્તમપિ ન પ્રભવામિ ધિઙ્મામ્ ॥ ૮૯॥

ક્ષીણઃ ક્ષતાઽખિલકલઃ પ્રવિલીનધામા
ત્વામાશ્રિતોઽસ્મિ સવિતારમિવાઽમૃતાંશુઃ ।
નાસ્ત્યેવ જીવનકલા મમ કાચિદન્યા
પાદાર્પણેન કુરુષે યદિ ન પ્રસાદમ્ ॥ ૯૦॥

ઘોરાન્ધકારવિધુરં વિવિધોપતાપ-
તપ્તં વિપદ્ગુરુતુષારપરાહતં મામ્ ।
ત્વં ચેજ્જહાસિ વદ કસ્તપનેન્દુવહ્નિ-
નેત્રો હરિષ્યતિ પરસ્ત્રિવિધાં મમાર્તિમ્ ॥ ૯૧॥

વ્યક્તિર્ન યસ્ય ન મતિર્ન ગતિર્ન શક્તિ-
ર્નાપિ સ્મૃતિર્વિપદપસ્મૃતિપીડિતસ્ય ।
તસ્યૌષધીશમુકુટં ત્રિજગદ્ગુરું ત્વાં
મુક્ત્વા કરિષ્યતિ પરો મમ કશ્ચિકિત્સામ્ ॥ ૯૨॥

ત્વં નિર્ગુણઃ શિવ તથાહમથ ત્વદીયં
શૂન્યં પરં કિમપિ ધામ તથા મદીયમ્ ।
ત્વં ચેદ્ધવિ પ્રવિદધાસિ ધૃતિં તથાઽહં
કષ્ટં શિવસ્ત્વમશિવસ્તુ વિધિક્ષતોઽહમ્ ॥ ૯૩॥

કામસ્ત્વયીવ મયિ નિષ્ફલતામવાપ
ક્ષિપ્તો મયાપિ વિફલો ભવતેવ કાલઃ ।
વિધ્વસ્તધામ મમ દેવ વપુસ્તવેવ
કષ્ટં શિવસ્ત્વમશિવસ્તુ વિધિક્ષતોઽહમ્ ॥ ૯૪॥

યદ્વદ્દ્વિભો તવ હૃદિ પ્રવિભાતિ નાગ-
સ્તદ્વન્મમાપિ ભવદેકપરાયણસ્ય ।
યદ્વત્સ્વધર્મનિરતસ્ત્વમહં તથૈવ
કષ્ટં શિવસ્ત્વમશિવસ્તુ વિધિક્ષતોઽહમ્ ॥ ૯૫॥

મૂર્ત્તિસ્તવેવ શિવ મે વિધુરોચિતેયં
દૃષ્ટિસ્તવેવ ભગવન્ વિષમા મમાપિ ।
શૂલી વિષાદહતશક્તિરહં યથા ત્વં
કષ્ટં શિવસ્ત્વમશિવસ્તુ વિધિક્ષતોઽહમ્ ॥ ૯૬॥

કણ્ઠે વિષં વસતિ મે વિષમં તવેવ
ભૂતેશ્વરઃ પશુપતિશ્ચ ભવાનિવાઽહમ્ ।
અઙ્ગં મમાપિ ગુરુરુગ્જ્વલિતં તવેવ
કષ્ટં શિવસ્ત્વમશિવસ્તુ વિધિક્ષતોઽહમ્ ॥ ૯૭॥

સ્વર્ભાનુગીર્ણમિવ પૂર્ણશશાઙ્કબિમ્બં
બાલાઙ્ગનાઙ્ગમિવ દારુણરુગ્વિરુગ્ણમ્ ।
શ્રીખણ્ડચન્દનમિવાઽજગરોપગૂઢં
વ્યૂઢં નૃપસ્ય પિશુનૈરિવ પાદમૂલમ્ ॥ ૯૮॥

હાલાહલાક્તમિવ દુગ્ધમહાબ્ધિનીરં
તીરં મહામકરરુદ્ધમિવ દ્યુસિન્ધોઃ ।
દારિદ્ર્યદગ્ધમિવ સાધુગૃહસ્થવૃત્તં
ચિત્તં સમત્સરમિવ શ્રુતવિશ્રુતસ્ય ॥ ૯૯॥

વિદ્યાવિહીનમિવ સત્કુલજસ્ય રૂપં
નિર્દાનભોગમિવ કાપુરુષસ્ય વિત્તમ્ ।
માનુષ્યમુજ્જ્વલકુલશ્રુતશીલશુદ્ધં
જાતં વિપદ્વિધુરિતં મમ શોચનીયમ્ ॥ ૧૦૦॥

પશ્ચાત્પુરઃ પ્રતિદિશં ચ વિમૃશ્ય પશ્ય-

ન્ક્રૂરં કૃતાન્તહતકં ફણિપાશપાણિમ્ ।
ભૂમૌ પતામિ કૃપણં પ્રલપામિ પાદ-
પીઠે લુઠામિ શઠવત્કઠિનોઽસિ કસ્માત્ ॥ ૧૦૧॥

આઃ કિં ન રક્ષસિ નયત્યયમન્તકો માં
હેલાવલેપસમયઃ કિમયં મહેશ ।
મા નામ ભૂત્કરુણયા હૃદયસ્ય પીડા
વ્રીડાપિ નાસ્તિ શરણાગતમુજ્ઝતસ્તે ॥ ૧૦૨॥

અજ્ઞોઽસિ કિં કિમબલોઽસિ કિમાકુલોઽસિ
વ્યગ્રોઽસિ કિં કિમઘૃણોસિ કિમક્ષમોઽસિ ।
નિદ્રાલસઃ કિમસિ કિં મદઘૂર્ણિતોઽસિ
ક્રન્દન્તમન્તકભયાર્ત્તમુપેક્ષસે યત્ ॥ ૧૦૩॥

દ્વેષઃ કિમેષ કૃપણે કિમુતાઽક્ષમેયં
નિસ્ત્રિંશતા કિમથવા કિમશક્તિરેવ ।
હુઙ્કારમાત્રકનિરાકરણીયગર્વે
સર્વેશ કાલહતકે યદિયત્યુપેક્ષા ॥ ૧૦૪॥

ઇત્યાદિ દૂઢ્ય ઇવ નિષ્ઠુરપુષ્ટભાષી
યત્કિઞ્ચન ગ્રહગૃહીત ઇવાઽસ્તશઙ્કઃ ।
આર્ત્યા મુહુર્મુહુરયુક્તમપિ બ્રવીમિ
તત્રાપિ નિષ્કૃપ ભિનત્સિ ન મૌનમુદ્રામ્ ॥ ૧૦૫॥

ભીતે ભવાર્તિવિધુરે ચરણાવલગ્ને
ભગ્નેપ્સિતે ગતિમપશ્યતિ કાઞ્ચિદન્યામ્ ।
કસ્માદનાગસિ મનાગસિ વિશ્વસાક્ષિ-
ન્દાક્ષિણ્યદિગ્ધહૃદયોપિ પરાઙ્મુખસ્ત્વમ્ ॥ ૧૦૬॥

સ્વામિન્નિસર્ગમલિનઃ કુટિલશ્ચલોઽહ-
મેતાદૃગેવ ચ રિપુર્મમ મૃત્યુપાશઃ ।
ભ્રૂપલ્લવસ્તવ તથાવિધ એવ તસ્ય
શાન્ત્યૈ વિષે હિ વિષમે વિષમેવ પથ્યમ્ ॥ ૧૦૭॥

કિં કાર્યમેભિરનિશં પુનરુક્તશુક્તૈ-
રુદ્વેગકારિભિરલબ્ધફલૈઃ પ્રલાપૈઃ ।
એવં વિદન્નપિ મુહુર્મુખરં વિરૌમિ

પશ્યામિ ન ત્વદિતરં હિ પરં શરણ્યમ્ ॥ ૧૦૮॥

ત્વં ચેત્પ્રસાદસુમુખઃ પ્રણયોક્તિભિઃ કિં
ત્વં ચેદનાદરપરઃ પ્રણયોક્તિભિઃ કિમ્ ।
ભાગ્યોદયે સતિ વૃથૈવ ગુણેષુ યત્ન-
સ્તસ્મિન્નસત્યપિ વૃથૈવ ગુણેષુ યત્નઃ ॥ ૧૦૯॥

જાનન્નપીતિ વિરમામિ ન યત્પ્રલાપા-
દાર્ત્તેર્મહેશ મહિમૈષ દૃશસ્તવૈવ ।
યા રાત્રિમેવ દિવસં તિમિરં પ્રકાશ-
મગ્નિં હિમં ગરલમપ્યમૃતં કરોતિ ॥ ૧૧૦॥

આર્ત્તિઃ શ્રુતૈવ કૃપણાત્કરુણાં તવાન્ત-
રુત્પાદયત્યનિશમગ્નિશિખાં શમીવ ।
જાતૈવ નિર્દહતિ તામિયમિત્યમુત્ર
કિં બ્રૂમહે મહદનઙ્કુશમીશ્વરસ્ય ॥ ૧૧૧॥

યન્નામ પામરજનોચિતમત્ર કિઞ્ચિ-
દૌચિત્યમુક્તમસમઞ્જસમભ્યધાયિ ।
તત્રાપિ ભર્તુરુચિતા રુચિરીશ્વરાણાં
ચેતશ્ચમત્કૃતિકરી કપિઝમ્પિકાઽપિ(એવ)॥ ૧૧૨॥

ચૌરૈર્ગૃહીતમપિ દષ્ટમપિ દ્વિજિહ્વૈ-
ર્ગ્રસ્તં ગ્રહૈરપિ નિરુદ્ધમપિ દ્વિષદ્ભિઃ ।
વ્યાઘ્રૈરુપદ્રુતમપિ દ્રુતમાક્ષિપદ્ભિ-
રન્વિષ્ટમપ્યવનિભૃત્પુરુષૈઃ સરોષૈઃ ॥ ૧૧૩॥

ભૂતાઽભિભૂતમપિ સિન્ધુજલેઽપિ મગ્નં
ભગ્નં રણેઽપિ પતિતં દવપાવકેઽપિ ।
કિં ભૂયસા યમભટૈરપિ કૃષ્યમાણં
કસ્ત્રાતુમર્હતિ મહેશ્વરમન્તરેણ ॥ ૧૧૪॥

તજ્જ્ઞો બતાસ્મ્યભિલષન્ સુખમક્ષયં ય-
દ્દુઃખૈકધામ વપુરસ્થિરમર્થયામિ ।
યદ્વા ભવાબ્ધિતરણાય પુરાણમુગ્ર-
શીલં પુમાંસમુડુપાર્ધધરં શ્રયામિ ॥ ૧૧૫॥

દૃઙ્માર્ગમાત્રપતિતાઃ સહસૈવ યસ્ય
પઞ્ચત્વમિન્દુરવિહવ્યભુજોઽપ્યવાપુઃ ।
ધીમાનહં બત તમેવ સદાશિવં ય-
દ્દેવં શ્રયામિ શરણમ્મરણાર્ત્તિભીરુઃ ॥ ૧૧૬ ॥

સ્થાણુઃ સ યત્ર વિભુરસ્ય વધૂરપર્ણા
સા યત્ર યત્ર ચ તયોસ્તનયો વિશાખઃ ।
પ્રજ્ઞાવતામહમહો પ્રવરઃ પ્રવેષ્ટુ-
મિચ્છામિ ધામ તદભીષ્ટફલાપ્તયે યત્ ॥ ૧૧૭ ॥

માર્જારશૂકરશૃગાલકરાલવક્ત્ર-
વેતાલભૂતશતસઙ્કુલમીશ્વરસ્ય ।
ભીષ્મં નિશાચરપિશાચરવૈઃ પ્રવેષ્ટુ-
મિચ્છામિ ધામ મતિમાનતિમાત્રભીરુઃ ॥ ૧૧૮ ॥

કર્ણેક્ષણાદચરણાત્ત્રિફણાત્કૃતાન્ત-
પાશાત્ત્રસન્ધૃતસહસ્રફણોરગેન્દ્રમ્ ।
પ્રાજ્ઞઃ સહસ્રશિરસં પુરુષં સહસ્ર-
નેત્રં સહસ્રચરણં શરણં શ્રયામિ ॥ ૧૧૯ ॥

ત્રસ્તઃ સમસ્તજનતાઽપહૃતિપ્રગલ્ભા-
દ્દીપ્તાઽનલોલ્બણદૃશઃ શિવ જીવિતેશાત્ ।
પ્રાજ્ઞઃ સમસ્તજનતાપહૃતિપ્રગલ્ભં
ત્વાં જીવિતેશમનલોગ્રદૃશં શ્રયામિ ॥ ૧૨૦ ॥

નિર્ભર્ત્સિતક્રતુમૃગં સમશિશ્રિયત્ત્વાં
સંન્યસ્તલાઞ્છનમૃગઃ કલયા મૃગાઙ્કઃ ।
યત્કામવૈરિણમવેત્ય સકામ એવ
ત્વામાશ્રિતોઽસ્મિ સુધિયામધિકસ્તતોઽહમ્ ॥ ૧૨૧ ॥

પદ્માશ્રિતઃ શતધૃતિશ્ચતુરાનનોઽપિ
યસ્માત્પરાભવમવાપદવાચ્યમેવ ।
ત્યક્તઃ શ્રિયા ગતધૃતિર્મૃદુમન્દવક્ત્રઃ
પ્રાજ્ઞસ્તમીશ્વરમનુગ્રહમર્થયેઽહમ્ ॥ ૧૨૨ ॥

આજન્મ કર્મ વિરચય્ય ફલં યદાપ્તં
હૃત્વા ક્ષણાત્તદખિલં ચિરકાલભોગ્યમ્ ।

યઃ સ્વીકરોત્યપુનરાગમનાય ભક્તં
સેવે તમીશ્વરમહો મતિમત્તમોઽહમ્ ॥ ૧૨૩॥

શ્મશાનૈકસ્થાનવ્યસનમનલોત્તાલનયનં
વિષજ્જ્યોતિર્જ્વાલાજટિલકુટિલવ્યાલવલયમ્ ।
વિભું મુણ્ડશ્રેણીવિકટમુકુટં ભીરુહૃદયઃ
શ્રયન્ ભીમં ધીમાનહમહસનીયઃ કૃતધિયામ્ ॥ ૧૨૪॥

અહો તત્ત્વજ્ઞોહં કરતલવિલીનૈકફણિનઃ
સમુત્રસ્યન્કાલાત્ક્રમકવલિતૈકૈકભવિનઃ ।
મહાકાલં સર્વાવયવસુલભાનલ્પભુજગં
સકૃદ્વિશ્વગ્રાસપ્રવણમતિમભ્યેમિ શરણમ્ ॥ ૧૨૫॥

શ‍ૃઙ્ગી યત્ર સ્ફટિકશિખરી યત્ર શ‍ૃઙ્ગી પિનાકઃ
શ‍ૃઙ્ગી સોઽપિ સ્ફુરતિ વૃષભો વલ્લભો યત્ર ભર્તુઃ ।
તત્ર ત્રસ્તઃ પ્રકૃતિસરલઃ સ્વલ્પવાગપ્રગલ્ભઃ
પ્રાજ્ઞઃ સેવાસમયમુચિતં સ્વામિનઃ પ્રાર્થયેઽહમ્ ॥ ૧૨૬॥

વિશ્રાન્તિર્ન ક્વચિદપિ વિપદ્ગ્રીષ્મભીષ્મોષ્મતપ્તે
ચિત્તે વિત્તે ગલતિ ફલતિ પ્રાક્પ્રવૃત્તે કુવૃત્તે ।
તેનાત્યન્ધં સપદિ પતિતં દીર્ઘદુઃખાન્ધકૂપે
મામુદ્ધર્તું પ્રભવતિ ભવ ત્વાં દયાબ્ધિં વિના કઃ ॥ ૧૨૭॥

યેષામેષા તનુધનલવપ્રાર્થનાઽનર્થકન્થા
પન્થાનં ન પ્રદિશતિ પરં સ્થાનમાનન્દિ લબ્ધુમ્ ।
તેષામેષામકૃપણ કૃપાભાજનાનાં જનાના-
માશાપાશાકુલિતમનસાં દૃષ્ટિમિષ્ટાં નિધેહિ ॥ ૧૨૮॥

ઉદઞ્ચય મુખં મનાગભયઘોષમુદ્ઘોષય
પ્રયચ્છ વિશદાં દૃશં ગતિવિહીનમાશ્વાસય (ધૃતિવિહીનમાશ્વાસય)।
કિમન્યદયમાગતઃ કુપિતદૃષ્ટિરુત્કન્ધરઃ
કૃતાન્ત ઇતિ મા સ્મ ભૂરવિરલાવલેપાલસઃ ॥ ૧૨૯॥

મુહુઃ કિમપરં બ્રુવે ભુજગપાશપાણિં પુરઃ
સ્ફુરન્તમિવ રોષણં રવિજકિઙ્કરં પશ્યતઃ ।
ધૃતિશ્ચલતિ મે ગતિઃ સ્ખલતિ મૂર્તિરુદ્વેલ્લતિ
સ્થિતિર્જ્વલતિ નિર્વૃતિર્વિગલતિ સ્મૃતિર્મીલતિ ॥ ૧૩૦॥

દુર્ગં યત્સુગમત્વમેતિ ભજતે દૂરં યદભ્યર્ણતાં
યત્ક્રીડોપવનત્વમેતિ મરુભૂર્મિત્રાયતે યદ્રિપુઃ ।
યસ્યાઃ સા ભુવિ શક્તિરપ્રતિહતા સાર્ત્તિસ્ત્વદાક્રન્દને
સ્વામિન્મામનુદત્કૃપાऽપિ નુદતુ ત્વાં મત્સમાશ્વાસને ॥ ૧૩૧॥

દ્વારિ શ્રીશ્ચ સરસ્વતી ચ વસતઃ સ્વામિંસ્તવાऽસ્તક્રુધૌ
માં તુ શ્રીર્ભવદઙ્ઘ્રિવિષ્ટરતલે નિત્યપ્રરૂઢસ્થિતિમ્ ।
યાવન્માત્રસરસ્વતીપરિચયદ્વેષાદહાસીદતો
વહ્નિં દુર્વહમુદ્વહામિ હૃદયે ગ્લાયન્નુદન્વાનિવ ॥ ૧૩૨॥

નાથ પ્રાથમિકં વિવેકરહિતં તિર્યગ્વદસ્તં વય-
સ્તારુણ્યં વિહતં વિરાધિતવધૂવિસ્રમ્ભણારમ્ભણૈઃ ।
સ્વામિન્સમ્પ્રતિ જર્જરસ્ય જરસા યાવન્ન ધાવન્નયં
મૃત્યુઃ કર્ણમુપૈતિ તાવદવશં પાદાશ્રિતં પાહિ મામ્ ॥ ૧૩૩॥

આસીદ્યાવદખર્વગર્વકરણગ્રામાભિરામાકૃતિ-
સ્તાવન્મોહતમોહતેન ન મયા શ્વભ્રં પુરઃ પ્રેક્ષિતમ્ ।
અદ્યાऽકસ્મિકપાતકાતરમતિઃ કં પ્રાર્થયે કં શ્રયે
કિં શક્નોમિ કરોમિ કિં કુરુ કૃપામાત્મદ્રુહં પાહિ મામ્ ॥ ૧૩૪॥

જાત્યન્ધઃ પથિ સઙ્કટે પ્રવિચરન્હસ્તાऽવલમ્બં વિના
યાતશ્ચેદવટે નિપત્ય વિપદં તત્રાऽપરાધોऽસ્ય કઃ ।
ધિગ્ધિઙ્માં સતિ શાસ્ત્રચક્ષુષિ સતિ પ્રજ્ઞાપ્રદીપે સતિ
સ્નિગ્ધે સ્વામિનિ માર્ગદર્શિનિ શઠઃ શ્વભ્રે પતત્યેવ યઃ ॥ ૧૩૫॥

ત્રાતા યત્ર ન કશ્ચિદસ્તિ વિષમે તત્ર પ્રહર્તું પથિ
દ્રોગ્ધારો યદિ જાગ્રતિ પ્રતિવિધિઃ કસ્તત્ર શક્યક્રિયઃ ।
યત્ર ત્વં કરુણાર્ણવસ્ત્રિભુવનત્રાણપ્રવીણઃ પ્રભુ-
સ્તત્રાપિ પ્રહરન્તિ ચેત્પરિભવઃ કસ્યૈષ ગર્હાવહઃ ॥ ૧૩૬॥

કિં શક્તેન ન યસ્ય પૂર્ણકરુણાપીયૂષસિક્તં મનઃ
કિં વા તેન કૃપાવતા પરહિતં કર્તું સમર્થો ન યઃ ।
શક્તિશ્ચાસ્તિ કૃપા ચ તે યમભયાદ્ભીતોऽપિ દીનો જનઃ
પ્રાપ્તો નિઃશરણઃ પુરઃ પરમતઃ સ્વામી સ્વયં જ્ઞાસ્યતિ ॥ ૧૩૭॥

ભૃઙ્ગારે કરપુષ્કરપ્રણયિનિ સ્વર્નિમ્નગાનિર્ઝરે

સમ્પૂર્ણે કરુણારસે પરિણતસ્ફારે તુષારત્વિષિ ।
અસ્તિ સ્વાદુ ચ શીતલં ચ સુલભં પીયૂષમોષચ્છિદે
પ્રાપ્તશ્ચ પ્રણયી પુરઃ પરમતઃ સ્વામી સ્વયં જ્ઞાસ્યતિ ॥ ૧૩૮॥

આર્ત્તિઃ શલ્યનિભા દુનોતિ હૃદયં નો યાવદાવિષ્કૃતા
સૂતે લાઘવમેવ કેવલમિયં વ્યક્તા ખલસ્યાઽગ્રતઃ ।
તસ્માત્સર્વવિદઃ કૃપાઽમૃતનિધેરાવેદિતા સા વિભો-
ર્યદ્યુક્તં કૃતમેવ તત્પરમતઃ સ્વામી સ્વયં જ્ઞાસ્યતિ ॥ ૧૩૯॥

લેખાઃ સન્તુ પ્રસન્ના બુધસદસિ શુચેરાગમસ્યાસ્તુ લબ્ધિ-
ર્મિથ્યાદૃષ્ટિશ્ચ માભૂદનુપધિરહતો દીર્ઘકાલોઽસ્તુ ભોગઃ ।
સભ્યાઃ સર્વેઽનુવૃત્તિં વિદધતુ તદપિ ન્યાયતો નાસ્તિ મુક્તિઃ
સમ્યગ્દર્શી પ્રમાતા રચયતિ ન ભવાનીશ્વરશ્ચેદ્વિચારમ્ ॥ ૧૪૦॥

જાનુભ્યામુપસૃત્ય રુગ્ણચરણઃ કો મેરુમારોહતિ
શ્યામાકામુકબિમ્બમમ્બરતલાદુત્પ્લુત્ય ગૃહ્ણાતિ કઃ ।
કો વા બાલિશભાષિતૈઃ પ્રભવતિ પ્રાપ્તું પ્રસાદં પ્રભો-
રિત્યન્તર્વિમૃશન્નપીશ્વર બલાદાર્ત્યાસ્મિ વાચાલિતઃ ॥ ૧૪૧॥

ધત્તે પૌણ્ડ્રકશર્કરાઽપિ કટુતાં કણ્ઠે ચિરં ચર્વિતા
વૈરસ્યં વરનાયિકાઽપિ કુરુતે સક્ત્યા ભૃશં સેવિતા ।
ઉદ્વેગં ગગનાપગાઽપિ જનયત્યન્તર્મુહુર્મજ્જનાદ્
વિશ્રદ્ધાં મધુરાઽપિ પુષ્યતિ કથા દીર્ઘેતિ વિશ્રમ્યતે ॥ ૧૪૨॥

ઇત્થં તત્તદનન્તસન્તતલસચ્ચિન્તાશતવ્યાયત-
વ્યામોહવ્યસનાવસન્નમનસા દીનં યદાક્રન્દિતમ્ ।
તત્કારુણ્યનિધે નિધેહિ હૃદયે ત્વં હ્યન્તરાત્માઽખિલં
વેત્સ્યન્તઃસ્થમતોઽર્હસિ પ્રણયિનઃ ક્ષન્તું મમાઽતિક્રમમ્ ॥ ૧૪૩॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"દીનાક્રન્દનં" નામૈકાદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૨. તમઃશમનં દ્વાદશં સ્તોત્રમ્

મખૈરુપાસ્યોઽપિ નયજ્ઞસેવ્યો નિરામયોઽપિ પ્રથિતોગ્રશૂલઃ ।

વેદપ્રિયોઽપ્યશ્રુતિવલ્લભો યઃ શ્રયામિ તં દેવમચિન્ત્યશક્તિમ્ ॥ ૧॥

સ્તુત્યસ્ત્વમેવ સ્તુતિકૃત્ત્વમેવ સ્તુતિસ્ત્વમેવ ત્વદૃતેઽસ્તિ નાન્યત્ ।
ઇયં ત્વવિદ્યા યદહં સ્તુવે ત્વાં સ્તુત્યેતિ મિથ્યા પૃથગર્થબુદ્ધિઃ ॥ ૨॥

સ્તૌમ્યેવ તત્રાપિ પુનઃ પુનસ્ત્વાં નશ્યત્યવિદ્યા યદવિદ્યયૈવ ।
રજઃપ્રરૂઢં મુકુરે પ્રમાર્ષ્ટું રજો વિના ન હ્યપરોઽસ્ત્યુપાયઃ ॥ ૩॥

વિજૃમ્ભમાણે તમસિ પ્રગલ્ભે યથા ભવાસક્તમતિઃ સ્થિતોઽહમ્ ।
હતેઽપિ તસ્મિન્નુદિતાવબોધસ્તથા ભવાસક્તમતિર્ભવેયમ્ ॥ ૪॥

જગદ્વિધેયં સસુરાસુરં તે ભવાન્ વિધેયો ભગવન્ કૃપાયાઃ ।
સા દીનતાયા નમતાં વિધેયા મમાઽસ્ત્યયત્નોપનતૈવ સેતિ ॥ ૫॥

જાને ન શૈથિલ્યમુપૈષ્યવશ્યં મમાર્તિભઙ્ગે ભગવઁસ્તથાપિ ।
વિજ્ઞાપ્યસે કર્મ મમૈવ માભૂન્મયિ પ્રસાદપ્રતિઘસ્તવેતિ ॥ ૬॥

પથ્યં ચ તથ્યં ચ ભરક્ષમં ચ સ્નિગ્ધં ચ મુગ્ધં ચ મનોહરં ચ ।
સલીલમુન્મીલ્ય વચઃ પ્રસન્નં પ્રપન્નમાશ્વાસય ચન્દ્રમૌલે ॥ ૭॥

મધુદ્રવાર્દ્રં વિષમાહરામઃ પિણ્ડીનિગૂઢં બડિશં ગિલામઃ ।
અન્તર્નિવિષ્ટોત્કટકણ્ટકૌઘં ગ્રસામહે પૌણ્ડ્રક(પુણ્ડ્રક)પિણ્ડખણ્ડમ્ ॥ ૮॥

યદા મુખે કામધુરાનજસ્રં વિપાકરૂક્ષાન્ વિષયાન્ ભજામઃ ।
વિભો વિદન્તોઽપિ કિમત્ર કુર્મો જહાતિ સક્તિં ન મતિર્વરાકી ॥ ૯॥

મુક્તામયા દીર્ઘગુણાઃ સુવૃત્તા નૈર્મલ્યભાજો દધતઃ ફલર્દ્ધિમ્ ।
કથં ન હારા ઇવ ભક્તિમન્તઃ પદં હૃદીશસ્ય ભજન્તિ સન્તઃ ॥ ૧૦॥

ગુહાશ્રિતો ધર્મરતિર્ગિરીશપ્રથાં દધાનો ભવતઃ પ્રસાદાત્ ।
સત્યાહિતપ્રીતિરહીનભક્તિર્ભવાનિવાહં ભગવન્ ભવેયમ્ ॥ ૧૧॥

યમેકમારાધ્ય મહારિસઙ્ગમા-
દસંશયં ભક્તજનઃ પ્રમુચ્યતે ।
ઉપસ્થિતસ્તસ્ય ભવત્પ્રસાદતઃ
કથં હરેરુગ્ર મહારિસઙ્ગમઃ ॥ ૧૨॥

સુદુર્લભોઽયં ભવતિ ગ્રહઃ પુન-
ર્મુખેઽપ્યસૌ સન્નિહિતા સરસ્વતી ।
ઇદં કુરુક્ષેત્રમતીવપાવનં

કિમર્થમર્થિન્યુચિતે વિલમ્બસે ॥ ૧૩॥

ન કસ્ય સૌભાગ્યવતી ચમત્કૃતિં
દિશત્યસૌ ભાગ્યવતી સરસ્વતી ।
વિભું જિતક્લેશમપિ સ્થિરાજિનં
કરોતિ યત્સમ્મુખમસ્થિરાજિનમ્ ॥ ૧૪॥

અનુજ્જ્ઝિતાનુત્તમદાનસમ્પદઃ
સદાખિલજ્ઞાનવિહીનચેતસઃ ।
અકાલભીતિગ્લપિતાન્કરોતિ યઃ
પ્રભુઃ પ્રસન્નઃ કુપિતશ્ચ દેહિનઃ ॥ ૧૫॥

પુરા ચિરં યો વિદધે વનાન્તરે
વિધુઃ પદં રૂઢકુરઙ્ગસૌહૃદઃ ।
સદા પરસ્વાપહરોઽપિ યો રવિ-
સ્તયોઃ સમત્વં દૃશિ યસ્ય ભાસતે ॥ ૧૬॥

કથં વિભો તસ્ય તવ પ્રવર્તતાં
સતામસેવ્યે પથિ પાતિતાત્મસુ ।
દયાવિધેયસ્ય સદાઽસ્મદાદિષુ
પ્રસાદપાત્રેષુ મનાગનાદરઃ ॥ ૧૭॥

વિભો ભવદ્ભાલવિલોચનાઽનલ-
પ્રસૂતધૂમૈરિવ સાશ્રુલોચનઃ ।
સધર્મલેશસ્તવ દક્ષિણેક્ષણ-
પ્રરૂઢચણ્ડદ્યુતિભાભરૈરિવ ॥ ૧૮॥

ઘનપ્રરોહત્પુલકાઙ્કુરો ભવ-
ચ્છિખણ્ડખણ્ડેન્દુકરોત્કરૈરિવ ।
સદન્તવીણસ્તુહિનૌઘશીતલ-
ત્વદુત્તમાઙ્ગદ્યુનદીજલૈરિવ ॥ ૧૯॥

તરઙ્ગિતાઙ્ગો ભવદઙ્ગદસ્ફુર-
ત્ફણીન્દ્રફૂત્કારસમીરણૈરિવ ।
ભવેયમાનન્દસુધાપરિપ્લુતઃ
પ્રસન્નમાલોક્ય ભવન્તમગ્રતઃ ॥ ૨૦॥

યદેષ સેહે પરશુક્ષતવ્યથાં
પ્રભોઃ પ્રિયઃ સ્યામિતિ ચન્દનદ્રુમઃ ।
ભુજઙ્ગમાલિઙ્ગિતકન્ધરો ધ્રુવં
બિભર્તિ સામ્યં ગિરિજાપતેરતઃ ॥ ૨૧॥

યચ્ચક્રિરે ધૃતનખાન્તનિપાતપીડાઃ
પ્રીતિં પ્રભોઃ સુમનસાં સુમનસ્ત્વમેતત્ ।
યત્સ્વામિનો ન દહનેઽપિ નિપત્ય સેવા-
હેવાકમૌજ્ઝદગુરોરપિ ગૌરવં તત્ ॥ ૨૨॥

આદૌ પ્રદર્શ્ય પરમામૃજુતામથાન્ત-
રાવિશ્ય મર્મણિ ન યન્નિશિતાસ્તુદન્તિ ।
સ્વામિન્ શરા ઇવ ખલાઃ કૃતિનો વનેષુ
સ ત્વત્પદામ્બુજરજઃકણજઃ પ્રસાદઃ ॥ ૨૩॥

ત્વન્નામ પામરજનૈરપિ ગીયમાન-
માનન્દમર્પયતિ યં હૃદિ ભક્તિભાજામ્ ।
સ્વામિન્નમાનવયવેષ્વખિલેષુ નૂન-
મુદ્ભિદ્યતે બહિરસૌ પુલકચ્છલેન ॥ ૨૪॥

ઘર્મઃ પ્રકમ્પપુલકૌ ગિરિ ગદ્ગદત્વ-
મિત્યાદયોઽન્ત્યસમયે પ્રભવન્ત્યવસ્થાઃ ।
ત્વદ્દર્શનાત્કૃતધિયાં દધતામમન્દ-
માનન્દમન્તકભયાદ્ભગવન્ પરેષામ્ ॥ ૨૫॥

અન્ત્યક્ષણે ભવ ભવચ્ચરણાબ્જસેવા-
હેવાકિનો દધતિ કેચન કણ્ઠપીઠે ।
ભોગીન્દ્રભોગમધિગમ્ય ભવદ્ગુણત્વ-
મન્યે કૃતાન્તકરકોટરકોટિકૃષ્ટમ્ ॥ ૨૬॥

ભીતાભયાર્પણવિધૌ કિલ કાલનાશં
કર્તું ન યઃ ક્ષણમપિ ક્ષમતે કદાપિ ।
શ્વેતાભયાર્પણપરસ્ય કથં નુ કાલ-
નાશક્ષમત્વમભવત્તવ તસ્ય દેવ ॥ ૨૭॥

ભઙ્ક્તું ન પારયતિ યઃ ક્વચિદેવ દેવ
કામં કૃપામૃતમૃદુસ્તવ દૃષ્ટિપાતઃ ।

ઉદ્દામરોષપરુષઃ કિલ કામભઙ્ગ-
મઙ્ગીચકાર કથમેષ મહેશ પૂર્વમ્ ॥ ૨૮॥

કિં મેરુમન્દરમુખા ગિરયઃ શિરોભિ-
રત્યુન્નતૈર્દધતિ ગર્વમખર્વમેતે ।
એતત્તુષારકિરણાભરણપ્રણામ-
પ્રહ્વં જગજ્જયતિ મામકમુત્તમાઙ્ગમ્ ॥ ૨૯॥

ગાત્રાન્તરાતિશયશંસિ યદેતદુચ્ચૈ-
ર્નામોત્તમાઙ્ગમિતિ નાથ શિરો બિભર્તિ ।
તદ્યુજ્યતે ભવ ભવચ્ચરણારવિન્દ-
પીઠપ્રણામપરમસ્ય નમસ્યમસ્ય ॥ ૩૦॥

કિં શ્રીઘનોઽપ્યસુગતઃ કિમુમાધવોઽપિ
ન ત્વં કદાચન જનાર્દનતાં બિભર્ષિ ।
સ્વામિન્ ગજારિરપિ કિં નગજાપ્રિયસ્ત્વં
સ્વાતન્ત્ર્યમસ્તિ યદિ વા ભવતઃ કિમન્યત્ ॥ ૩૧॥

અરુણદ્યુતિગ્લપિતશીતદીધિતિ-
પ્રકટીકૃતાલિકમલં વિલોક્ય મે ।
ભવતઃ પ્રભાતમિવ ભાલલોચનં
ભજતે કદા નુ વિષમં શમં તમઃ ॥ ૩૨॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“તમઃશમનં” નામકં દ્વાદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૩. પ્રભુપ્રસાદનં ત્રયોદશં સ્તોત્રમ્

અથ નુતિભિરમન્થરાક્ષરાભિઃ સુજનમનોમૃગવાગુરાભિરાભિઃ ।
વિભુમભયદમાદરાદરાતિક્ષપણપણપ્રવણં પ્રસાદયામઃ ॥ ૧॥

સુરમુકુટવિટઙ્કરત્નરોચિઃખચિતનખાઙ્કુરકેસરાભિરામમ્ ।
પુરહરચરણારવિન્દયુગ્મં શિરસિ વિધત્ત કિરીટવાઞ્છયા કિમ્ ॥ ૨॥

કલયતુ ભવતામભગ્નવૃત્તિર્હરહરશઙ્કરશઙ્કરેતિ સૂક્તિઃ ।
અવિરલગલમણ્ડનપ્રતિષ્ઠાં કિમમલમૌક્તિકદામકામનાભિઃ ॥ ૩॥

કલયત મણિકુણ્ડલેઽવલેપં શ્લથયત નિર્મ્મલમલ્લિકાભિલાષમ્ ।
હરચરિતનુતિક્રમૈરજસ્રં કુરુત નવશ્રવણાવતંસલીલામ્ ॥ ૪॥

ઇહ વિહતભવોપતાપમાપત્પ્રશમસમર્થમનર્થનાશહેતુમ્ ।
નમતિ ન મતિમાનમાનવીયપ્રમદવિધાનપરં પરં હરં કઃ ॥ ૫॥

ત્રિજગતિ ભજતિ સ્થિતિં બુધાનાં ધુરિ દુરિતક્ષતિશિક્ષિતઃ સ એકઃ ।
શશિશકલશિખામણિપ્રણામપ્રણયિ બિભર્તી શિરશ્ચિરસ્થિરં યઃ ॥ ૬॥

સ જયતિ જગદીશશક્તિપાતસ્તવ કવિતુર્યદસક્તમુક્તિદેવી ।
રસમસમચમત્કૃતિપ્રસૂતિં વિતરતિ કાઞ્ચનસિદ્ધિમેતિ યેન ॥ ૭॥

ઇહ વિદધતુ નામ પામરાણાં પ્રણતિકૃતામપરે પ્રભુપ્રતીતિમ્ ।
પ્રભવતિ ન તુ મૃત્યુભીતિભઙ્ગે જગતિ ભવન્તમૃતેઽમૃતેશ કશ્ચિત્ ॥ ૮॥

વિયદિયતિ મહસ્વિમણ્ડલે કઃ શ્રિતવતિ કર્તુમનષ્ટચેષ્ટમીષ્ટે ।
વિષમતમતમઃ પ્રબન્ધમન્ધં જગદગદં ઘૃણિમન્તમન્તરેણ ॥ ૯॥

શકલિતકલિતર્ષ સપ્રકર્ષ પ્રકટિતહર્ષ મહર્ષભાધિરૂઢ ।
દિશ વિશદમદભ્રમભ્રસિન્ધુદ્રવધવલં ભવલઙ્ઘનં પ્રસાદમ્ ॥ ૧૦॥

પ્રભવતિ ભવતિ પ્રસાદરમ્યાં દિશતિ દૃશં ન વિભા વિભાવરીણામ્ ।
સવિતરિ વિતરિષ્યતિ પ્રકાશં નહિ મહિમપ્રભવો વિભાવરીણામ્ ॥ ૧૧॥

સમુચિતસદસદ્વિચારચર્યાચતુરતરઃ કતરઃ કલૌ મદન્યઃ ।
ઇહ પરમશિવં ભવં વિજેતું પરમશિવં ભવમેવ સેવતે યઃ ॥ ૧૨॥

શમયિતુમલમગ્નિમગ્નિરેવ ગ્લપયતિ હન્ત હિમં હિમં વિવૃદ્ધમ્ ।
જરયતિ ચ પયઃ પયઃ કિમન્યદ્ધરતિ ભવં ભવ એવ ભક્તિભાજામ્ ॥ ૧૩॥

વરમજિનજટાભૃતઃ કપાલપ્રણયિકરસ્ય નરસ્ય ભૈક્ષ્યવૃત્તિઃ ।
સ્મરહરચરણારવિન્દસેવાવિરહવતી ન તુ ચક્રવર્તિમૂર્તિઃ ॥ ૧૪॥

મરુભુવિ વરમુષ્ણરશ્મિરશ્મિપ્રકરકદર્થિતમૂર્તિરેકભેકઃ ।
ન તુ ભવદનુરાગભાગધેયગ્લપનવિપદ્વિકલીકૃતો મનુષ્યઃ ॥ ૧૫॥

કલિમલપટલી મલીમસત્વં નયતિ મતિં હતદર્પ દર્પણાભામ્ ।
ઇતિ શિતિગલ શીતરશ્મિપ્રસરસિતં રસિતં તવાઽર્થયામઃ ॥ ૧૬॥

નુતિમુખરમુખઃ પ્રસાદપાત્રં ભવતિ મમેતિ યદૈષ તે કૃતાન્તઃ ।
અપિ કવલિતસમલોકલોકઃ પ્રભવતિ નૈવ તદૈષ મે કૃતાન્તઃ ॥ ૧૭॥

તવ રવિજપુરાન્ધકપ્રમાથે દૃશિ વિશિખે ત્રિશિખે ચ યઃ કૃતાસ્થઃ ।
પરિચરણપરઃ પુરાવિરાસીત્ સ જયતિ દૈવતમુત્તમં કૃશાનુઃ ॥ ૧૮॥

સમજનિ જનિતસ્પૃહઃ સ એકસ્ત્રિજગતિ ચન્દ્રકિરીટ કૃષ્ણસારઃ ।
ઉપકરણપદં જગામ કૃત્તિસ્તવ ચરણાસ્તરણક્રમેણ યસ્ય ॥ ૧૯॥

જનિરપિ જયતિ વિનીતરીતિર્જગતિ ભુજઙ્ગમપુઙ્ગવસ્ય તસ્ય ।
મણિકટકમુદસ્ય યસ્ય શસ્યં ભવ ભવદઙ્ગદભઙ્ગિમેતિ ભોગઃ ॥ ૨૦॥

અલભત ભગવન્નબન્ધ્યમેકસ્ત્રિભુવનસીમનિ જન્મ પુઙ્ગવેન્દ્રઃ ।
તવ ભવ શવભસ્મરૂષિતોંઽઘ્રિઃ શિરસિ ધૃતો વિનયાનતેન યેન ॥ ૨૧॥

જનયતિ જગતિ સ્પૃહાં ન કેષાં જનિરપિ કુઞ્જરશેખરસ્ય તસ્ય ।
ત્રિભુવનમહિતસ્ય યસ્ય કૃત્તિર્ભવ ભવદમ્બરડમ્બરં બિભર્તિ ॥ ૨૨॥

સ જયતિ જિતકાલ કાલકૂટઃ સ્વજનિપવિત્રિતમુગ્ધદુગ્ધસિન્ધુઃ ।
તવ કવલભુવં જવાદવાપ્તઃ કલયતિ યઃશિતિકણ્ઠ કણ્ઠપીઠમ્ ॥ ૨૩॥

પરિણતશરદિન્દુસુન્દરાભં વદનમનભ્રનભોનિભશ્ચ કણ્ઠઃ ।
ઇતિ શુભમુભયં વિભોરભિન્નત્રિદશધુનીયમુનાવિડમ્બિ વન્દો ॥ ૨૪॥

હિમહિમકરહારિ વારિ ગાઙ્ગં કુવલયકાન્તિકલિન્દકન્યકામ્ભઃ ।
ઇતિ શુભમુભયં પ્રભુપ્રસાદાદ્વપુરિવ હારિહરં વરં પ્રપદ્યે ॥ ૨૫॥

ધૃતકુટિલકલઃ કિલાન્ધકારી રુચિતમલીમસભોગિભોગયોગઃ ।
ત્વયિ સપદિ પરાઙ્મુખે યથાઽહં ત્વમિવ મહાકલિકાલભગ્નશક્તિઃ ॥ ૨૬॥

કવલિતવિષમક્લમં દધાનઃ સતતસમાશ્રિતતારકારિરૂપમ્ ।
દ્વિજપતિમુકુટસ્તથૈવ જાતુ ત્વમિવ શિવ ત્વયિ સમ્મુખે ભવેયમ્ ॥ ૨૭॥

જય જયદ વચો વિમુઞ્ચ મુઞ્ચન્મધુ મધુરં જનરઞ્જનપ્રગલ્ભમ્ ।
હર હર દુરિતં મમાઽદ્ય માદ્યદ્ભવ ભવ ભીમદભીમદર્શનસ્ત્વમ્ ॥ ૨૮॥

નિજવૃજિનવિજૃમ્ભિતં મમૈતત્ત્રિજગદનુગ્રહનિત્યદીક્ષિતસ્ત્વમ્ ।
ક્વચિદપિ ભગવન્નદૃષ્ટપૂર્વં પ્રથયસિ યન્મયિ વિહ્વલેઽવલેપમ્ ॥ ૨૯॥

પ્રણમતિ વિધુરે પુરોઽવલગ્ને દધતિ મયિ પ્રસભં ગદાભિયોગમ્ ।
કિમિતિ પરિજને દયામૃતાર્દ્રાં દૃશમપકારવતીવ નો દધાસિ ॥ ૩૦॥

સ્ફુટવિકટવિકસ્વરપ્રદીપ્તજ્વલનમહીનમહીન્દ્રહાર ચક્ષુઃ ।

બલવદલવદર્પકાલકામક્ષયકરમાકરમાશુ મુઞ્ચ સિદ્ધેઃ ॥ ૩૧॥

હિમકરમકરધ્વજૌ ન રૂપં કવિધિષણૌ ધિષણૌચિતીં ન તીવ્રામ્ ।
રણમરુણમરુત્સખૌ જિગીષોરનુહરતો હરતોષિણો ન તેજઃ ॥ ૩૨॥

રવિકરવિકસત્સિતાબ્જશુભ્રપ્રસૃમરચામરચારુહાસિની શ્રીઃ ।
ભવ ન ભવનમુજ્ઝતિ ક્ષણં યત્સુકૃતવતાં તવ તાં પ્રણૌમિ શક્તિમ્ (ભક્તિમ્)॥ ૩૩॥

યદભયદ ભવત્યવસ્થિતેઽન્તઃ સમહિમ નો હિ મનો વિશોકમાસીત્ ।
વિશદવિશદકર્મકર્દમે તત્સપદિ વિષાદિ વિષાદ કેન જાતમ્ ॥ ૩૪॥

નયવિનયવિશુદ્ધમન્તરુદ્યદ્દહનસમાનસમાપ્તરોષદોષમ્ ।
યમનિયમનિયન્ત્રિતં મનો મે કુરુ સવિલાસવિલાસિનીવિરક્તમ્ ॥ ૩૫॥

અવસરસરસાલસાલઘૂર્ણન્મધુરવધૂરવધૂતચિત્તચિન્તઃ ।
સ સકલકલધૌતધૌત મૂર્તિસ્તવ નતિમાનતિમાત્રચિત્રચિદ્યઃ ॥ ૩૬॥

મલમલમલઘું વિહન્તુમાપ્તું મુદમુદયં સમયં સમર્થ્ય ચાન્તઃ ।
મહમહમહહેશ્વરપ્રશંસામયમયમાશ્રયમાશ્રયં સુખાનામ્ (ગુણાનામ્)॥ ૩૭॥

ગુણિભિર્વિબુધૈર્હરીન્દ્રમુખ્યૈર્ભવ સંસારરિપોર્દ્વિષઃ સ્તુતસ્ય ।
હિતમાતનુતે તવ પ્રસાદાદસુહૃત્પ્રાણહરોઽપિ પુણ્યભાજામ્ ॥ ૩૮॥

અપિ નાથ જનાર્દનસ્ય વિષ્ણોરપિ વૈકુણ્ઠ ઇતિ પ્રસિદ્ધિભાજઃ ।
અધિકંસરુષોઽપિ ચેદ્ભવત્તો ઝગિતિપ્રાગભવત્સુદર્શનાપ્તિઃ ॥ ૩૯॥

અપિ સર્વજનાઽવિરુદ્ધબુદ્ધેરપિ તીક્ષ્ણસ્ય પરં જિતક્રુધોઽપિ ।
ન કથં મમ સાધુનાઽપિ યદ્વા જગદીશોઽસિ વિભુઃ કિમુચ્યતે તે ॥ ૪૦॥

સુમનઃસુલભે તથા ન નાકે સુમનઃસુન્દરસૌરભે ન ચાસ્થામ્ ।
સુમનઃસુ ચ નાશ્નુતે સુધાર્દ્રાસુ મનઃ સુષ્ઠુ યથા ભવત્કથાસુ ॥ ૪૧॥

શ્રીર્દેવી જયતિ યયા કટાક્ષિતાનાં હસ્તસ્થા સકલસમીહિતાર્થસિદ્ધિઃ ।
સા યસ્માદજનિ તમબ્ધિમર્ભકાય પ્રાદાદ્યઃ કથમિવ વર્ણ્યતે સ દેવઃ ॥ ૪૨॥

નાર્હત્યમન્દરયમન્દરયત્નલબ્ધા
સ્પર્ધાં સુધા ન વસુધાઽનવધિશ્ચ યસ્ય ।
સોઽયં નવઃ શિવનવઃ શિવતાતયેઽસ્તુ
વિદ્વત્સભાજનસભાજનભાજનં વઃ ॥ ૪૩॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે

ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“પ્રભુપ્રસાદનં” નામ ત્રયોદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૪. હિતસ્તોત્રં ચતુર્દશં સ્તોત્રમ્

યેન નેત્રકરશેખરસ્પૃશા હન્તિ સન્તમસમન્તરીશ્વરઃ ।
ઐન્દવં દવથુહારિ હારિ તદ્ધામ કામદમદભ્રમસ્તુ વઃ ॥ ૧॥

ભક્તિનિર્ભરગભીરભારતીવૈભવો ભવ ભવન્નવેષુ યઃ ।
શુષ્કશષ્પમિવ તસ્ય ભાસતે વાસવાસનપરિગ્રહગ્રહઃ ॥ ૨॥

ઉલ્લસત્પુલકલાઞ્છિતં વપુર્બાષ્પપૂરિતપુટે વિલોચને ।
ગદ્ગદા હરહરેતિ ભારતી સમ્ભવન્તિ ભવભક્તિશાલિનામ્ ॥ ૩॥

નીલકણ્ઠ તરુણેન્દુશેખર ત્ર્યમ્બક ત્રિનયનેતિ ભક્તિતઃ ।
ગદ્ગદં નિગદતસ્તૃણોપમં હેમપૂર્ણમખિલં મહીતલમ્ ॥ ૪॥

અન્તકભ્રુકુટિભીતિવિહ્વલશ્ચેતસાન્ત્વનવિધૌ બભૂવ યત્ ।
માં પ્રતિ પ્રતિપદં કદર્થિતં તત્ક્વ સમ્પ્રતિ કૃપામૃતં તવ ॥ ૫॥

વહ્નિશીતકરઘર્મરશ્મયો લોચનત્રિતયવર્તિનસ્તવ ।
શીતતાપતિમિરાર્દિતસ્ય મે નાથ ચિત્રલિખિતા ઇવ સ્થિતાઃ ॥ ૬॥

સમ્ભ્રમભ્રમદમન્દમન્દરક્ષીરનીરધિગભીરયા ગિરા ।
ત્રાતુમર્હસિ કૃતાન્તકિઙ્કરૈર્મામશર્મભિરભિદ્રુતં દ્રુતમ્ ॥ ૭॥

કાલકિઙ્કરકરાન્તરસ્ફુરદ્ભોગભોગિપરિણદ્ધકન્ધરમ્ ।
અન્તરેણ ભવદીયહુઙ્કૃતિં નાથ મોચયિતુમુત્સહેત કઃ ॥ ૮॥

ઉત્કટભ્રુકુટિભીમદર્શનદ્વાઃસ્થહુઙ્કૃતિખલીકૃતાત્મભિઃ ।
દ્વારિ યઃ ક્ષિતિભુજાં પરાભવઃ સહ્યતે દ્રવિણલેશતૃષ્ણયા ॥ ૯॥

સ ત્વદાયતનદેહલીતલે પુષ્પપાત્રકરપત્રિકાકરમ્ ।
કઞ્ચિદેવ ભવદર્ચનોત્સુકં ચન્દ્રશેખર કરોતિ કાતરમ્ ॥ ૧૦॥

અન્તરેણ ભવદઙ્ઘ્રિસેવનં દેવ કેવલમિયં વિડમ્બના ।
યન્નૃણાં કમલિનીદલસ્ખલન્નીરશીકરચલા વિભૂતયઃ ॥ ૧૧॥

યત્તુ નિર્જરતરઙ્ગિણીતટે સૌહૃદંહરિણબાલકૈઃ સમમ્ ।
ભૂભૃતાં ચ તૃણવદ્વિલોકનં શ્રીરિયં ભવ ભવત્પ્રસાદતઃ ॥ ૧૨॥

ત્વામુપેત્ય શરણં મહેશ્વરં દેવ નિઃશરણ એવ ચેદહમ્ ।
દોષ એષ મમ જાહ્નવીજલે તર્ષુલો હિ શફરઃ સ્વદુષ્કૃતૈઃ ॥ ૧૩॥

ગદ્ગદોદ્ગતગિરશ્ચિરસ્થિરપ્રેમહેમનિકષોપલોપમમ્ ।
શંસતઃ શિવ શિવેતિ શામ્ભવં નામ કામપિ દશાં પ્રશાસ્તિ મે ॥ ૧૪॥

વારિ વારિતભવાર્તિ મૂર્ધ્નિ તે ભાતિ ભાઽતિધવલે હિમત્વિષઃ ।
તેન તે નતિમિમો દવચ્છિદે દેહિ દેહિષુ કરાવલમ્બનમ્ ॥ ૧૫॥

મૂઢમૂઢવિપદં પદં શુચામન્ધમન્ધકરિપોઽરિપોથિતમ્ ।
મોઘમોઘમિતમેતમેનસાં માં તમાન્તકરતાર તારય ॥ ૧૬॥

યં સ્વયં સ્વરસભૈરવૈ રવૈરક્ષર ક્ષપિતરાક્ષસેક્ષસે ।
મારમાર ભુવિ ભાસતે સ તે ભાનુભાનુભરભાસુરઃ સુરઃ ॥ ૧૭॥

બાણબાણકૃતપૂજનૈર્જનૈરાદરાદઘટિ યૈસ્તવં સ્તવઃ ।
વાસ્તવાસ્તવ ત એવ તાવતા બન્દિવન્દિતયશોગણા ગણાઃ ॥ ૧૮॥

ત્વાં સતામરસવાસવાઽઽસવાઃ જ્ઞાતદુર્ગમગમાગમાઽઽગમાઃ ।
અર્ચયન્તિ સદિનં દિનન્દિનં ગીર્ભિરમ્બરસદઃસદઃ સદઃ ॥ ૧૯॥

ન મે તથા પ્રીતિમનેકપાલી કરોતિ નો વા દયિતાઽઙ્કપાલી ।
યથોક્તિદેવી સ વિભુઃ કપાલી યયાઽર્ચ્યતે સેવકલોકપાલી ॥ ૨૦॥

ભવન્તમારાધ્ય પરાર્ધ્યવૈભવં ભવં વિધાય દ્વિષતાં પરાભવમ્ ।
ભવં ચ જિત્વા જહતઃ પુનર્ભવં ભવન્તિ મુક્તાઃ પદમાપ્ય શામ્ભવમ્ ॥ ૨૧॥

ન વંશવૃત્તેર્ગણયામિ તાનવં ન બન્ધુરં કઞ્ચન નૌમિ માનવમ્ ।
નવં તવાનન્દિતદેવદાનવં ન વઞ્ચિતોઽહં રચયન્સદા નવમ્ ॥ ૨૨॥

ધનઞ્જયાક્ષં સકલાર્થસાધનં ધનઞ્જયારાધિતમાધિબાધનમ્ ।
ધનં વિદિત્વા વિપદાં વિશોધનં ધનન્તિ ધન્યા વિભુમૃદ્ધિવર્ધનમ્ ॥ ૨૩॥

કલાપિનઃ પ્રાવૃષિ યદ્વદમ્બુદધ્વનિર્ઘનાનન્દવિશઙ્કુલાપિનઃ ।
કલાપિનદ્ધસ્ફુટજૂટધારિણસ્તથાઽમૃતં વર્ષતુ ગીઃ કલાપિ નઃ ॥ ૨૪॥

નૃજન્મ તસ્યૈવ ભવાનવદ્યં ભવાનવદ્યન્દવમીક્ષતે યમ્ ।
ત્યજત્યજાતોપરમા સમાનં રમાઽસમાનન્દકરી ન ચૈનમ્ ॥ ૨૫॥

અતઃ પરં જગતિ કિમસ્તિ નીરસં યદુક્તમપ્યસકૃદુદીર્યતે વચઃ ।
સહસ્રશશ્ચિરમપિ ચર્વિતા પુનર્નવન્નવં સ્રવતિ રસં શિવસ્તુતિઃ ॥ ૨૬॥

મૃત્યું મૃત્યુઞ્જય જય જગદ્ભસ્મરં ભસ્મભાવં
કામં કામં નય નયનજોદ્દામધામચ્છટાભિઃ ।
ભવ્યાભ વ્યાકુલકુલવધૂરુત્કયેત્યાચરન્તં
સત્રાસત્રાણચણ ચરિતાન્યદ્ભુતાનિ સ્તુમસ્ત્વામ્ ॥ ૨૭॥

યત્તત્સર્ગનિસર્ગનિર્મિતિકરં યદ્રાવણદ્રાવણ-
વ્યાપારાઽવસરાવસક્તમથ યત્સંવર્તસંવર્તકમ્ ।
સ્વાભાસં ભવસમ્ભવસ્થિતિલયસ્ફારોચિતં રોચિતં
ભાસા કારણકારણં દિશતુ તદ્ધામેહિતં મે હિતમ્ ॥ ૨૮॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"હિતસ્તોત્રં" નામ ચતુર્દશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૫. કરુણારાધનં પઞ્ચદશં સ્તોત્રમ્

અધુના તપસેવ દેવતામભિ યોગેન સરસ્વતીમિવ ।
સુહૃદેવ સમીહિતાં શ્રિયં પ્રગુણેનેવ ગુણેન સંસદમ્ ॥ ૧॥

પ્રતિભામિવ કાવ્યકર્મ્મણા વસુના કીર્તિમિવાર્થિગામિના ।
મનસીવ શમેન નિર્વૃતિં સુકૃતેનેવ પરત્ર સદ્ગતિમ્ ॥ ૨॥

કરુણાં હરિણાઙ્કલક્ષ્મણઃ સકલાર્થાઽર્પણકલ્પવલ્લરીમ્ ।
વિપદન્તકરીમુપાસિતું સ્તુતિલેશેન મનઃ પ્રવર્તતે ॥ ૩॥

કરુણાં ભવતો વિકાસિનીમમલૈરીશ ગુણૈરલઙ્કૃતામ્ ।
નલિનીમલિનીવ ભારતી ભજતીયં મમ વલ્ગુવાદિની ॥ ૪॥

ઉપલક્ષ્ય તવાન્ધકારિતાં મયિ ધત્તે પદમન્ધકારિતા ।
વિષમામવલોક્ય તે દૃશં મમ દૃષ્ટિર્વિષમત્વમશ્નુતે ॥ ૫॥

તવ વીક્ષ્ય વૃષાધરીકૃતિં ઘટતે મેઽપિ વૃષાધરીકૃતિઃ ।
ધૃતવક્રકલત્વમીક્ષ્ય તે પ્રથતે વક્રકલત્વમેવ મે ॥ ૬॥

તવ વીક્ષ્ય ચ ભગ્નકામતામુદિતેયં મમ ભગ્નકામતા ।
કરુણામપિ તે સમીક્ષ્ય મે કરુણા ગીર્ન કથં પ્રવર્તતામ્ ॥ ૭॥

સસુરાસુરમાનુષં જગદ્યદધીનં સ ભવાનપીશ્વરઃ ।
વશવર્તિપદે યયાઽર્પિતો જયતીયં કરુણૈવ તાવકી ॥ ૮॥

કરુણા તવ જીવિતેશ્વરીમતિશેતે ભગવન્નુમામપિ ।
ઉમયા હૃતમર્ધમેવ યત્સકલસ્ત્વં પુનરેતયા હૃતઃ ॥ ૯॥

કરુણા તવ શસ્યતે યયા જિતકામોઽપિ ભવાન્ વશીકૃતઃ ।
ઇદમન્યદિયં યદમ્બિકામપિ દેવીમનયદ્વિધેયતામ્ ॥ ૧૦॥

જગદમ્બુભુવા ભુવામ્ભસા સિતભાસા નભસા નભસ્વતા ।
ધૃતમુષ્ણરુચાત્મના ચ યત્કરુણાયા મહિમા તવેશ સઃ ॥ ૧૧॥

અહતપ્રસરાં પ્રસાદિનીં સહસાઽપોહિતતાપસમ્પદમ્ ।
શરણં કરુણાતરઙ્ગિણીં પ્રતિપદ્યે તવ દેવ પાવનીમ્ ॥ ૧૨॥

પ્રણયેન ચિરં પ્રસાદિતા મદનાશાકુલિતેન ચેતસા ।
તરુણી કરુણા કરોતિ તે ન કથં નાથ હૃદિ સ્થિરં પદમ્ ॥ ૧૩॥

ભુજગા ઇવ ચન્દનદ્રુમં ગ્લપયન્તો વિષમા નયન્તિ મામ્ ।
પરિહાર્યદશામરાતયો મદમાનપ્રમુખા ધૃતિચ્છિદઃ ॥ ૧૪॥

કરુણામરુણાઽનુજન્મનસ્તનુમુચ્ચૈરિવ પક્ષપાતિનીમ્ ।
સમુપૈમિ ધૃતાચ્યુતશ્રિયં શરણં ભૂધરપુત્રિકાપતેઃ ॥ ૧૫॥

સ્ફુરિતારુણચારુચક્ષુષા વપુષા નિર્ભરઘર્મવિપ્રુષા ।
પરુષાશયતામુપેયુષા સરુષા યત્પ્રહરન્તિ યોષિતઃ ॥ ૧૬॥

ભગવન્ દૃઢબદ્ધમૂલયોર્દ્વિષતોરેષ સહસ્રશાખયોઃ ।
અવિષહ્યનિપાતપીડયોરનુભાવઃ કુસુમેષુરોષયોઃ ॥ ૧૭॥

અનયોઃ કરુણૈવ તાવકી નિયતં મૂલનિકૃન્તનક્ષમા ।
યમલાઽર્જુનયોરિવોર્જિતા શિશુલીલા નરકાન્તકારિણઃ ॥ ૧૮॥

ન વિધિર્નિધિલાભસમ્ભૃતો ન વિનોદો મૃગનાભિસમ્ભવઃ ।
ન ચ શારદચન્દ્રચન્દ્રિકા ન કલં કોકિલકણ્ઠકૂજિતમ્ ॥ ૧૯॥

ન શિશોરસમઞ્જસં વચો ન મૃગાક્ષીપરિરમ્ભવિભ્રમઃ ।
મધુરા ન કવીન્દ્રભારતી ન ચ સામ્રાજ્યવિભૂતિજૃમ્ભિતમ્ ॥ ૨૦॥

ન રસાયનપાનકૌતુકં ન ચ શક્રાસનવાસવાસના ।
પરિપૂરયિતું ક્ષમેત તે કરુણાયા હર ષોડશીં કલામ્ ॥ ૨૧॥

સુરભિર્ન મમ સ્પૃહાસ્પદં સુરભિર્દક્ષિણમારુતોઽપિ વા ।
સુરભિક્ષુવિતીર્ણવાઞ્છિતા સુરભિર્નો કરુણા યથા તવ ॥ ૨૨॥

સમુદેતિ યદશ્રુ શોકજં રુચિરાનન્દમયં વિભાતિ તત્ ।
પુલકઃ પ્રથતે ભયેન યઃ સ ચમત્કારકૃતઃ પ્રવર્તતે ॥ ૨૩॥

ક્લમજં દૃશિ યન્નિમીલનં પરમાર્થાનુભવાદુદેતિ તત્ ।
શરણં કરુણામુપેયુષાં કૃતિનાં ચન્દ્રકિરીટ તાવકીમ્ ॥ ૨૪॥

ભજતઃ સરલેવ ભારતી નરકઙ્કાલકૃતગ્રહસ્ય મે ।
કરુણા પ્રથતામુમાપતે કલિકાલાઞ્છિતવિગ્રહસ્ય તે ॥ ૨૫॥

ભગવન્ મદિરામદોન્મદપ્રમદાપાઙ્ગતરઙ્ગભઙ્ગુરમ્ ।
જરસા તરસાવસાદિતં વપુરાયાતિ ન યાવદાપદમ્ ॥ ૨૬॥

કુપિતાન્તકકિઙ્કરેરિતઃ કુટિલાં તદ્ભ્રુકુટિં વિડમ્બયન્ ।
ન ઘનાઞ્જનપુઞ્જસન્નિભો ભુજગો યાવદુપૈતિ કન્ધરામ્ ॥ ૨૭॥

ન કુકર્મવિપાકકલ્પિતા નરકે યાવદુદેતિ વેદના ।
ગદિતા શમનાનુગામિભિઃ પરુષા ગીરિવ મર્મભેદિની ॥ ૨૮॥

યદિ તાવદિયં ન ગાહતે હૃદયં તે કરુણાતરઙ્ગિણી ।
બત દુઃસહતાપસમ્પદામિતરા કા શરણાર્થિનાં ગતિઃ ॥ ૨૯॥

ન સમાનસમાગમાં તથા પ્રમદાય પ્રમદા યતાત્મનામ્ ।
શિવદા શિવદાસ્યકૃદ્યથા સ્વદમાનસ્વદમાઽનઘા મતિઃ ॥ ૩૦॥

એકઃ પુરન્દરપુરં દરવેલ્લિતભ્રૂઃ
કિંસ્વિજ્જનઙ્ગમજનં ગમયેન્મહર્ષિઃ ।
કિં તામસં પદમસમ્પદમિન્દ્રમન્યો
ધન્યોદયા ભવ દયા ભવતો ન ચેત્સ્યાત્ ॥ ૩૧॥

આર્દ્રે મનસ્યુદિતમાર્તજનોપતાપ-
સમ્પર્કતોઽથ દૃશિ કન્દલિતં શુભાયામ્ ।
વાચિ ક્ષણાત્કુસુમિતં ફલિતં ચ કૃત્યે
કારુણ્યબીજમજરં જયતીન્દુમૌલેઃ ॥ ૩૨॥

રોગૈરુગ્રૈરખિલવિગલત્સૌષ્ઠવો નષ્ટચેષ્ટઃ

પર્યસ્તાઙ્ગોઽશુચિનિ શયને ભગ્નસર્વાભ્યુપાયઃ ।
યાવજ્જીવં વિહિતમહિતં કર્મ કર્તવ્યમૂઢઃ
સ્મૃત્વા સ્મૃત્વા દલિતહૃદયઃ કાતરઃ કાન્દિશીકઃ ॥ ૩૩॥

તર્ષોત્કર્ષાત્કલુષપરુષૈઃ કર્મભિઃ શર્મહૃદ્ભિ-
ર્યત્સમ્પ્રાપ્તં કથમપિ(કૃશમપિ)ભૃશં ક્લેશયિત્વા શરીરમ્ ।
રિક્થગ્રાહૈર્દ્રવિણમખિલં લુણ્ઠ્યમાનં તદગ્રે
પશ્યન્નશ્યત્સકલકરણો દહ્યમાનઃ શુચાન્તઃ(શુચાર્ત્તઃ)॥ ૩૪॥

શોકોદ્રેકાદવિરલગલદ્બાષ્પપૂર્ણેક્ષણાભિઃ
સત્પત્નીભિશ્ચકિતચકિતં(ચકિતૈઃ)લોચનૈરીક્ષ્યમાણઃ ।
પુત્રૈર્મિત્રૈઃ સહજસચિવૈર્બન્ધુભિર્ભૃત્યવર્ગૈ-
રાક્રન્દદ્ભિઃ કરુણકરુણૈઃ પીડ્યમાનઃ પ્રલાપૈઃ ॥ ૩૫॥

સ્વસ્થાવસ્થૈર્ભૃશમશુચિતાશઙ્કિભિર્વેશ્મગર્ભા-
દન્તર્લીનસ્મૃતિરપિ હઠાન્નિષ્ઠુરૈઃ કૃષ્યમાણઃ ।
યસ્મિન્કાલે કવલિતવપુર્મૃત્યુનાઽભ્યેતિ ભીતિં
તત્ર ત્રાતા ક ઇવ કરુણામૈશ્વરીમન્તરેણ ॥ ૩૬॥

વપુઃખણ્ડે ખણ્ડઃ પ્રતિવસતિ શૈલેન્દ્રદુહિતુઃ
શિખણ્ડે ખણ્ડેન્દુઃ સ્વયમપિ વિભુઃ ખણ્ડપરશુઃ ।
તથાપિ પ્રત્યગ્રં શરણમુપયાતં પ્રતિ વિભો-
રખણ્ડો વ્યાપારો જગતિ કરુણાયા વિજયતે ॥ ૩૭॥

જય જિતામય જય સુધામય જય ધૃતામૃતદીધિતે
જય હતાન્ધક જય પુરાન્તક જય કૃતાન્તકસંહૃતે ।
જય પરાપર જય દયાપર જય નતાઽર્પિતસદ્ગતે
જય જિતસ્મર જય મહેશ્વર જય જય ત્રિજગત્પતે ॥ ૩૮॥

સ્થાનાઽસ્થાનનિયન્ત્રણાવિરહિતો નિર્હેતુરપ્રાર્થિતઃ
સત્યં સત્ત્વહિતાર્થ એવ તરણેરમ્ભોભૃતશ્ચોદ્યમઃ ।
તૃષ્ણાતાપશમક્ષમસ્તુ ન રવિર્ન ધ્વાન્તશીતાન્તકૃ-
ન્મેઘઃ સ ત્વખિલાર્તિહૃદ્વિજયતે માહેશ્વરોઽનુગ્રહઃ ॥ ૩૯॥

બહુના કિમત્ર કરુણામુમાપતેઃ સુદશાવતારકૃતમૂર્જિતશ્રિયમ્ ।
ભજતાઽનિરુદ્ધહૃદયેપ્સિતાગમપ્રવણાં વિભૂતિમિવ કૈટભદ્વિષઃ ॥ ૪૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"કરુણારાધનં" નામકં પઞ્ચદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૬. ઉપદેશનં ષોડશં સ્તોત્રમ્

વૃષલક્ષ્મણઃ પ્રણતલોકબન્ધવઃ કલિતાલિકસ્ખલિતસિદ્ધસિન્ધવઃ ।
દ્યુતિભિર્જયન્તિ તુલિતોદિતેન્દવશ્ચરણારવિન્દમકરન્દબિન્દવઃ ॥ ૧॥

અમલૈઃ ફલૈરવિરલૈરલઙ્કૃતા હરિતાઽરુણપ્રણતશાલિશાલિની ।
પ્રતિભાતિ જીર્ણતૃણવત્તવ સ્તવં વસુધા સુધાદ્યુતિવતંસ શંસતઃમ્ ॥ ૨॥

તિમિરં ચિરન્તનમનન્ત સન્તતગ્લપિતાવલોકમવલોકનાર્થિનઃ ।
સૃજતાઽમૃતં દશસુ દિક્ષુ ચક્ષુષાકલિકાલકલ્મષમુષામુષાણ મે ॥ ૩॥

વહતા હતાન્ધતમસામસાદિતાં
દ્યુતિભિઃ કલામવિકલાં કલાવતઃ ।
દિશતા પ્રકાશવિશદાશમાશયં
વપુષા શિવં શિવપુષા પુષાણ મે ॥ ૪॥

ધનઘર્મલઙ્ઘિતકપોલભિત્તયઃ શ્વસિતાનુબન્ધવિધુરીકૃતાધરાઃ ।
ધનિનાં પુરઃ પ્રકટયન્તિ દુર્ગતિં  દ્યુતિહીનદીનવદના ધનાર્થિનઃ ॥ ૫॥

તદનન્તરં તરલિતાક્ષરાં ગિરં ચિરસમ્ભૃતપ્રમદસાદગદ્ગદામ્ ।
વિહિતાવહેલજગતીપતીક્ષિતાસ્ત્રપયાપયાપિતમુખાઃ પ્રયુઞ્જતે ॥ ૬॥

અવધીર્યમાણમથ દીર્ઘમત્સરૈરવબોધવન્ધ્યહૃદયૈરનાદૃતમ્ ।
ગુણકૌશલં શલભજૃમ્ભિતોપમં પ્રથયન્તિ યાન્તિ ચ પરં પરાભવમ્ ॥ ૭॥

ઇતિ દીર્ઘદુર્ભરકુટુમ્બડમ્બરા ધનસઙ્ગ્રહગ્રહગૃહીતચેતસઃ ।
સુધિયોઽપિ યાન્તિ નિબિડં વિડમ્બનં વનવાસિભિઃપ્રહસિતપ્રવૃત્તયઃ ॥ ૮॥

કૃતિનઃ પુનર્મૃદુમૃદઙ્ગમઙ્ગલ-
સ્વનસન્નિભધ્વનિતનિર્ઝરોર્મિષુ ।
કૃતવૃત્તયઃ સુલભશાદ્વલાવલી-
વલિતસ્થલેષુ (લલિતસ્થલીષુ)તુહિનાદ્રિસાનુષુ ॥ ૯॥

સુરસિન્ધુરોધસિ ગૃહીતકેતકી-

ચલિતા(દલિત)ઙ્ગુલીકિસલયેન પાણિના ।
વિવિધાં વિધાય વિધિના પિનાકિનઃ
કરુણાર્ણવસ્ય ચરણાબ્જસત્ક્રિયામ્ ॥ ૧૦॥

હરિણૈઃ કુશાગ્રકવલાભિલાષિભિ-
ર્ભરણાર્થિભિશ્ચ કલવિઙ્કશાવકૈઃ ।
અતિથીભવદ્ભિરહતાહ્નિકક્રિયાઃ
ફલમૂલકલ્પિતશરીરવૃત્તયઃ ॥ ૧૧॥

દિવસાવસાનસમયે સરન્મરુ-
ત્પરિકીર્ણજીર્ણતૃણપર્ણમર્મરાઃ ।
તનુજાહ્નવીસલિલશીકરોત્કરૈઃ શિશિરાઃ
શિવાય (ચિરાય)ચરિતા વનસ્થલીઃ ॥ ૧૨॥

ધવલીકૃતાસ્વમલભાનુભાનુભિ-
ર્જ્વલિતૌષધીષુ રજનીષ્વનન્તરમ્ ।
કલકણ્ઠકણ્ઠકુહરોદ્ધતસ્વર-
સ્વરસાર્પિતશ્રુતિસુખાસુ શેરતે ॥ ૧૩॥

ઇતિ બિભ્રતઃ પરિકરં પ્રિયઙ્કરં
હરપાદપઙ્કજરજઃપ્રસાદજમ્ ।
વિહસન્તિ મૂઢમનસાં મહીભુજાં
ગજકર્ણતાલતરલાશ્રયાઃ શ્રિયઃ ॥ ૧૪॥

દધદુદ્ધતં હર પુરઃ પુરન્ધ્રિભિઃ પ્રબલં બલં ગલદપાઙ્ગભઙ્ગિભિઃ ।
હૃદયં ભિનત્તિ મમ ઘસ્મરઃ સ્મરઃ શરપાતકાતરદૃશો ભૃશં કૃશમ્ ॥ ૧૫॥

જનયન્નયં નયનયોરધીરતાં ભ્રમયન્ભ્રુવં ભૃશમદભ્રસમ્ભ્રમામ્ ।
શ્લથયન્પ્રયત્નકૃતસઙ્ગમં શમં હસનીયતાં નયતિ રોષ ઈશ મામ્ ॥ ૧૬॥

ધનલાભસમ્ભ્રતવિલાસવાસનાવ્યથમાનમાનસમસત્યસઙ્ગરમ્ ।
ન વિશોભિલોભવિવશં સ્પૃશન્તિ માં સુહૃદોઽપિ કોપિતકદર્થિતાર્થિનમ્ ॥ ૧૭॥

ઉચિતત્રિવર્ગરહિતં તિરોહિતં ઘનમોહમૂઢમનસં હસન્તિ મામ્ ।
કૃતમેધસામધિસદઃ સદઃસદઃ સદસદ્વિવેકવિકલં કલઙ્કિતમ્ ॥ ૧૮॥

ઇતિ તર્જયન્તિ રિપવઃ સુદુર્જયાઃ પરિવર્જયન્તિ ચ વિશુદ્ધબુદ્ધયઃ ।
ન પુનર્જયન્તિ વિધુરં યથા તથા કુરુ હે મહેશ દૃશમેહિ દેહિ નઃ ॥ ૧૯॥

ક્વ મહેશ્વરસ્મરણસમ્ભવં ભવ-
ભ્રમભીમઘર્મશમસમ્મુખં સુખમ્ ।
વિપદાં પદં મૃદુમૃણાલિનીદલ-
સ્ખલદમ્બુબિન્દુતરલાઃ ક્વ સમ્પદઃ ॥ ૨૦॥

ક્વ શિવેશ્વરેતિ કૃતગણ્ડમણ્ડલી
પુલકોદ્ગમપ્રમદમન્થરા ગિરઃ ।
ક્વ યથાર્થપાર્થિવનિરર્થકાઽનૃત-
સ્તુતિવિસ્તરૈરપથપાતપાતકમ્ ॥ ૨૧॥

ક્વ સમાધિબાધિતદુરાધિસાધિમા
ભવસમ્ભવશ્રમદમક્ષમઃ શમઃ ।
ક્વ મદઃ પ્રદર્શિતસમગ્રવિગ્રહઃ
પ્રહસન્મનસ્વિજનગર્હિતસ્થિતિઃ ॥ ૨૨॥

ઇતિ મામનર્ગલમમાર્ગમાર્ગણ-
પ્રવણાવિવેકવિકલીકૃતાશયમ્ ।
કરુણાનિધાન પરિબોધય ક્ષણં
ક્ષણદાવિશેષકશિખાશિખામણે ॥ ૨૩॥

પ્રમદા મદારુણદૃશઃ કૃશોદરાસ્તનયા નયાનતસમસ્તમસ્તકાઃ ।
સુહૃદો હૃદન્તરગતેઙ્ગિતસ્પૃશઃ પ્રણયાર્દ્રનિર્ભરગિરશ્ચ બન્ધવઃ ॥ ૨૪॥

દધતઃ પ્રસાદમધુરાં ધુરામપિ પ્રભવોઽમૃતદ્રવસમાનમાનસાઃ ।
મુખવીક્ષણપ્રણયિનઃ પ્રતિક્ષણં પરિચારકાશ્ચ જયજીવવાદિનઃ ॥ ૨૫॥

ન ભયં ભયઙ્કરકૃતાન્તકિઙ્કરભ્રુકુટીભવં ઝટિતિ હન્તુમીશતે ।
ભજતામતઃ ક્ષપયદાપદં પદં હૃદયે દયામૃતનિધે નિધેહિ નઃ ॥ ૨૬॥

હન્તાઽહન્તા પ્રથયતિ મતિહ્રાસમાસઞ્જયન્તી
માયામાયાસિતસિતશમા યામિની યામિનીવ ।
તસ્માદસ્માન્નવિશશિશિખિપ્રેઙ્ખિતોદ્દામધામ
ક્ષિપ્ત્વા ચક્ષુર્મુદિતમુદિતાઽવન્ધ્યબોધાન્વિધેહિ ॥ ૨૭॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“ઉપદેશનં” નામકં ષોડશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૭. ભક્તિસ્તોત્રં સપ્તદશં સ્તોત્રમ્

મન્દસ્પન્દે મનસિ રસિકીભાવમાસાદ્ય સદ્યો
હૃદ્યોદ્યોગા વિહર વરદે ભારતિ સ્વારતિસ્તે ।
માતર્જાતસ્પૃહમિવ મહામોહનિદ્રાવસાને
જનીહીમં જનમનલસં શંસિતું શમ્ભુભક્તિમ્ ॥ ૧॥

દ્રાક્ષા સાક્ષાદમૃતલહરી કર્કશાત્કાષ્ઠકોષા-
દ્ભૂરિચ્છિદ્રાત્પ્રકૃતિમધુરા મૂર્ચ્છના વંશગર્ભાત્ ।
સૂક્તિવ્યાજાન્મમ ચ વદનાત્કર્ણપેયા સુધેયં
નિર્ગચ્છન્તી જનયતિ ન કં વિસ્મયસ્મેરવક્ત્રમ્ ॥ ૨॥

ધ્યાત્વા દેવ પ્રમયસમયત્રાસમાસન્નકલ્પં
સ્વલ્પં જ્ઞાત્વા સુલભશલભચ્છાયસચ્છાયમાયુઃ ।
મત્ત્વા ચ ત્વા સદયહૃદયં ભક્તિવાલ્લભ્યલભ્યં
સભ્યમ્મન્યાસ્તવ નવવિધૌ ધૌતચિત્તા યતન્તે ॥ ૩॥

કણ્ઠે કણ્ઠીરવરવસદૃગ્દૃક્સમુદ્ગોદ્ગતાશ્રો-
ર્હેલોન્મીલદ્વિપુલપુલકોદ્ભૃતભૂતેશભક્તેઃ ।
યસ્યોદેતિ ધ્વનિરનિભૃતઃ શર્વશર્વેત્યખર્વં
ગર્વં બિભ્રદ્વસતિ વસતિં વાસવીયાં સ એકઃ ॥ ૪॥

તન્માનુષ્યં પ્રભવતિ સતામુત્તમા યત્ર જાતિઃ
સૈકા જાતિઃ પ્રસરતિ યશો યત્ર પાણ્ડિત્યહેતુ ।
તત્પાણ્ડિત્યં સરસમધુરા જૃમ્ભતે યત્ર વાણી
વાણી સાપિ પ્રથયતિ રતિં શાઙ્કરી યત્ર ભક્તિઃ ॥ ૫॥

યેષાં વક્ત્રે સમદમુદિતત્વચ્ચરિત્રાઃ પવિત્રા
દ્વિત્રા વિત્રાસિતરવિસુતભ્રૂવિભઙ્ગપ્રસઙ્ગાઃ ।
નોજ્જૃમ્ભન્તે મધુકણમુચઃ સૂક્તયો ભક્તિસિક્તા
ધિક્તાન્રિક્તાન્ભુવિ ભવ ભવત્પાદસેવારસેન ॥ ૬॥

નાથ જ્યોત્સ્ના બહુલરજનૌ કાર્તિકીયેવ કાન્તા
કાન્તારાન્તર્મથિતપથિકપ્રૌઢતાપા પ્રપેવ ।
મા મા ભૈષીરિતિ યમભયે તાવકીનેવ વાણી

ભાવત્કી મે સતતમમૃતસ્યન્દિની ભાતિ ભક્તિઃ ॥ ૭॥

યેષામન્તઃ સુકૃતસરણિઃ સ્થાણવીયા ન ભક્તિ-
ર્વ્યક્તિં ધત્તે રસકૃદસકૃન્નાસ્મિ તેષુ સ્મિતેષુ ।
લોકઃ શોકં ત્યજતિ સહસા યત્ર તદ્ભક્તિયુક્તં
યુક્તં મન્યે રુદિતમુદિતશ્લાઘમુલ્લાઘહેતુમ્ ॥ ૮॥

ધ્વાન્તં શાન્તપ્રશમમહરદ્યન્ન સદ્યઃ સમુદ્ય-
ન્નુદ્યોતશ્રીકલિતકમલોલ્લાસભાનુઃ સ ભાનુઃ ।
તદ્વિધ્વસ્તપ્રમદમદમોદ્દીપિતોદ્દામદોષ-
પ્લોષં નેતું પ્રભવતિ ભવે શામ્ભવી ભક્તિરેવ ॥ ૯॥

યે સન્તોષપ્રશમપિશુને ક્લેશરાશૌ નિમગ્ના
ભગ્નાશાભિર્વિષમવિષયોપાસનાવાસનાભિઃ ।
તેષામેષા ભવભયભિદારમ્ભસમ્ભાવનાભૂ-
ર્ભૂત્યૈ ભૂયસ્ત્રિજગતિ ગતિઃ શામ્ભવી ભક્તિરેવ ॥ ૧૦॥

દમ્ભસ્તમ્ભસ્થગિતગતયઃ સાવહેલામહેલા-
હેલાલાપભ્રમિતમતયઃ સન્ત્યસઙ્ખ્યાઃ પુમાંસઃ ।
ભાર્ગી ભક્તિં દધતિ હૃદયે નિસ્તરઙ્ગામભઙ્ગાં
ગઙ્ગાતીરે વિહિતરતયો દુર્લભાઃ પૂરુષાસ્તે ॥ ૧૧॥

શમ્ભો દમ્ભો દહતિ કુહકારમ્ભસમ્ભાવનાભિઃ
સાભિદ્રોષસ્ત્વિષમપકષત્યેષ રોષપ્રદોષઃ ।
સાવષ્ટમ્ભં ભ્રમયતિ બૃહન્મામહઙ્કારભારઃ
પારં નેતું પ્રભવતિ ભવદ્ભક્તિરેકા ભવાબ્ધેઃ ॥ ૧૨॥

દ્રાક્સન્ધત્તે યુધમધિધનુર્બદ્ધબાણાભિરામૈઃ
સભ્રૂભઙ્ગૈર્લટભલલનાપાઙ્ગભઙ્ગૈરનઙ્ગઃ ।
દોષપ્લોષક્ષમશમપથાપાતમાતન્વતી મે
ભીમે ભક્તિર્ભગવતિ ગતિશ્ચક્ષુષશ્ચન્દ્રિકેવ ॥ ૧૩॥

કામઃ કામં ધનુરનુનિશં કૌસુમં સંવૃણોતુ
વ્યાલં કાલઃ સ્વકરકુહરે ભગ્નભોગં વિધત્તામ્ ।
ભાર્ગી ભક્તિઃ સપદિ સકલપ્રાર્થનાકલ્પવલ્લી
લબ્ધા દૃબ્ધા જગતિ કતિ ન ક્લેશપાશા હતાશાઃ ॥ ૧૪॥

રાજ્ઞામાજ્ઞાવિહતિવિહિતાનીકિનીનીરસશ્રીઃ
સ શ્રીલેશસ્તનુરનુચિતપ્રાર્થનસ્તાવદાસ્તામ્ ।
ઐન્દ્રં યત્ર ત્રિભુવનજયપ્રાજ્યસામ્રાજ્યલક્ષ્મી-
લક્ષ્માવજ્ઞાસ્પદમપિ પદં તાં સ્તુમઃ શમ્ભુભક્તિમ્ ॥ ૧૫॥

કાન્તૈકાન્તવ્યસનમનસાં વલ્કલાલઙ્કૃતાનાં
જ્ઞાનામ્ભોભિઃ ક્ષપિતરજસાં જાહ્નવીતીરભાજામ્ ।
ગાઢોત્સેકપ્રકટિતજટામણ્ડલીમણ્ડનાનાં
નાનાકારા ભવતિ કૃતિનાં મુક્તયે ભર્ગભક્તિઃ ॥ ૧૬॥

મૂર્તિર્ધૂર્તિં પ્રથયતિ યથા મઞ્જરી જીર્ણપર્ણા
કર્ણાભ્યર્ણં પ્રસરતિ જરા સત્યતો મૃત્યુદૂતી ।
ભોગા ભોગા ઇવ વિદધતશ્ચેષ્ટિતં વેષ્ટયન્તે
હન્તેદાનીં શરણમપરં નાસ્તિ નઃ શમ્ભુભક્તેઃ ॥ ૧૭॥

યત્ર ધ્વાન્તક્ષપણનિપુણં દુર્બલં ધામ ચાન્દ્રં
સાન્દ્રં યત્ર ગ્લપયતિ તમસ્તાપનો યન્ન તાપઃ ।
યત્ર પ્રેઙ્ખન્ન કચતિ શિખી તેજસાઽન્યેન સત્રા
તત્રાલોકં દિશતિ વિષમે શામ્ભવી ભક્તિરેકા ॥ ૧૮॥

મા ભૂદ્ભૂયોઽભ્યસનસુલભાન્વીક્ષિકી નામ વિદ્યા
હૃદ્યા દૂરે વિહરતુ વિપત્ખણ્ડિની દણ્ડનીતિઃ ।
ક્વાપિ સ્થેમ્ના લસતુ કલિતોલ્લાઘવાર્તાપિ વાર્તા
નાર્તાવર્હં કિમપિ શરણં શમ્ભુભક્તિં વિનાઽન્યત્ ॥ ૧૯॥

સંસારાબ્ધેઃ પ્રથમલહરી પાતકાપાતકામા
રામા નામ સ્થગયતિ ગતિં મજ્જતાં સજ્જનાનામ્ ।
મોહાવર્ત્તભ્રમસમુદયત્ખેદવિચ્છેદહેતુઃ
સેતુર્દૂરીભવતિ ચ ભૃશં શેમુષી શેમુષીયમ્ ॥ ૨૦॥

તસ્માદસ્માજ્જનનમરણક્લેશવેશન્તપઙ્કા-
ચ્છઙ્કાતઙ્કાકુલિતમતયો યે તિતીર્ષન્તિ તેષામ્ ।
આશાપાશગ્રથિતવપુષાં ક્રન્દતામાતુરાણાં
પ્રાણાપાતે વિતરતિ કરાલમ્બનં શમ્ભુભક્તિઃ ॥ ૨૧॥

એણાક્ષીણાં સ્મરશરશિખાકોટિશૌટીર્યભીમાઃ
પ્રેમાકૃષ્ટા ઝગિતિ કુટિલા યે કટાક્ષાઃ પતન્તિ ।

કાલેનૈતે કુલિશનિશિતાસ્તુણ્ડદણ્ડા જડાનાં
ભિન્દન્ત્યન્તર્હૃદયમદયં પત્રિણાં નારકાણામ્ ॥ ૨૨॥

બાહુદ્વન્દ્વં તુલિતવિવલદ્વાલમાર્ણાલનાલં
સાલઙ્કારં રણિતવલયં વેષ્ટિતં કણ્ઠપીઠે ।
મોહાન્ધાનાં મહતિ પતતાં યાતનાતઙ્કપઙ્કે
શઙ્કે પઙ્કેરુહદલદૃશઃ પાશતામેતદેતિ ॥ ૨૩॥

યત્સાકૂતં મુકુલિતદૃશઃ કેતકામોદહૃદ્યં
સદ્યઃ સ્વિદ્યદ્વદનમમૃતસ્યન્દિ પીતં નતાઙ્ગ્યાઃ ।
રાગાન્ધાનાં નિરયનિલયે તદ્દુરાપાવસાને
જાને ભૂયઃ પતનશપથાક્રોશકોષત્વમેતિ ॥ ૨૪॥

રાગોદ્રેકાત્કનકકલશાકારમાલમ્બિ હારં
સારઙ્ગાક્ષ્યાઃ પૃથુકુચયુગં ગાઢમાલિઙ્ગિતં યત્ ।
તન્મૂઢાનાં નરકકલિલે મજ્જતામન્તકાલે
નાલે લગ્નસ્થિરતરગુરુગ્રાવભાવં બિભર્તિ ॥ ૨૫॥

કિં ભૂયોભિર્વચનરચનાડમ્બરૈર્દીર્ઘશોકા
લોકા યુક્તં શ ૃણુત સુતરાં પશ્ચિમં વાક્યમેતત્ ।
દુઃખોદર્કં પ્રમુખસુખદં સઙ્ગમુત્સૃજ્ય સાઙ્ગં
ગાઙ્ગં લબ્ધ્વા સલિલમમલં શમ્ભુભક્તિં ભજધ્વમ્ ॥ ૨૬॥

ત્રૈલોક્યં લમ્ભયન્તસ્તૃણગણગણનાં રોહિણીકાન્તલેખા-
રેખાલઙ્કારભક્તિપ્રમુદિતમનસો નિર્મલં ધામ લબ્ધુમ્ ।
ધન્યાઃ સંન્યાસિનોઽન્તઃ કલિમલપટલં ભૂરિ ભિન્દન્ત્યમન્દા
મન્દાકિન્યાઃ પયોભિઃ શશિમુકુટજટાવૈજયન્તીદુકૂલૈઃ ॥ ૨૭॥

એવં દેવ પ્રભેવ સ્મરહર સકલદ્વીપદીપસ્ય ભર્ત્તુ-
ર્ભાસામાસાદયન્તી વિષમતમતમઃખણ્ડને ચણ્ડિમાનમ્ ।
કારાગારાનુકારે પરિભવતિ ભવે બદ્ધમોહાન્ધકારે-
ભાવત્કી ભક્તિરેકા શરણમશરણત્રાણવિશ્રાણિની નઃ ॥ ૨૮॥

યે વિશ્વસ્થિતિસર્ગસંહૃતિકૃતો દેવાસ્ત્રયસ્તેઽપિ યં
સેવન્તે મુખવીક્ષણપ્રણયિનો દૃક્પાતમાત્રાર્થિનઃ ।
યસ્યાઃ સ પ્રભુરપ્રમેયમહિમા ક્રીડાશકુન્તાયતે
તાં ભક્તિં ભુવનત્રયાદ્ભુતમહામાહાત્મ્યશક્તિં સ્તુમઃ ॥ ૨૯॥

ગાવસ્તાવદ્દુહાના રસમસમસુધાસોદરાસ્વાદબન્ધું
ભક્તિર્ભર્ગેનિસર્ગક્લમશમનચમત્કારભોગૈકભૂમિઃ ।
તૃપ્તિઃ સ્વાત્માવભાસાદનુપમપરમાનન્દનિઃસ્યન્દસંવિ-
દ્વિશ્રાન્ત્યેકાન્તહેતોરિતિસપદિ વિપત્કિઙ્કરી કિઙ્કરોતુ ॥ ૩૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“ભક્તિસ્તોત્રં” નામ સપ્તદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૮. સિદ્ધિસ્તોત્રં અષ્ટાદશં સ્તોત્રમ્

જયતિ જિતવિકારઃ ક્લૃપ્તલોકોપકારઃ
કૃતવિપદપકારઃ શાન્તમોહાન્ધકારઃ ।
અતુલપુરુષકારઃ પ્રાપ્તવિશ્વાધિકારઃ
સ્મરરચિતનિકારઃ પાર્વતીચાટુકારઃ ॥ ૧॥

અતનુમતનુતામું પ્રાણિનાં પૂર્ણશક્તિ-
સ્તનુભુવનગણં યઃ શર્મદઃ કર્મભુક્ત્યૈ ।
દિશમદિશદશઙ્કાં શાસ્ત્રરૂપાં ચ મુક્ત્યૈ
સ ભવતુ ભવદોષપ્લોષકૃદ્વો મહેશઃ ॥ ૨॥

અનલસહિતવૃત્તૌ સત્કલાભાસશુદ્ધે
બુધવરમુખપદ્મે ભારતી નિર્મલોર્મિઃ ।
વરદ પરમતાપક્લેશજિત્ત્વત્પ્રસાદાત્
પ્રભવતિ ભવદીયે મૂર્ધનિ સ્વર્ધુનીવ ॥ ૩॥

ભવ ભવમરુચારશ્રાન્તસન્તાપતાન્તિ-
પ્રશમનઘનવર્ષાવારિવાહં તવાહમ્ ।
નમદમરકિરીટપ્રોતરત્નાંશુપૂર-
સ્ફુરદુરુસુરચાપં પાદપીઠં પ્રપદ્યે ॥ ૪॥

કરકલિતકપોલા બાલશૈવાલશય્યા-
તલલુલિતમૃણાલીપેલવમ્લાનમૂર્તિઃ ।
ચિરવિરહવિનિદ્રા રુદ્રદૃક્પાતપાત્રં
દિશિ દિશિ નિશિ પશ્યત્યઙ્ગનાનઙ્ગભીરુઃ ॥ ૫॥

હરચરણસરોજદ્વન્દ્વભક્તિપ્રસાદા-
દુપરિ કરિવરાણાં સઞ્ચરન્તઃ સહેલમ્ ।
ધનમદભરનિર્યન્નિર્ભરામોદલોભ-
સ્ખલદલિકુલગીતં સ્ફીતમાકર્ણયન્તિ ॥ ૬॥

ચરણકમલયુગ્મં દેવ નિર્દમ્ભભક્તિ-
ગ્રહપુલકિતદેહસ્તાવકં યો નનામ ।
અધિવસતિ સ સેવાનમ્રસામન્તમૌલિ-
સ્ખલિતબકુલમાલાલાલિતં પાદપીઠમ્ ॥ ૭॥

શશિશકલશિખણ્ડ ત્વત્પ્રસાદેન ધન્યાઃ
સિતકરધવલાભ્યાં ચામરાભ્યાં વિભાન્તિ ।
ઉભયત ઇવ વક્ત્રં ભાવિરુદ્રત્વલાભ-
પ્રકટનપિશુનાભ્યાં સ્વર્ણદીનિર્ઝરાભ્યામ્ ॥ ૮॥

ક્ષિતિધરપતિપુત્રીવલ્લભ ત્વત્પ્રસાદા-
દ્દધતિ જગતિ ધન્યા મૂર્ધ્નિ ધૌતાતપત્રમ્ ।
ઘટયિતુમધિકત્વં સ્વાત્મનોઽપિ ત્વયૈત-
ત્સકલમિવ વિતીર્ણં મણ્ડલં શીતરશ્મેઃ ॥ ૯॥

અયિ હૃદય દયાર્દ્રઃ સ્વર્ધુનીનીરધારી
ત્વયિ વિહરતિ હસ્તન્યસ્તપીયૂષકુમ્ભઃ ।
યદિ હિમકરલેખાશેખરઃ કોઽપરસ્તે
ભવદવવિનિવૃત્તૌ શંસ શીતોપચારઃ ॥ ૧૦॥

સુરવરનુતધૈર્યા વૈરિદુર્વારવીર્યા
જગતિ વિવિધશાસ્ત્રપ્રસ્તુતાચાર્યચર્યાઃ ।
દધતિ ભુવનતન્ત્રં કોટિશો રુદ્રવર્યાઃ
કૃતસતતસપર્યા યે પુરા શઙ્કરસ્ય ॥ ૧૧॥

ગિરિ ગિરિવરકન્યાકાન્ત શાન્તપ્રથાયાં
કરચરણગણેઽપિ ક્ષામતામશ્નુવાને ।
ગલગલદવકાશે વાપિ કીનાશપાશે
ભવ ભવતિ વિના ત્વાં પ્રાણિનાં ત્રાણકૃત્કઃ ॥ ૧૨॥

શયશયનનિવિષ્ટં વક્ત્રમાપાણ્ડુગણ્ડં

મતિમતિવિરહેણ ગ્લાનિભાજં વહન્તી ।
તનુતનુલતિકાર્તિં માનિની વ્યાહરન્તી
હર હરતિ ન ધૈર્યં ત્વત્સમાધૌ બુધાનામ્ ॥ ૧૩॥

દલદલઘુવિવેકં વ્યક્તશોકાતિરેકં
વિશ વિશદમનન્ત સ્વાન્તમન્તઃ પ્રશાન્તમ્ ।
ભવ ભવ ભવદાહધ્વંસવર્ષામ્બુવાહઃ
કલિકલિતરુજાનાં સપ્રજાનાં પ્રજાનામ્ ॥ ૧૪॥

દહદહતમમોઘં પાપ્મનાં દીર્ઘમોઘં
રુચિરુચિરમમન્દં સુન્દરાનન્દકન્દમ્ ।
દિશ દિશદુપદેશં નાશિતક્લેશલેશં
મધુમધુરમુદારં વાક્યપીયૂષસારમ્ ॥ ૧૫॥

સરતિ સરતિરન્તર્ઘસ્મરો મારવીર-
શ્ચલતિ ચ લતિકેવ સ્ફીતભીતિર્મનીષા ।
તમહિતમહિમાનં નાથ નિક્ષિપ્ય ચક્ષુઃ
શમય શમયમેતિ પ્રીતિમાન્યેન લોકઃ ॥ ૧૬॥

જઘનજઘનશોભા સ્પર્ધમાના સભૃઙ્ગં
કમલકમલકાન્તક્રાન્તભાસા મુખેન ।
મુદિતમુદિતરાગા સેવતે દેવ રામા
મદનમદનવીનૈસ્ત્વત્પ્રપન્નં વિલાસૈઃ ॥ ૧૭॥

જનિતજનિતરઙ્ગં જૃમ્ભયન્તી ભવાબ્ધિં
કલિતકલિતમિસ્રા નાથ કાદમ્બિનીવ ।
હરતિ હર તિતિક્ષોન્માથિની મોહમૂર્છ્છા
મહિતમહિતવૃદ્ધિઃ શુદ્ધબોધપ્રકાશમ્ ॥ ૧૮॥

ભજતિ ભજ તિરશ્ચીં દૃષ્ટિમિષ્ટપ્રસાદાં
કૃતસુકૃતસુમેધઃપ્રૈધિતાભીષ્ટસિદ્ધિમ્ ।
તિરયતિ રયમીશ વ્યાપદાં દુઃસહાનાં
શમનશમનદક્ષં ત્વાં વિના નાથ કોઽન્યઃ ॥ ૧૯॥

સમરસમરજોભિઃ સ્વાન્તમન્તર્વહદ્ભિ-
ર્હિતવિહિતવિયોગં મોહમાહન્તુકામૈઃ ।
ભવવિભવવિમુક્તૈર્યોગિભિર્યોઽભ્યુપેત-

સ્તમહતમહનીયશ્લાઘમીશં પ્રપદ્યે ॥ ૨૦॥

અકલિતમહિમાનં ધ્વસ્તમિથ્યાભિમાનં
દદદમૃતસમાનં બોધમાભાસમાનમ્ ।
પ્રકટિતલઘિમાનં દુર્વહં વર્ધમાનં
ભવભવમવભાનં ભિન્ધિ મે બાધમાનમ્ ॥ ૨૧॥

કિમિવ મણિભિઃ કિં વા મન્ત્રૈઃ કિમૌષધિસઙ્ગ્રહૈ-
રિહ બહુવિધૈઃ કિં વા કાર્યં પરૈરપિ ભેષજૈઃ ।
અમૃતમપિ ન પ્રાયઃ પાપોપતાપશમક્ષમં
વ્રજત શરણં તસ્માદેકં હરં કરુણાપરમ્ ॥ ૨૨॥

ઇહ હિ ગિરિષુ પ્રાલેયાદ્રિર્મહઃસુ વિભાવસુ-
ર્ગુરુષુ જનની મન્ત્રેષ્વેકાક્ષરં પરમં પદમ્ ।
સખિષુ સુકૃતં વૈરિષ્વંહો નદીષુ નભોનદી
પ્રભુષુ ચ પરઃ સ્વામી દેવઃ શશાઙ્કશિખામણિઃ ॥ ૨૩॥

ન યાવદવહીયતે ધૃતિધુરા જરાવિપ્લવૈ-
ર્ન જીર્યતિ સરસ્વતી ન ચ વિશીર્યતે શેમુષી ।
ન ચામયભુજઙ્ગમૈરવશમઙ્ગમાલિઙ્ગ્યતે
ભજધ્વમજરં વિભું ભવજયાય તાવદ્બુધાઃ ॥ ૨૪॥

અરાણિ કરુણં મુહુર્મુહુરકારિ ચાટુ પ્રભો-
રભાવિ ભવભાવનામુદિતચેતસાન્તર્મુહુઃ ।
અલોઠિ મુકુટં મુહુશ્ચરણપીઠિકાવિષ્ટરે
કિમન્યદખિલં જિતં કરતલે કૃતાઃ સિદ્ધયઃ ॥ ૨૫॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“સિદ્ધિસ્તોત્રં” નામાષ્ટાદશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૧૯. ભગવદ્રૂપવર્ણનં એકોનવિંશં સ્તોત્રમ્

યત્તે પરં વરદ રૂપમતીતમેવ
માર્ગં ગિરાં તદિહ કઃ ક્ષમતે ગૃણાતુમ્ ।
અગ્રાહિ યત્તુ નતલોકમનુગ્રહીતું

બાલેન્દુલક્ષ્મ ભવતા તદિદં ગૃણામિ ॥ ૧॥

આસ્તાં પરં યદપરં તદપિ સ્વકીયં
દિવ્યં વપુર્નહિ મહેશ વિમર્શયોગ્યમ્ ।
યત્કિઞ્ચિદેવ તુ વિકલ્પવિકલ્પ્યમાન-
માનન્દધામ તદપીહ ભવાર્તિભાજામ્ (ભવાર્દ્દિતાનામ્)॥ ૨॥

મૂર્ત્તિર્ધ્રુવં તવ શિવામૃતવર્તિરેના-
માસાદ્ય યત્કતિચિદશ્રુલવાઃ પતન્તિ ।
નશ્યત્યઘૌઘપટલં તિમિરં વ્યપૈતિ
રાગઃ પ્રશામ્યતિ દૃશઃ પ્રથતે પ્રસાદઃ ॥ ૩॥

સત્યં મહાર્ઘગુણરત્ન નિધાનમેત-
દાલમ્બનં તવ વપુર્વિપદર્દિતાનામ્ ।
નો ચેન્નખાંશુભરકેસરિતં કિમત્ર
પાદાભિધં યુગપદુદ્ગતમબ્જયુગ્મમ્ ॥ ૪॥

પાદદ્વયં તવ ભવ પ્રણતિપ્રકર્ષ-
હર્ષાશ્રુબિન્દુભરદન્તુરિતાઙ્ગુલીકમ્ ।
નીહારશીકરપરિષ્કૃતપત્રપઙ્ક્તિ-
પઙ્કેરુહદ્વિતયકાન્તિ ભજન્તિ ધન્યાઃ ॥ ૫॥

ભસ્મોજ્જ્વલં ત્રિદશશેખરપદ્મરાગ-
દીપ્રપ્રભારુણિતમઙ્ઘ્રિસરોજયુગ્મમ્ ।
વન્દામહે ઘુસૃણરેણુપરાગગર્ભ-
કર્પૂરપાંસુભિરિવચ્છુરિતં સ્મરારેઃ ॥ ૬॥

જઙ્ઘાલતાયુગલમાશ્રિતગુલ્ફમૂલ-
ભોગીન્દ્રભોગસુભગાભિનવાલવાલમ્ ।
શમ્ભોરભીષ્ટફલદં ભવતાપતાન્તિ-
શાન્તિક્ષમં શમયિતું વિપદં શ્રયામિ ॥ ૭॥

વન્દે યુગાન્તસમયોષિતસપ્તલોકં
લોકોત્તરં જઠરમીશ્વરભૈરવસ્ય ।
યત્રૈતિ નાભિકુહરં જગદાદિસર્ગ-
નિર્યજ્જનૌઘનવનિર્ગમમાર્ગભઙ્ગિમ્ ॥ ૮॥

સિન્દૂરિતાઽમરમતઙ્ગજકુમ્ભશોભિ
સન્ધ્યાભિતામ્રશરદમ્બુધરાનુકારિ ।
વન્દે ફણીન્દ્રફણરત્નરુચારુણાભં
ભસ્મૌઘભાસ્વરમુરઃ પુર(સ્મર)શાસનસ્ય ॥ ૯॥

સ્વામિન્નમી તવ ભુજા ભુજગાધિરાજ-
ભોગોપગૂઢવપુષો હૃદયં મદીયમ્ ।
આનન્દયન્તિ બત ભીમભવોપતાપ-
નિર્વાપણેન વિટપા ઇવ ચન્દનસ્ય ॥ ૧૦॥

મધ્યસ્થિતેરુભયપાર્શ્વગતા ચકાસ્તિ
હસ્તસ્ય મેરુપરિમર્શવિનાકૃતેયમ્ ।
અવ્યાહતગ્રહવશાહિતયોગસિદ્ધિ-
ર્નક્ષત્રપઙ્ક્તિરિવ દેવ તવાઽક્ષમાલા ॥ ૧૧॥

ત્વં કાલભૈરવવપુર્જ્વલિતાઽનલાશ્રિ
લોલાઙ્ગુલીવલનમણ્ડલિતં દધાનઃ ।
સંહારરાત્રિષુ નિનર્તિષુરીશ શૂલં
બાલાર્કચુમ્બિતનવામ્બુદભઙ્ગિમેષિ ॥ ૧૨॥

શાણોપલોત્કષણશુદ્ધનવેન્દ્રનીલ-
નીલદ્યુતિર્જયતિ તે શિતિકણ્ઠ કણ્ઠઃ ।
યસ્મિન્ઘનાઞ્જનરુચિર્ભુજગઃ કલિન્દ-
કન્યાહૃદાન્તરિતકાલિયભઙ્ગિમેતિ ॥ ૧૩॥

કણ્ઠો વહન્નપિ વિષં વિષમં તવૈષઃ
સદ્યઃ શ્રિયં સૃજતિ યદ્વ્યસાશ્રિતેષુ ।
સ્વામિન્નતસ્ત્રિભુવનપ્રથિતપ્રતિષ્ઠં
શ્રીકણ્ઠ ઇત્યુચિતમેવ તવાભિધાનમ્ ॥ ૧૪॥

અન્તર્વિમૃશ્ય ગરલેન ગલે સલીલ-
માલિઙ્ગિતં વિમલમાનનમિન્દુમૌલેઃ ।
હૃષ્યામિ હન્ત મુહુરમ્બુરુહભ્રમાસ-
રોલમ્બડમ્બરવિડમ્બનપણ્ડિતેન ॥ ૧૫॥

યદ્વદ્વિષં સદમૃતં શિરસિ પ્રસિદ્ધ-
મમ્ભસ્તવેશ વિશદં સુમનઃસ્રવન્ત્યાઃ ।

મન્યે તથૈવ ભગવન્ ભવતો ગલસ્થં
સમ્પદ્યતેઽમૃતમિદં નતસાન્ત્વનેષુ ॥ ૧૬॥

તદ્યુક્તમીશ વદનાદ્ભવતઃ સુધાચ્છ-
કાન્તેર્યદગ્નિરપતદ્વપુષિ સ્મરસ્ય ।
યો લઙ્ઘનં ત્રિભુવનૈકગુરોર્વિધિત્સુ-
રુલ્કા ન કિં પતતિ ચન્દ્રમસોઽપિ તસ્ય ॥ ૧૭॥

દિષ્ટ્યા વિરુદ્ધજનતા દમયન્ત્યપીયં
દૃષ્ટિસ્તવેશ્વર બિભર્ત્યનલાશ્રિતત્વમ્ ।
દિષ્ટ્યા વનૈકરતિરપ્યવનૈકસક્તિ-
રેકસ્ત્વમદ્ભુતનિધે ભગવન્નમસ્તે ॥ ૧૮॥

ધન્યસ્ય યસ્ય વપુષિ ગ્લપિતે તપોભિઃ
સ્વામિન્ પતન્તિ વિષમાણિ તવેક્ષણાનિ ।
મુષ્ણન્તિ મુગ્ધમૃગશાવદૃશાં ન ધૈર્ય-
સર્વસ્વમસ્ય વિષમાણિ વિલોચનાનિ ॥ ૧૯॥

સત્યેવ દૃગ્વિલસિતે કરુણામૃતૌઘ-
શીતે જરામરણહારિણિ તાવકીને ।
નાથ વ્યધાયિ વિબુધૈરબુધૈર્મુધૈવ
દુગ્ધોદધિપ્રમથનેઽનવધિઃ પ્રયાસઃ ॥ ૨૦॥

શ્વેતેઽમૃતં યદસૃજદ્દ્રવિજે ચ વહ્નિ-
મેકૈવ દૃક્તવ તયોઃ સ નિજઃ પ્રભાવઃ ।
ઇક્ષૌ સુધા વિષમુષાણફલે ચ સાર્ધં
યદ્વર્ધતે કિમપરાધ્યતિ તત્ર વૃષ્ટિઃ ॥ ૨૧॥

નૂનં પયોધિમથનાવસરે પરેશ
પીતં ત્વયા તદમૃતં ન તુ કાલકૂટમ્ ।
અદ્યાપિ યદ્વસતિ તે વચનક્રમે ચ
દૃગ્વિભ્રમે ચ તરુણે કરુણારસે ચ ॥ ૨૨॥

સત્યં પ્રસાદસમયે ચપલત્વમેતિ
ધત્તેઽધિકં ચ કુટિલત્વમિયં તવ ભ્રૂઃ ।
એતાં વિના પુનરનર્ગલકાલપાશ-
પાતે પરાસ્તિ ન ગતિર્ભયવિહ્વલાનામ્ ॥ ૨૩॥

આપૂરિતઃ સુરસરિત્પયસાઽમૃતાય
જૂટઃ પ્રતપ્તતપનીયપિશઙ્ગકાન્તિઃ ।
સ્વામિન્નસૌ તવ નવાતપતામ્રવેલા-
શૈલોપગૂઢ ઇવ દુગ્ધનિધિર્ન કસ્ય ॥ ૨૪॥

સ્વામિન્સુધાવદવદાતરુચિસ્તવેય-
માભાતિ હન્ત મુકુટે નૃકપાલમાલા ।
જૂટાન્તરાલવિલસત્સુરસિન્ધુતીર-
લીલાવિહારરસિકેવ મરાલમાલા ॥ ૨૫॥

બ્રહ્માદિભિસ્તવ જગદ્ગુરુભિઃ શિરાંસિ
યાન્યર્પિતાનિ પરમેશ્વર પાદપીઠે ।
તાન્યેવ મૂર્ધનિ યદાભરણીકરોષિ
સ પ્રૌઢિમા જયતિ કોઽપિ કૃતજ્ઞતાયાઃ ॥ ૨૬॥

નિર્વાણમેતિ ન જલૈરપિ યત્ર વહ્નિ-
ર્યત્રૈષ નો પચતિ તાનિ મહાશિખોઽપિ ।
માન્દ્યં ન વિન્દતિ તમીરમણઃ કૃશોઽપિ
તાભ્યામસૌ વિજયતે શિતિકણ્ઠ જૂટઃ ॥ ૨૭॥

ભાલસ્થલે હુતવહં વહતો જલં ચ
ચન્દ્રં ચ મૂર્ધ્નિ વિકટં ચ કપાલખણ્ડમ્ ।
એકત્ર મુણ્ડમપરત્ર સુધાઘટં ચ
હસ્તે ચકાસ્તિ ભવતોઽદ્ભુત એષ વેષઃ ॥ ૨૮॥

દાને નદીનમુપકલ્પયતઃ સહર્ષ-
માક્રમ્ય ગામનુપમાં ગતિમાસ્થિતસ્ય ।
નાગેન્દ્રસમ્ભૃતમહાકટકસ્ય કસ્ય
શસ્યં વિના ત્વદિહ રાજશિરોમણિત્વમ્ ॥ ૨૯॥

કણ્ઠે વિષં વિષભૃતોઽપિ વિભૂષણાનિ
ગાત્રેષુ મૂર્ધનિ વિષં વિબુધસ્રવન્ત્યાઃ ।
ઇત્થં વિષૈકવસતેરપિ તે ચકાસ્તિ
કર્ણામૃતં સુકૃતિનામમૃતેશનામ ॥ ૩૦॥

ક્ષતવિભવવિશેષાઃ પ્રાણમાત્રાવશેષા

વિપદમનુભવામઃ કર્મપાકો હિ વામઃ ।
તદિહ ભુજગહારઃ ક્રૂમમોહાપહારઃ
સ ભવતિ ગતિરેકઃ કૃત્તશોકાતિરેકઃ ॥ ૩૧॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“ભગવદ્રૂપવર્ણનં” નામૈકોનવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૦. હસિતસ્તોત્રં વિંશં સ્તોત્રમ્

યત્સૌભગેન ઘનમોઘમમોઘમેઘ-
સઙ્ઘાતસમ્ભવમવન્ધ્યમધઃ કરોતિ ।
તચ્છામ્ભવં ભવમરુભ્રમખેદભેદ-
દક્ષં વિલાસહસિતં નુતિભિર્ભજામઃ ॥ ૧॥

યદ્વાઙ્મયં સકલવાઙ્મનસાતિવૃત્ત-
સીમાનમીશ મહિમાનમમાનમેયમ્ ।
અસ્માદૃશં કૃશદૃશં ભૃશમામૃશન્ત-
મન્તર્વિમૃષ્ય ભવતો ભગવન્નુદેતિ ॥ ૨॥

યેનોપમન્યુમપમન્યુમનન્યભાજ-
માજન્મતૃષ્ણજમજસ્રમજ શ્રમાર્તમ્ ।
આનન્દયઃ સ્વયમદીનનદીનદાન-
ભાસ્વન્મહાફલલસત્કુસુમોપમેન ॥ ૩॥

યેનાપિ તાપવિપદં પ્રથમં જહર્થ
નાથ પ્રસાદસુભગેન ભગીરથસ્ય ।
મૂર્ધ્ના ધૃતત્રિદશસિન્ધુમહાપ્રવાહ-
નિર્વાપણેન પુનરસ્ય પિતામહાનામ્ ॥ ૪॥

ઉત્પ્રાસનાય શમનસ્ય મનસ્યનલ્પ-
દર્પોદ્ગમપ્રશમવિક્લવવિક્રમસ્ય ।
આશ્વાસનાય ચ સમં સમભાવિ યેન
કીનાશપાશવિવશસ્ય નરેશ્વરસ્ય ॥ ૫॥

ભાવત્કભક્તિભરસમ્ભૃતભૂરિભૂતિ-

સમ્ભારરૂઢગુરુગર્વગલદ્વિવેકમ્ ।
મોહાન્ધમન્ધકમુપાહિતસાહસિક્ય-
હેવાકમાકલયતો ભવતો યદાસીત્ ॥ ૬॥

લઙ્કેશકમ્પિતકુબેરગિરિપ્રરૂઢ-
સંરમ્ભભીરુગિરિજાપરિરમ્ભભાજઃ ।
યત્તે રુષામવસરેઽપ્યુદિતાનવદ્ય-
હૃદ્યપ્રસાદસુમુખસ્ય સમુજ્જગામ ॥ ૭॥

પૂજાર્થમમ્બુજસહસ્રમુપાહિતં ય-
દેકં તતો હૃતવતસ્તવ કૈતવેન ।
વિષ્ણું વિલોક્ય નિજલોચનમુત્ખનન્ત-
મન્તઃ પ્રસન્નમનસો યદમન્દમાસીત્ ॥ ૮॥

દૃષ્ટ્વા વધૂજનમનુત્તમરૂપસમ્પ-
ત્સન્દર્શનોદ્ભવમનોભવભગ્નવૃત્તમ્ ।
આષાઢપાણિષુ રુષા મુનિષુ પ્રહર્ત્તુ-
મભ્યુદ્યતેષુ તવ યદ્ભૃશમુદ્બભૂવ ॥ ૯॥

અભ્યર્ણવર્તિકરગોચરકાલકૂટ-
કૂટપ્રભાનિચયમેચકિતેઽધરોષ્ઠે ।
યત્પૂર્વપર્વતશિખાશ્રિતશીતરશ્મિ-
રશ્મિચ્છટાચ્છવિવિડમ્બિ પુરાવિરાસીત્ ॥ ૧૦॥

યત્કર્ણતાલવલનાનિલધૂતકુમ્ભ-
સિન્દૂરરેણુકણકૂણિતલોચનસ્ય ।
બાલસ્ય નાગવદનસ્ય મનસ્યભીષ્ટાં
દૃષ્ટૈવ નાટ્યઘટનાં તવ સમ્બભૂવ ॥ ૧૧॥

શૈલાદિવાદિતમૃદઙ્ગલયાનુયાત-
નૃત્તપ્રવૃત્તગુહવાહવિલોકનેન ।
સ્વામિન્ મહાપ્રલયભૈરવરૂપિણો ય-
દાવિર્બભૂવ તવ તાણ્ડવડમ્બરેષુ ॥ ૧૨॥

વ્યોમ પ્રચણ્ડભુજદણ્ડવિઘટ્યમાન-
તારાવલીવિરહબન્ધુરિતાન્ધકારમ્ ।
સ્વામિન્ યુગાન્તસમયાભિનયેષુ યેન

સમ્ભાવ્યતે પુનરપિ પ્રચુરપ્રકાશમ્ ॥ ૧૩॥

દિક્ચક્રવાલમુખરીકરણપ્રગલ્ભ-
પ્રાવૃટ્પયોધરગભીરરવાનુકારિ ।
સ્વામિન્ કઠોરહૃદયસ્ય ભયં વિધાતું
ભીરોશ્ચ દાતુમભયં યુગપત્ક્ષમં યત્ ॥ ૧૪॥

યત્કાલકૂટકવલીકરણપ્રરૂઢ-
નીલિમ્નિ કણ્ઠપુલિને વિમલં નિલીનમ્ ।
નીરન્ધ્રનીરભરમેદુરમેઘખણ્ડ-
લગ્નેન્દુમણ્ડલવિડમ્બનમાતનોતિ ॥ ૧૫॥

ધ્યાયન્ત્યનન્યહૃદયા હૃદયાધિનાથ-
મદ્ય ક્ષપામગમયં સખિ કલ્પકલ્પામ્ ।
પ્રાણેશસઙ્ગમનિમિત્તમથ પ્રભાતે
નિદ્રા સખીવ મમ સમ્મુખમાજગામ ॥ ૧૬॥

તસ્મિન્ક્ષણે નયનવર્ત્મનિ જીવિતેશઃ
શંસન્ દૃશા મધુરયૈવ મનઃપ્રસાદમ્ ।
ચક્રે પદં મમ તમોમુકુલીકૃતાયાઃ
સ્વૈરં સમેત્ય સવિતેવ સરોરુહિણ્યાઃ ॥ ૧૭॥

અસ્મત્કૃતે સિતમયૂખમુખિ ત્વયૈ-
તત્કિં પ્રસ્તુતં મુનિભિરપ્યતિદુષ્કરં યત્ ।
ઉદ્યાનચઙ્ક્રમણકેલિષુ ખિદ્યતે યા
સા તે કથં કથય કષ્ટસહાઽઙ્ગયષ્ટિઃ ॥ ૧૮॥

મૂર્તિઃ ક્વ બાલકદલીદલકોમલેયં
તીવ્રં તપઃ ક્વ મનસોઽપિ ન ગોચરં યત્ ।
ક્વૈષદ્વિકાસિ કુસુમં સુમનોલતાયાઃ
ક્વોન્મત્તકુઞ્જરકઠોરકરોપમર્દઃ ॥ ૧૯॥

એતેન કર્કશકુશગ્રહણં કરેણ
સોઢં કથં પ્રથમપલ્લવકોમલેન ।
પાદૌ કથં કમલગર્ભનિભૌ શિલાશ્રિ-
શ્રેણીષુ તીર્થગમનક્લમમન્વભૂતામ્ ॥ ૨૦॥

હારોપિ ભાર ઇવ યત્ર કુચદ્વયં ત-
ત્સેહે કથં કુલિશકર્કશવલ્કલોલ્કામ્ ।
એતત્કથં મૃદુમૃણાલલતાભિજાતં
પઞ્ચાગ્નિતાપવિપદઃ પદમઙ્ગમાસીત્ ॥ ૨૧॥

ઇત્યાદિભિર્દશનચન્દ્રિકયાનુવિદ્ધૈ-
રન્તર્બહિશ્ચ તિમિરપ્રસરં હરદ્ભિઃ ।
આશ્વાસયન્નિવ નિવર્તિતતીવ્રખેદં
ગર્ભીકૃતસ્મિતસુધામધુરૈર્વચોભિઃ ॥ ૨૨॥

યાવત્ત્રપાપરવશં ક્ષિતિમીક્ષમાણં
મુક્તાફલોપમસમુદ્ગતઘર્મલેશમ્ ।
કિઞ્ચિત્કરેણ મુખમુન્નમયન્નિયેષ
પીયૂષવર્ષમિવ વર્ષિતુમેષ ભૂયઃ ॥ ૨૩॥

તાવત્પ્રબોધિતવતા કૃકવાકુનાદૈ-
ર્દુર્વેધસા સખિ તદાચરિતં શઠેન ।
યત્રૈષ એવ શરણં મમ જીવિતેશો-
યદ્ધાડપરો હરતિ યોડખિલજન્તુવર્ગમ્ ॥ ૨૪॥

ઇત્યાદિ તીવ્રવિરહજ્વરયા જયાયૈ
યત્સ્વપ્નવૃત્તમુદિતં ગિરિરાજપુત્ર્યા ।
તચ્છૃણ્વતો વનલતાન્તરિતસ્ય યત્તે
જાતં પ્રમોદભરનિર્ભરમાનસસ્ય ॥ ૨૫॥

સઞ્જીવનૌષધમિદં હરહુઙ્કૃતાગ્નિ-
જ્વાલાવલીઢવપુષઃ કુસુમાયુધસ્ય ।
બાલે સુધારસમયે સમયે કિમર્થ-
માયાસ્યતે ત્રિભુવનાભરણં શરીરમ્ ॥ ૨૬॥

કલ્પદ્રુમૈર્નિધિભિરોષધિકામધેનુ-
ચિન્તામણિપ્રભૃતિભિશ્ચ પરિષ્કૃતસ્ય ।
કિં દુર્લભં તવ પિતુર્ભુવનાતિશાયિ-
શ્રીધામ્નિ ધામનિ યદર્થયસે તપોભિઃ ॥ ૨૭॥

ત્વં જીવિતાદપિ ગુરોરધિકા સ તાવ-
દુત્પાદયેત્તવ ન મન્યુમધીતનીતિઃ ।

સમ્ભાવ્યતે તવ ચ નાન્યકૃતો નિકારઃ
કુર્વીત કેસરિસટાહઠકર્ષણં કઃ ॥ ૨૮॥

શ્રદ્ધાનુબન્ધવિહિતવ્રતહોમદાન-
સ્વાધ્યાયતીર્થગમનાદિનિબન્ધનાનિ ।
ધન્યસ્ય કસ્ય ફલિતાનિ તુષારહાર-
ગૌરાણિ ગૌરિ સુકૃતાનિ પુરાકૃતાનિ ॥ ૨૯॥

દુર્વારદુર્ગતિનિકારકદર્થ્યમાન-
માલોક્ય લોકમખિલં વિપુલાશયેન ।
સદ્યઃકૃતં કનકવર્ષણમિન્દુકાન્ત-
વર્ષ્મત્વિષા પરમકારુણિકેન કેન ॥ ૩૦॥

ગાયન્તિ કસ્ય વિષદં વિષમોગ્રકાલ-
સંરુદ્ધશક્તિશરણાગતરક્ષણોત્થમ્ ।
દ્વન્દ્વાનિ નન્દનસદામપદાનમિન્દુ-
ધૌતાસુ કૌમુદમહોત્સવયામિનીષુ ॥ ૩૧॥

કેનેશ્વરેણ મહતા વહતાત્રિનેત્ર-
સઞ્જાતકાન્તિ વપુરદ્ભુતભૂતિભૂષમ્ ।
ઉદ્દામકામશિતમાર્ગણદૌર્મનસ્ય-
વૈરસ્યમિદ્ધમહસા સહસા નિરસ્તમ્ ॥ ૩૨॥

ધન્યાઃ કમસ્ખલિતપૌરુષભગ્નભૂરિ-
દર્પાન્ધકન્દલિતલોકવિષાદમુચ્ચૈઃ ।
હેલાવલીઢવિષમશ્રમવીર્યવહ્નિ-
ભસ્મીકૃતાહિતપુરં કવયઃ સ્તુવન્તિ ॥ ૩૩॥

કઃ સ્વર્ધુનીસવનવહ્નિનિષેવણાદિ-
ધૌતાં દધત્તનુમનુજ્ઝિતભૈક્ષવૃત્તિઃ ।
કાલં દ્વિજેન્દ્રમુકુટઃ પરિશુદ્ધધર્મ-
ચર્યારતઃ ક્ષપિતવાનજિનાવૃતાઙ્ગઃ ॥ ૩૪॥

ઉદ્ધૂલિતશ્ચિતિરજોભિરખણ્ડમુણ્ડ-
માલાકરાલશિખરઃ સુચિરં ચચાર ।
ભીષ્મશ્મશાનવસનવ્યસનઃ કપાલ-
ખટ્વાઙ્ગપાણિરતિતીવ્રમપિ વ્રતં કઃ ॥ ૩૫॥

મન્યે ભવાન્તરશતોપચિતસ્ય પુણ્ય-
પૃથ્વીરુહઃ ફલમલભ્યમભાગ્યભાજામ્ ।
યસ્યા દૃગઞ્ચલવિલોકનમાત્રમેવ
સમ્ભાવનં તુ વચસા વચસામભૂમિઃ ॥ ૩૬॥

સા ત્વં મહાર્ઘગુણરત્નસમુદ્રવેલા-
લાવણ્યસિન્ધુરકલઙ્કકુલપ્રસૂતિઃ ।
સૌભાગ્યભાગ્યવિભવાદિભવાઽભિમાન-
ભૂમાનમાનયસિ યં તપસા પ્રસાદમ્ ॥ ૩૭॥

ઇત્થં વિદગ્ધરસદિગ્ધકથાક્રમેણ
દેવ્યા સમં સમભિભાષણલોલુભસ્ય ।
યદ્વ્યાજવર્ણિતરુણસ્ય તવાઽવહિત્થ-
સંરુદ્ધમપ્યતિભરેણ સમુદ્બભૂવ ॥ ૩૮॥

રૂપં પ્રદર્શ્ય વિદધદ્ગિરિ સાનુકમ્પં
દિવ્યં ધૃતામૃતરસં ગિરિસાનુકમ્પમ્ ।
યેન વ્યધા મુખમખણ્ડસિતાંશુકાન્તં
દેવ્યા વપુશ્ચ પુલકોચ્છ્વસિતાંશુકાન્તમ્ ॥ ૩૯॥

સ્વામિન્નુદારઘનસારતુષારહાર-
કહ્લારશારદનિશારમણોપમેન ।
તાપં તમશ્ચ વિષમં જહિ મે સહેલ-
મુલ્લાસિતેન હસિતેન સિતેન તેન ॥ ૪૦॥

સહસ્રચરણં રવિં નયનપઙ્કજાન્તઃસ્થિતં
સહસ્રનયનં હરિં ચરણપઙ્કજાન્તઃસ્થિતમ્ ।
વિમૃશ્ય ધૃતવિસ્મયાં ભગવતીમવેક્ષ્યોદ્ગતં
પ્રભોરભિમતાપ્તયે હસિતમસ્તુ શર્વસ્ય મે ॥ ૪૧॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“હસિતસ્તોત્રં” નામકં વિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૧. અર્ધનારીશ્વરસ્તોત્રં એકવિંશં સ્તોત્રમ્

વન્દેમહ્યમલમયૂખમૌલિરત્નં
દેવસ્ય પ્રકટિતસર્વમઙ્ગલાખ્યમ્ ।
અન્યોન્યં સદૃશમહીનકઙ્કણાઙ્કં
દેહાર્ધદ્વિતયમુમાર્ધરુદ્ધમૂર્તેઃ ॥ ૧॥

તદ્વન્દે ગિરિપતિપુત્રિકાર્ધમિશ્રં
શ્રૈકણ્ઠં વપુરપુનર્ભવાય યત્ર ।
વક્ત્રેન્દોર્ઘટયતિ ખણ્ડિતસ્ય દેવ્યા
સાધર્મ્યં મુકુટગતો મૃગાઙ્કખણ્ડઃ ॥ ૨॥

એકત્ર સ્ફટિકશિલામલં યદર્ધે
પ્રત્યગ્રદ્રુતકનકોજ્જ્વલં પરત્ર ।
બાલાર્કદ્યુતિભરપિઞ્જરૈકભાગ-
પ્રાલેયક્ષિતિધરશૃઙ્ગભઙ્ગિમેતિ ॥ ૩॥

યત્રૈકં ચકિતકુરઙ્ગભઙ્ગિ ચક્ષુઃ
પ્રોન્મીલત્કુચકલશોપશોભિ વક્ષઃ ।
મધ્યં ચ ક્રશિમસમેતમુત્તમાઙ્ગં
ભૃઙ્ગાલીરુચિકચસઞ્ચયાઞ્ચિતં ચ ॥ ૪॥

સાભોગં ઘનનિબિડં નિતમ્બબિમ્બં
પાદોપિ સ્ફુટમણિનૂપુરાભિરામઃ ।
આલોક્ય ક્ષણમિતિ નન્દિનોપ્યકસ્મા-
દાશ્ચર્યં પરમુદભૂદભૂતપૂર્વમ્ ॥ ૫॥

યત્રાર્ધં ઘટયતિ ભૂરિભૂતિશુભ્રં
ચન્દ્રાંશુચ્છુરિતકુબેરશૈલશોભામ્ ।
અર્ધં ચ પ્રણિહિતકુઙ્કુમાઙ્ગરાગ-
મ્પર્યસ્તારુણરુચિકાઞ્ચનાદ્રિમુદ્રામ્ ॥ ૬॥

યત્કાન્તિં દધદપિ કાઞ્ચનાભિરામાં
પ્રોન્મીલદ્ભુજગશુભાઙ્ગદોપગૂઢમ્ ।
વિભ્રાણં મુકુટમુપોઢચારુચન્દ્રં
સન્ધત્તે સપદિ પરસ્પરોપમાનમ્ ॥ ૭॥

આશ્ચર્યં તવ દયિતે હિતં વિધાતું
પ્રાગલ્ભ્યં કિમપિ ભવોપતાપભાજામ્ ।
અન્યોન્યં ગતમિતિ વાક્યમેકવક્ત્ર-
પ્રોદ્ભિન્નં ઘટયતિ યત્ર સામરસ્યમ્ ॥ ૮॥

પ્રત્યઙ્ગં ઘનપરિરમ્ભતઃ પ્રકમ્પં
વામાર્ધં ભુજગભયાદિવૈતિ યત્ર ।
યત્રાપિ સ્ફુટપુલકં ચકાસ્તિ શીત-
સ્વઃસિન્ધુસ્નપિતતયેવ દક્ષિણાર્ધમ્ ॥ ૯॥

એકત્ર સ્ફુરતિ ભુજઙ્ગભોગભઙ્ગિ-
ર્નીલેન્દીવરદલમાલિકા પરત્ર ।
એકત્ર પ્રથયતિ ભસ્મનોઽઙ્ગરાગઃ
શુભ્રત્વં મલયજરઞ્જનં પરત્ર ॥ ૧૦॥

એકત્રાઽર્પયતિ વિષં ગલસ્ય કાર્ષ્ણ્યં
કસ્તૂરીકૃતમપિ પુણ્ડ્રકં પરત્ર ।
એકત્ર દ્યુતિરમલાઽસ્થિમાલિકાના-
મન્યત્ર પ્રસરતિ મૌક્તિકાવલીનામ્ ॥ ૧૧॥

એકત્ર સ્રુતરુધિરા કરીન્દ્રકૃત્તિઃ
કૌસુમ્ભં વસનમનશ્વરં પરત્ર ।
ઇત્યાદીન્યપિ હિ પરસ્પરં વિરુદ્ધા-
ન્યેકત્વં દધતિ વિચિત્રધામ્નિ યત્ર ॥ ૧૨॥

દન્તાનાં સિતિમનિ કજ્જલપ્રયુક્તે-
માલિન્યેઽપ્યલિકવિલોચનસ્ય યત્ર ।
રક્તત્વે કરચરણાધરસ્ય ચાન્યો
નાઽન્યોન્યં સમજનિ નૂતનો વિશેષઃ ॥ ૧૩॥

કણ્ઠસ્ય ભ્રમરનિભા વિભાર્ધભાગં
મુક્ત્વા કિં સ્થિતિમકરોચ્છિરોરુહાર્ધે ।
અર્ધં વા કનકસદૃગ્રુચિઃ કચાનાં
સન્ત્યજ્ય ન્યવિશત કિં ગલૈકદેશે ॥ ૧૪॥

સૌવર્ણઃ કરકમલે યથૈવ વામે
સવ્યેઽપિ ધ્રુવમભવત્તથૈવ કુમ્ભઃ ।

ક્રીડૈકપ્રસૃતમતિર્વિભુર્બિભર્તિ
સ્વાચ્છન્દ્યાદુરસિ તમેવ નૂનમેનમ્ ॥ ૧૫॥

યત્રાસીજ્જગદખિલં યુગાવસાને
પૂર્ણત્વં યદુચિતમત્ર મધ્યભાગે ।
સંરમ્ભાદ્વલિતમદસ્તદેવ નૂનં
વિશ્રાન્તં ઘનકઠિને નિતમ્બબિમ્બે ॥ ૧૬॥

ઇત્યાદીન્પ્રવિદધુરેવ યત્ર તાવ-
ત્સઙ્કુલ્પાન્પ્રથમસમાગમે ગણેન્દ્રાઃ ।
યાવત્સ પ્રણતિવિધૌ પદારવિન્દં
ભૃઙ્ગીશઃ પરિહરતિ સ્મ નાડમ્બિકાયાઃ ॥ ૧૭॥

કિમયં શિવઃ કિમુ શિવાડથ શિવા-
વિતિ યત્ર વન્દનવિધૌ ભવતિ ।
અવિભાવ્યમેવ વચનં વિદુષા-
મવિભાવ્યમેવ વચનં વિદુષામ્ ॥ ૧૮॥

એકઃ સ્તનઃ સમુચિતોન્નતિરેકમક્ષિ
લક્ષ્યાઞ્જનં તનુરપિ ક્રશિમાન્વિતેતિ ।
લિઙ્ગૈસ્ત્રિભિર્વ્યવસિતે સવિભક્તિકેડપિ
યત્રાડવ્યયત્વમવિખણ્ડિતમેવ ભાતિ ॥ ૧૯॥

યત્ર ધ્રુવં હૃદય એવ યદૈક્યમાસી-
દ્વાક્કાયયોરપિ પુનઃ પતિતં તદેવ ।
યસ્માત્સતાં હૃદિ યદેવ તદેવ વાચિ
યચ્ચૈવ વાચિ કરણેડપ્યુચિતં તદેવ ॥ ૨૦॥

કાન્તે શિવે ત્વયિ વિરૂઢમિદં મનશ્ચ
મૂર્તિશ્ચ મે હૃદયસમ્મદદાયિનીતિ ।
અન્યોન્યમભ્યભિહિતં વિતનોતિ યત્ર
સાધારણસ્મિતમનોરમતાં મુખસ્ય ॥ ૨૧॥

ઉદ્યન્નિરુત્તરપરસ્પરસામરસ્ય-
સમ્ભાવનવ્યસનિનોરનવદ્યહૃદ્યમ્ ।
અદ્વૈતમુત્તમચમત્કૃતિસાધનં ત-
દ્યુષ્માકમસ્તુ શિવયોઃ શિવયોજનાય ॥ ૨૨॥

લક્ષ્યાણ્યલક્ષ્યાણ્યપરત્ર યત્ર વિલક્ષણાન્યેવ હિ લક્ષણાનિ ।
સાહિત્યમત્યદ્ભુતમીશયોસ્તન્ન કસ્ય રોમાઞ્ચમુદઞ્ચયેત ॥ ૨૩॥

જૂટાહેર્મુકુટેન્દ્રનીલરુચિભિઃ શ્યામં દધત્યૂર્ધ્વગં
ભાગં વહ્નિશિખાપિશઙ્ગમધરં મધ્યે સુધાચ્છચ્છવિઃ ।
ધત્તે શક્રધનુઃશ્રિયં પ્રતિમિતા યત્રેન્દુલેખાનૃજુ-
ર્યુષ્માકં સ પયોધરો ભગવતોર્હર્ષામૃતં વર્ષતુ ॥ ૨૪॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“અર્ધનારીશ્વરસ્તોત્રં” નામૈકવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૨. કાદિપદબન્ધસ્તોત્રં દ્વાવિંશં સ્તોત્રમ્

કાવ્યકૌશલકલાસુ કોવિદૈઃ કીર્તિતઃ કવિકુલૈઃ કુતૂહલાત્ ।
કૌમુદીકુમુદકાન્તકીર્તિભિઃ કામિતઃ કુશલકાર્યકારિભિઃ ॥ ૧॥

કેરલીકચકલિન્દકન્યકાકૂલકાલિયકડારકન્ધરઃ ।
કિલ્બિષક્ષપણકારણક્રતુક્લાન્તિકૃત્કરટિકૃત્તિકર્પટઃ ॥ ૨॥

કેકિકેતનકૃશાનુકૌશિકૈઃ કિન્નરૈઃ કવિકુબેરકેશવૈઃ ।
કાલકૂટકવલક્રિયાક્રમે ક્રન્દિતઃ કલુષકર્ષણક્ષમઃ ॥ ૩॥

કર્ણકીલિતકપાલકુણ્ડલઃ કુણ્ઠિતક્રકચકલ્પકલ્મષઃ ।
કાલકામકદનઃ કુમુદ્વતીકાન્તકર્બુરકપર્દકન્દરઃ ॥ ૪॥

કાપિશાયનકષાયકામિનીકેલિકૂજિતકલેન કૌતુકાત્ ।
ક્રીડિતઃ ક્વણિતકીચકક્વણત્કોકિલાકલકલેન કાનને ॥ ૫॥

કુન્દકુડ્મલકદમ્બકેતકીકાઞ્ચનારકલિકાકદમ્બકૈઃ ।
કર્ણિકારકરબીરકોરકૈઃ કૈરવૈઃ કુવલયૈઃ કુશેશયૈઃ ॥ ૬॥

કિંશુકૈઃ કપિકપોલકાન્તિભિઃ કેસરૈઃ કમલકોષકોમલૈઃ ।
કોવિદારકુટજૈઃ કણેરકૈઃ કેવલૈઃ કચિતકીર્ણકુન્તલઃ ॥ ૭॥

કૃષ્ણકુણ્ડલિકઠોરકઞ્ચુકૈઃ ક્લૃપ્તકુબ્જકમનીયકઙ્કણઃ ।
ક્રોધકૃત્તકરિકુમ્ભકોટરક્રૂરકેસરિકિશોરકણ્ટકઃ ॥ ૮॥

કાન્તયા કનકકાઞ્ચિકિઙ્કિણીકાન્તયા કલિતકણ્ઠકન્દલઃ ।
કોપયન્કપટતઃ કિરીટિનં ક્રીડયા કૃતકિરાતકૈતવઃ ॥ ૯॥

કાકકઙ્કુકુરરૈઃ કલઙ્કિતે કશ્મલે કઠિનકૃત્યકારિતે ।
કાઙ્ક્ષિતઃ ક્ષતકલેવરૈઃ કટું કર્ષયન્કરુણયા કદર્થનામ્ ॥ ૧૦॥

કોપકર્કશકૃતાન્તકિઙ્કરક્લેશકાતરકૃપાકૃતૌ કૃતી ।
કલ્પતાં કલિકલઙ્કકન્દલીકન્દકર્ત્તનકુઠારકર્મણે ॥ ૧૧॥

કલ્લોલિનીકુટિલકૈરવિણીકુટુમ્બ-
કઙ્કાલકલ્પિતકરાલકિરીટકોટિઃ ।
કાત્યાયનીકરકરમ્બિતકીર્યમાણ-
કર્પૂરકુઙ્કુમકણઃ કરુણાં કરોતુ ॥ ૧૨॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“કાદિપદબન્ધસ્તોત્રં” નામકં દ્વાવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૩. શૃઙ્ખલાબન્ધસ્તોત્રં ત્રયોવિંશં સ્તોત્રમ્

જગતિ વિબોધિતવિધુરં વિધુરઞ્જિતચારુશેખરં ગિરિશમ્ ।
ગિરિ શંસામિ સસાધ્વસસાધ્વસમાનન્દદાનપરમ્ ॥ ૧॥

ન પરં શરણં પ્રભવતિ ભવતિ કૃતાવજ્ઞમાનસે મહતામ્ ।
મહતાં ભજતિ હિ સહસા સહસા તવ ભારતી મધુરા ॥ ૨॥

મધુરાગારુણનયના નયનાશવિધૌ પટીયસી પ્રમદા ।
પ્રમદાર્પણાર્થમુદિતે મુદિતે ત્વયિ સા તૃણં ભજતામ્ ॥ ૩॥

ભજતાં સરસામમલાં મમ લાઞ્છિતશેખરેન્દુના કરુણામ્ ।
કરુણાં ગિરં નવતયા બત યાऽર્પયતિ તવ શ્રયતામ્ ॥ ૪॥

શ્રયતાં નવનવિધૌ તવ ધૌતવતી ગીરઘં રતિં ચતુરમ્ ।
ચતુરન્તમહીપતિતા પતિતા હેયત્વ એવ યત્ર સતામ્ ॥ ૫॥

ત્રસતાં ન કદા ભવતા ભવતાપહૃતા વિભો શુભાકૃતિના ।
કૃતિનામુપકારચિતં રચિતં શુભમેવ ભાવિહિતમ્ ॥ ૬॥

વિહિતં મયિ ચારુ ચિરં રુચિરં ન ગતે વિવેકલયમ્ ।

કલયન્નમલવિભાસિતભાસિત રુચિમેહિ મે વિપાકમલમ્ ॥ ૭॥

કમલં રવિરપરાજિત રાજિતવિકસદ્વપુર્યથા કુરુતે ।
કુરુ તેન પથા મા ભવ મા ભવ વિમુખો દૃશં દિશ મે ॥ ૮॥

દિશમેષ વિચારહિતાં રહિતાં વિષયોરગૈરહં ન લભે ।
નલભેકવદતિવિલપન્ વિલપન્નગવદ્ધૃતઃ સદા તમસા ॥ ૯॥

તમસાવુજ્ઝિતકલહં કલહંસગિરોમયા સદા સહિતમ્ ।
સહિતં ગીરુદિતરસા તરસા શ્રયતાં વિભું સદયમ્ ॥ ૧૦॥

સદયં યદુદારમતે રમતે કુર્વંસ્તદેવ દેવ જનઃ ।
વજ નઃ કરુણાપરતાં પરતાં મા ગા નમો ભવતે ॥ ૧૧॥

ભવ તેજઃપ્રસરસિતં રસિતં શ્રુત્વાઽમૃતોપમં ભવતઃ ।
ભવતસ્ત્રાસં સકલં સકલઙ્કમતિઃ કદા વિમુઞ્ચામિ ॥ ૧૨॥

મુઞ્ચામિતભાસ દૃશં સદૃશં શશિનઃ પ્રદર્શ્ય વદનમ્ ।
વદ નન્દયિતું જગતીં જગતીશઃ કોસ્તુ નામાન્યઃ ॥ ૧૩॥

નામાન્યઃ સુમતિરયં તિરયન્તિ યશાંસિ તસ્ય વા વિપદમ્ ।
વિપદં ન વિલાસમયે સમયે વપુરસ્ય યાત્યયાતવયઃ ॥ ૧૪॥

તવ યઃ સ્તુતિષુ સદા હર દાહરજઃ ક્લેશપાશમયમ્ ।
શમયન્તીષ્વસ્તમનાસ્તમનાહતભાગ્યમેવ દેવ નમે ॥ ૧૫॥

વનમેવ શરણમધુના મધુનાશિનુત પ્રસાદનાય તવ ।
યતવતિ હૃદયે શકલિતકલિતમસો મે નમેરુચિતમ્ ॥ ૧૬॥

રુચિતં નોરગસદનં સદનન્તમહર્દ્ધિ નન્દનં ન વનમ્ ।
નવનં ધૃતદીપ્રગુણં પ્રગુણં તવ કર્તુમેવ દેવ રમે ॥ ૧૭॥

વરમેનોહરમમલં મમ લઙ્ઘિતવિઘ્ન દેહિ નામ હિતમ્ ।
મહિતં પદમપિ મા નય માનય વિધુરં દૃશામલયા ॥ ૧૮॥

મલયાનિલમિવ સુરભિં સુરભિં કુસુમૈરિવાવદાતવનમ્ ।
તવ નન્દિતહૃદનામય નામ યમત્રાસહૃત્કલયે ॥ ૧૯॥

કલયેન્દોરભિભૂષિત ભૂષિતમુકુટૈઃ સુરૈર્નતેશ ન કૈઃ ।
શનકૈરઘશમનાશય નાશય વિપદં પદં નય મા ॥ ૨૦॥

ન યમાહિતભયશમને શમનેકવિધં પ્રસાદદક્ષમતે ।
ક્ષમતે મુનિભિરુપાસિત પાસિતરાં ચેન્ન મામદયમ્ ॥ ૨૧॥

મદયઞ્જિતવિપ્રકૃતીઃ પ્રકૃતીર્વસુધાધિપો મહીવલયમ્ ।
બલયન્ત્રિતરિપુરક્ષતિ રક્ષતિ તવ યઃ પ્રસાદમિતઃ ॥ ૨૨॥

દમિતસ્તેન હિ શમનઃ શમનસ્તરુચાપિ તેન જાતમુદા ।
તમુદારાહિતચરિતં ચરિતં શુભવર્ત્મના સ્તુવન્ત્યમલમ્ ॥ ૨૩॥

ત્યમલઙ્કૃતભૂભવનં ભવ નન્દિતલોકમીશ ભાવપુષા ।
વપુષા નૌમ્યભયસ્તવ યસ્તવ નુતિષુ પ્રિયાસુ કૃતી ॥ ૨૪॥

સુકૃતી તવ ભવવારણવારણહરિણેન્દ્ર સિદ્ધિભાજનતામ્ ।
જનતાં નયદમલસિતં લસિતં વપુરર્ચયે નવૈરસકૃત્ ॥ ૨૫॥

રસકૃદ્ધોઽપ્રતિઘસ્મરઘસ્મર ભવતઃ સ્તવઃ સદૈવ સતામ્ ।
વસતાં દિવિ ભયહૃદયં હૃદયં કુરુતે ઘનોત્કલિકમ્ ॥ ૨૬॥

કલિકમ્પનમઘશરણં શરણં ચરણદ્વયં ભજેઽવિકલમ્ ।
વિકલઙ્કમતિરહં તવ હન્ત વરદ્વિરદરાજગતિમ્ ॥ ૨૭॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટકૃતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“શ‌ૃઙ્ખલાબન્ધસ્તોત્રં” નામકં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૪. દ્વિપદયમકં ચતુર્વિંશં સ્તોત્રમ્

વચસિ સરસ્વતિ મે વિભવં પ્રકટય જાતરસારમ્ ।
નુતિભિરુપસ્તુહિ દેવિ ભયં સકલસુરાન્તરસારમ્ ॥ ૧॥

અવિરલભસ્મરજોધવલં વિહિતમહાશમલાભમ્ ।
ભજ ભગવત્યગજાધવલં શ્રમશમનં વિમલાભમ્ ॥ ૨॥

દાતુમનુત્તમહાવપુષં યઃ પ્રબભૂવ નદીનમ્ ।
નાથમનુત્તમહાવપુષં તં ભજ દેવિ ન દીનમ્ ॥ ૩॥

ભક્તિરસસ્તવ દેવ સતાં જયતિ મહામૃતહૃદ્યઃ ।
ચરણતલે ભવતો વસતાં કલિમલપલ્વલહૃદ્યઃ ॥ ૪॥

નયનમુદીર્ય તમો હર મે નિહતમહાવિષમેષુ ।

યેન પુનર્હતમોહ રમે વૈરિષુ નો વિષમેષુ ॥ ૫॥

ત્વયિ વરદે રુચિરપ્રમદાઃ પ્રચલિતચામરહસ્તાઃ ।
સદસિ ભજન્તિ જનં પ્રમદા રમયતિ સોઽપિ રહસ્તાઃ ॥ ૬॥

હિમકરકિરણસમૂહસિતં સુરસરિદમ્બુવિડમ્બિ ।
વહ ભગવન્ વદને હસિતં મા ભવતાત્ર વિડમ્બિ ॥ ૭॥

ઉપમિતમન્મથચાપલતાં ભ્રુવમવધૂય સહેલમ્ ।
રવિજદૃશાં ઘનચાપલતાં વિઘટય તા ન સહેઽલમ્ ॥ ૮॥

રવિસુતવર્ત્મ મમ સ્મરતઃ શ્રુતયમકિઙ્કરવાણિ ।
દલતિ વિભો હૃદયં દરતઃ પુરહર કિં કરવાણિ ॥ ૯॥

પ્રથયતિ યસ્તવ હન્ત મહં નુતિવચસા રુચિરેણ ।
શુભશતસિદ્ધિસહં તમહં શિરસિ વહામ્યચિરેણ ॥ ૧૦॥

ભવભયભઞ્જનભઙ્ગિવિધૌ ભક્તિમતાં પ્રભવન્તમ્ ।
વિહિતહિતં વિધુરેઽપિ વિધૌ ભજત જગત્પ્રભવં તમ્ ॥ ૧૧॥

મદનમહીરુહદવદહનં શિરસિ ધૃતામૃતભાસમ્ ।
ભજત દુરન્તવિષાદહનં પ્રણતસમર્પિતભાસમ્ ॥ ૧૨॥

વિતર નદીરમણં શમનં શકલય ખણ્ડય કામમ્ ।
પ્રથય ધનઞ્જયભયશમનં રચય પુરં હતકામમ્ ॥ ૧૩॥

ઇતિ સદયેન યદાચરિતં ભુવનહિતાય હરેણ ।
ભજત તદસ્ય મહાચરિતં નુતિવચસાર્તિહરેણ ॥ ૧૪॥

ગતિરશુભં હર કા તરતાં ભવતિ વિનાશ ભવન્તમ્ ।
ઇતિ ચતુરં હર કાતરતાં રચય ચ માં શુભવન્તમ્ ॥ ૧૫॥

વરદ ભવન્તમૃતે ધરતે ભુવનમિદં સકલં કઃ ।
ઇતિ નતિમિન્દુકલાધર તે ભજતિ ન કઃ સકલઙ્કઃ ॥ ૧૬॥

ઇયમખિલેતરજાતિમતાં જયતિ જનિઃ પ્રથમા નઃ ।
સેવ્યભુવં વિભુરેતિ મતાં યત્ર હૃદિ પ્રથમાનઃ ॥ ૧૭॥

તુભ્યમયં શિતિનાલ સતાં વરદ કરોમિ નમોઽહમ્ ।
શમય મહેશ મમાલસતાં યેન ભજામિ ન મોહમ્ ॥ ૧૮॥

ભજસિ યયા કિલ કામદયા નતજનમીશ સમસ્તમ્ ।
સા મમ તે હતકામ દયા ગમયતુ વૈશસમસ્તમ્ ॥ ૧૯॥

યેન શુચં હતલોભ જનસ્ત્યજતિ સુધામધુરેણ ।
તેન વિભો વચસા ભજ નઃ પ્રકટિતધામધુરેણ ॥ ૨૦॥

મદયસિ યેન જનં સકલં મધુરગિરા વદનેન ।
મયિ વચનં પરિહાસકલં પ્રતિદિશ તાવદનેન ॥ ૨૧॥

યેન સતાં વિપદાનયનં દુરિતમદભ્રમહારિ ।
દિશ વિશદં મયિ તન્નયનં મદનમદભ્રમહારિ ॥ ૨૨॥

જગદખિલં યદિ નન્દયસે તિમિરમુષા રસિતેન ।
ઇમમપિ કિં ન જનં દયસે તેન તુષારસિતેન ॥ ૨૩॥

દુરિતહૃતૌ વિષસાદ કરઃ ક્વાપિ ન તે રમણીયઃ ।
અપિ સ ભયં વિષસાદકરઃ શમયતુ ઘોરમણીયઃ ॥ ૨૪॥

ભયહરણે મહિતાભ યતઃ પ્રથયસિ જાતરસત્વમ્ ।
મામપિ પાહિ મહાભયતઃ પુરહર કાતરસત્ત્વમ્ ॥ ૨૫॥

ભજામિ માયાશબરં વરં વરં દિશન્તમન્તં કુનયં નયન્નયમ્ ।
વિજિત્ય કૃત્યપ્રભવં ભવં ભવં વિખણ્ડિતક્લેશપરમ્પરં પરમ્ ॥ ૨૬॥

મલક્ષયમલક્ષયં ભવ ભવત્પ્રસાદાદહં
શિવસ્તવ શિવ સ્તવઃ પ્રવિહિતસ્તતોઽયં મયા ।
સમુદ્ધર સમુદ્ધર વ્યસનસઙ્કટાદર્કજઃ
સમક્ષમસમક્ષમઃ સ્પૃશતિ ચેન્ન જિહ્વેષિ કિમ્ ॥ ૨૭॥

સન્ત્યન્યાઃ કૃતિનામનામયગિરઃ કા નામ નામન્થરા
ન જ્ઞાનાં હૃદિ વાસ્તવાસ્તવ મુદં કે વા સ્તવાસ્તન્વતે ।
વાગેષા ત્વતિસાધ્વસાધ્વપતિતા યત્સાધ્વસાધ્વભ્યધા-
ત્તન્મન્યે મહિમાનમાનયતિ તે સ્થેમાનમાનન્દકૃત્ ॥ ૨૮॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“દ્વિપદયમકં” નામ ચતુર્વિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૫. રુચિરઞ્જનાખ્યં પઞ્ચવિંશં સ્તોત્રમ્

કિલ યસ્ય કલ્પિતમહોદયયા-
હૃદયં સમાશ્રિતમહો દયયા ।
વિભવં યતશ્ચ પરમાપ દિવઃ
પ્રભુરેષ પાતુ પરમાપદિ વઃ ॥ ૧॥

તવ સેવકસ્ય પરમેશ મનઃ
કુરુતે ન હન્તુમપિ મે શમનઃ ।
ભગવન્નતો વપુરનીરસદૃ-
ક્તવ નૌમિ સિદ્ધધુનિનીરસદૃક્ ॥ ૨॥

સ્રગિવાઽર્પ્યતે કલિતસારસના
ત્વયિ ગીર્યયા જયતિ સા રસના ।
ત્વયિ યન્મહેશ વરદેઽવહિતં
હૃદયં તદેવ વરદેવ હિતમ્ ॥ ૩॥

તવ દૃક્સુધાકરકલોપમિતા-
પતિતા વિપત્તદનુલોપમિતા ।
ભગવન્ દૃશૈવ કમલા ભવતઃ
સહસાઽઙ્કમેતિ શમલા ભવતઃ ॥ ૪॥

કુરુ નાથ ચેતસિ વચો દયિતા
તવ ગીરહં ન તવ ચોદયિતા ।
અથવા મહેશ પૃથુકામતયા
ન કિમારટન્તિ પૃથુકા મતયા ॥ ૫॥

વિષયૈર્મુખે વરદ કામધુરૈ-
ર્વિવશીકૃતં ઘટિતકામધુરૈઃ ।
ભજ માં મહેશ્વર મુદા રહિતં
દિશ ભાષિતામૃતમુદારહિતમ્ ॥ ૬॥

વિજિતં મયા જગદમોહતયા
ન રુષા ક્ષતો મમ દમો હતયા ।
તૃણવત્સુરક્ષિતિધરોઽપિ તયા
વિહિતો મહેશ હૃદિ રોપિતયા ॥ ૭॥

મરુતાયતેવ મલયાચલતઃ
ક્ષપિતા ધૃતિઃ કમલયા ચલતઃ ।
તદિમાં પ્રસાદનપરાં કરુણાં
શ ृણુ મે ગિરં કુરુ પરાં કરુણામ્ ॥ ૮॥

ભવતઃ પ્રસાદમધુરામહતાં
દૃશમીયુષાં શમધુરા મહતામ્ ।
ધૃતિમેત્યપાસ્ય ચ રમા લસતાં
સુલભત્વમેતિ ચરમાલસતામ્ ॥ ૯॥

સમરે વિકીર્ણગજરાજઘટે
બત તસ્ય શક્તિરજરા જઘટે ।
તવ યેન સેવનવિધૌ તરસા
મતિરર્પિતાઽન્યભવિધૌતરસા ॥ ૧૦॥

વિષયાન્પ્રતિ પ્રયતમાનમદઃ
સુજનો મનઃ પ્રયતમાનમદઃ ।
તવ શાસનેન વશમાનયતે
શરણં તતો નવશમાનયતે ॥ ૧૧॥

રવિજં રજોભિરિવ મેચકિતં
હૃદયં વિભાવ્ય શિવ મે ચકિતમ્ ।
વચનં જિતામૃતરસં ભ્રમતઃ
પથિ સઙ્કટે વિતર સમ્ભ્રમતઃ ॥ ૧૨॥

ત્વયિ ચક્ષુરીશ કલિતાપકૃતિ
ક્ષિપતિ ક્ષણં શકલિતાપકૃતિ ।
પરશક્તિરિદ્ધવપુરઙ્ગમિતા
જનતા યયા તવ પુરં ગમિતા ॥ ૧૩॥

રવિજસ્ય વર્ષ્મ સહસા રચિતં
ભવતાગ્નિસાદસહસારચિતમ્ ।
વપુરાપ તે મદનઘસ્મરતાં ન
તથાપિ ભીમદનઘસ્મરતામ્ ॥ ૧૪॥

કરુણા ક્ષતાનવધિકોપચયા-
ધિગતા મયા ત્વદધિકોપચયા ।

શશિના યથાકુલતરં ગલતા
દ્યુસરિન્નિરર્ગલતરઙ્ગલતા ॥ ૧૫॥

ગરુડેન યદ્વિષમપક્ષતિના
કવલીકૃતં વિષમપક્ષતિના ।
સ તવ પ્રસાદમહિમા ન પરઃ
પ્રભુરાનતં પ્રતિ હિ માનપરઃ ॥ ૧૬॥

પદમાપ્નુમાર્તિશમનં ગહનં
પ્રભુમર્થયે ભૃશમનઙ્ગહનમ્ ।
વસનં યથાર્ત્તિહરણં સહિમે
સમયે તથૈવ શરણં સ હિ મે ॥ ૧૭॥

સુરસુન્દરીષુ રમણીયતમા
સ્વવપુર્ગુણેન રમણી યતમા ।
તવ ભક્તમક્ષતરસાજર સા
ભજતે સમેત્ય તરસા જરસા ॥ ૧૮॥

ત્વયિ ગીર્મયા નિજગદે બત
યા નિખિલં જયામિ જગદેવ તયા ।
મુદિતસ્ય ભક્તિસુધયા ભવતઃ
સભયસ્ય કિં વસુધયા ભવતઃ ॥ ૧૯॥

શિરસિ સ્રજેવ વિધુરોચિતયા
હૃદિ મદ્ગિરાત્ર વિધુરોચિતયા ।
ક્રિયતાં પદં શિવ ધિયા સહતેઽ-
વિપદં સદાનવધિ યા સહતે ॥ ૨૦॥

વિભુમાશ્રયે વિગલદઙ્ગલતઃ
પ્રમયે બિભેમિ યદમઙ્ગલતઃ ।
સ વિમુચ્ય પાશમશમં ગલતઃ
કુરુતે હિ મે ભયશમં ગલતઃ ॥ ૨૧॥

ચરણૌ યથા મુરજિતઃ ક્ષમયા-
ધિગતૌ ભરં ધરિતુમક્ષમયા ।
નમતાં તથૈવ કૃતરક્ષ મયા
ભવતો ધિયા સમુચિતક્ષમયા ॥ ૨૨॥

તિમિરં રવેરિવ વિભામુદિતાં
દૃશમાપ્ય તે જહતિ યા મુદિતામ્ ।
ભગવન્ રસાદ્ગિરમિમામુદિતા-
મુપકર્ણયન્મયિ દિશાઽમુદિતામ્ ॥ ૨૩॥

કરુણા સુરૈઃ પ્રતિપદાનત યા
ભવતઃ સ્તુતા સદપદાનતયા ।
કિમુ માં ભિયાપ્તમપદાનતયા
ભજસે નિરસ્તવિપદા ન તયા ॥ ૨૪॥

તવ દૃગ્જયત્યલસતાં લસતાં
મદનસ્ય યા વ્યતનુતાઽતનુતામ્ ।
કુશલાય સા કિલ સતાં લસતાં
નિબિડં શમપ્યતનુતા તનુતામ્ ॥ ૨૫॥

યયા ભજન્તે ભુવિ માનવા હિતાં
વિભૂતિમન્તે ચ વિમાનવાહિતામ્ ।
યમં ચ યાઽધાદ્દલશો ભયાનકં
તયા દૃશા પાસ્યુરુશોભયા ન કમ્ ॥ ૨૬॥

પરમયા રમયા રહિતસ્ય મે
ન રુચિરં રુચિરઙ્ગમિમં વ્યધાત્ ।
હર મયાઽરમયાચિ ભવાનતઃ
કુરુ ચિરં રુચિરઞ્જનમેહિ મે ॥ ૨૭॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટકૃતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“રુચિરઞ્જનાખ્યં” પઞ્ચવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૬. પાદાદિયમકસ્તોત્રં ષડ્વિંશં સ્તોત્રમ્

હન્તાપહન્તાપદુપદ્રવાણાં
યસ્યાઽક્ષયસ્યાક્ષણિકઃ પ્રસાદઃ ।
સન્તાપસન્તાપહરા પ્રપેવ
કાન્તારકાન્તા રસના ચ યસ્ય ॥ ૧॥

તાદૃગ્ભતા દૃગ્મહતાં સમન્તા-
દાલોકદા લોકહિતા ચ યસ્ય ।
તં સન્તતં સન્તમસાર્ત્તલોક-
પાલં કૃપાલઙ્કૃતમીશમીડે ॥ ૨॥

હૃદ્યઃ સુહૃદ્યઃ સુકૃતોર્જિતાના-
મન્યૂનમન્યૂનપિ યઃ પૃણાતિ ।
યોઽનામયો નામગૃહીતિમાત્રા-
દસ્તાપદસ્તાપમપાકરોતિ ॥ ૩॥

ચેતઃ પ્રચેતઃપ્રમુખા યદેક-
તાનન્તતાનન્તગુણા વહન્તિ ।
યોગીતિ યો ગીતિષુ ગીયમાનઃ
સિદ્ધૈઃ પ્રસિદ્ધૈઃ પ્રભુરભ્યુપેતઃ ॥ ૪॥

માન્યોઽધમાન્યોઽધરયત્યુદગ્ર-
રંહોભિરંહોભિરપાસ્તવૃત્તાન્ ।
નામાપિ નામાપિદધાતિ વીતા-
લોકસ્ય લોકસ્ય તમાંસિ યસ્ય ॥ ૫॥

ભૂતિર્વિભૂતિર્વિપુલા દિશશ્ચ
વાસો નિવાસો નિલયઃ પિતૃણામ્ ।
હીનૈરહીનૈરપિ યસ્ય ભૂષાઽ-
રાલા કરાલા કલિકા ચ મૌલૌ ॥ ૬॥

યઃ ખેઽલયઃ ખેલતિ યઃ શિખાભિઃ
સત્યં હસત્યંહતિહારિણીભિઃ ।
ભાનાં શુભાનાં શુચિરીશ્વરો ય-
સ્તાનક્ષતાનક્ષિષુ યો બિભર્તિ ॥ ૭॥

સઙ્ખ્યેષ્વસઙ્ખ્યેષ્વપિ યો ભટાનાં
વૈરસ્ય વૈરસ્યભુવો નિદાનમ્ ।
નિન્દાવનિં દાવહુતાશવન્તં
રોષં ખરોષં ખલુ યઃ પ્રમાર્ષ્ટિ ॥ ૮॥

યજ્ઞો નયજ્ઞેન વૃતો ન પૂર્વં

દક્ષેણ દક્ષેણ શુભે વિધૌ યઃ ।
તસ્યાऽऽનતસ્યાऽનઘમુજ્ઝિતાવ-
સાદં પ્રસાદં પ્રદદૌ દયાબ્ધિઃ ॥ ૯॥

નીતાવનીતાવચલૈરલભ્યઃ
સાધ્યૈરસાધ્યૈરપિ યસ્તપોભિઃ ।
સેવાલસે બાલમુનૌ કિલોપ-
મન્યાવમન્યાવકરોત્પ્રસાદઃ ॥ ૧૦॥

નાયં વિનાऽયં વિદધાતિ લોકઃ
કર્મણ્યકર્મણ્યતયાભિયોગમ્ ।
સત્ત્વાનસત્ત્વાનપિ નેતુમાસ્થા-
મર્થઃ સમર્થઃ સ યતોऽભ્યુદેતિ ॥ ૧૧॥

ધર્મેણ ધર્મેણ નિજોચિતેન
કામેન કામેન વૃતાભયેન ।
કાલેન કાલે નતિમાગતેન
વાતેન વા તેન સુખાવહેન ॥ ૧૨॥

જીવેન જીવેન તદર્પિતેન
કાવ્યેન કાવ્યેન મનોહરેણ ।
મિત્રેણ મિત્રેણ તમોવૃતાનાં
સૌમ્યેન સૌમ્યેન ચ સેવ્યતે યઃ ॥ ૧૩॥

લોકાન્ સલોકાન્ સદયોऽસૃજદ્યો
ધાતા વિધાતા વિભુરીપ્સિતાનામ્ ।
દેવઃ પદે વઃ પરમે નિયોક્તા
કામં સકામં સફલીકરોતુ ॥ ૧૪॥

તં વન્દિતં વન્દિભિરર્ચયન્તે
સન્તો લસન્તો લલિતૈર્વચોભિઃ ।
તસ્યાऽજિતસ્યાજિષુ નૌતિ લીલા-
મુત્તાલમુત્તાલરવેણ લોકઃ ॥ ૧૫॥

ધીરસ્ય ધીરસ્યતિ તસ્યતીક્ષ્ણા-
બન્ધાનુબન્ધાનુગતાં પ્રવૃત્તિમ્ ।
દાનં દદાનં દયિતેવ રાગા-

દાનન્દદા નન્દયતે ચ તં શ્રીઃ ॥ ૧૬॥

સમ્પન્નસમ્પન્નવસિદ્ધિહેતું
ધુર્યામધુર્યામમરેન્દ્રમુખ્યાઃ ।
ભાસા શુભા સા શુચિરીશભક્તિ-
ર્યસ્યાઽભયસ્યાભરણત્વમેતિ ॥ ૧૭॥

શઙ્કા ભૃશં કા ભૃતકપ્રિયશ્ચે-
દાસન્નદાસં ન જહાતિ શમ્ભુઃ ।
નારાધનારાધયિતુશ્ચ મિથ્યા
કિં ચિત્ત કિઞ્ચિત્તરલત્વમેષિ ॥ ૧૮॥

સાનન્દ સા નન્દનભૂસ્તૃણં તે
કલ્યાણ કલ્યાણગિરિઃ ક્વ ગણ્યઃ ।
સા તેજસા તે જડતામુદસ્ત-
કમ્પાઽનુકમ્પા નુદતીન્દુમૌલેઃ ॥ ૧૯॥

જમ્બાલજં બાલરવેરિવાભા-
ઽદીનં નદીનં નવચન્દ્રિકેવ ।
સાશઙ્ક સા શઙ્કરભક્તિરુચ્ચૈ-
રક્ષામરક્ષા મદયિષ્યતિ ત્વામ્ ॥ ૨૦॥

નો ભોગિનો ભોગિભિરર્ચિતો યઃ
સાતઙ્ક સાતં કલયઞ્જહાતિ ।
સ ત્વાઽલસત્વાલયદૈન્યહારી
પાસ્યત્યપાસત્યશુભં ચ શમ્ભુઃ ॥ ૨૧॥

દોષપ્રદોષપ્રસૃતાપિ સક્ત્તા
સેવારસે વારવિલાસિનીવ ।
યા નિર્ભયા નિર્ભરરાગિણી ત્વા-
માયાતિ માયાતિમિરેઽભિસર્ત્તુમ્ ॥ ૨૨॥

ભાવાનુભાવાનુગમેન રૂઢા
બાલા નવાલાનગતા વશેવ ।
સાઽનેહસા નેહ વિહાસ્યતિ ત્વાં
કણ્ઠોપકણ્ઠોપગતૈવ વાણી ॥ ૨૩॥

દિવ્યા યદિ વ્યાયતકાન્તયસ્તે
ગૌરીશ ગૌરી શશિનઃ કલા ચ ।
વિઘ્નન્તિ વિઘ્નં તિમિરાભિધાનં
તેનાઽહતેનાઽહમુપદ્રુતઃ કિમ્ ॥ ૨૪॥

મુદ્યોગમુદ્યોગભૃતો ભજન્તે
શંસન્તિ શં સન્તિ ચ નિર્વિકલ્પાઃ ।
ભક્તા વિભક્તા વિપદસ્ત્વદીયાઃ
કસ્માદકસ્માદહમેવ મગ્નઃ ॥ ૨૫॥

વાચાં તવાચાન્તશુચાં શુભાના
મોઘા ન મોઘા નમતાં કદાચિત્ ।
તૈરુદ્ધતૈરુદ્ધર મામનાથં
લીનં કુલીનં કુદશાન્ધકારે ॥ ૨૬॥

કલ્પાન્તકલ્પાન્તકભીતિયુક્તં
રક્ષામિ રક્ષામિહ યોઽર્હતીતિ ।
યસ્તે નયસ્તેન દિશ પ્રસન્ના-
મત્રાઽસમત્રાસહરાં દૃશં મે ॥ ૨૭॥

કન્દર્પ કં દર્પમુપૈષિ યાત-
મસ્તં સમસ્તં સહસા બલં તે ।
ભીરો ગભીરો ગલિતઃ કિમુચ્ચૈ-
રક્ષોભરક્ષો ભગવત્પ્રસાદઃ ॥ ૨૮॥

વિદ્યામવિદ્યામપિ તાં યયા ત્વા-
મારાધ્યમારાધ્ય સુખી ભવામિ ।
માયાપિ મા યાપિતભીરુપૈતુ
યાતા ન યા તાનવમર્ચિતું ત્વામ્ ॥ ૨૯॥

રામાભિરામાભિમતા ધૃતાર્ધે
ભોગોપભોગોપગતેન કેન ।
કસ્યાન્તકસ્યાન્તકરી ચ લક્ષ્મી-
ધામાનિ ધામાનિ બિભર્તિ દૃષ્ટિઃ ॥ ૩૦॥

કઃ સ્તમ્ભકઃ સ્તમ્ભનિભસ્ય જિષ્ણોઃ
કસ્તાપકસ્તાપકૃતઃ સ્મરસ્ય ।

કારાનુકારાનુભવે ભવેઽસ્મિન્
કો જીવકો જીવભૃતાં વિના ત્વામ્ ॥ ૩૧॥

યા શંસયા શંસતિ શમ્ભુભક્તિં
ચેષ્ટાસુ ચેષ્ટાસુ રતિં સ્મરસ્ય ।
તામક્ષતામક્ષયપુણ્યકોષા-
દન્યો વદન્યો વહતે તનું કઃ ॥ ૩૨॥

યાહન્તયા હન્ત નૃપેઽપ્યવજ્ઞા-
માનઞ્જ માનં જનયન્ત્યભઙ્ગમ્ ।
હા નિઃસહા નિઃસરણેઽપિ ભક્ત્યા
સા વાગસાવાગમદન્તિકં તે ॥ ૩૩॥

દેવં યદેવં યમકૈર્મહેશં
તુષ્ટાવ તુષ્ટાવસરોચિતં ગીઃ ।
શસ્યો યશસ્યોઽયમુપસ્થિતોઽસ્મા-
દેનોભિદે નોઽભિમતઃ પ્રસાદઃ ॥ ૩૪॥

તરલતરલતાગ્રસ્પર્દ્ધિની ચઞ્ચલત્વં
રુચિરરુચિરમન્દાનન્દદા મુઞ્ચતિ શ્રીઃ ।
ચરતિ ચ રતિકાન્તધ્વંસિશંસારતાનાં
મધુરમધુરસાર્દ્રા ભારતી વક્ત્રપદ્મે ॥ ૩૫॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“પાદાદિયમકસ્તોત્રં” નામ ષડ્વિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૭. પાદમધ્યયમકાખ્યં સપ્તવિંશં સ્તોત્રમ્

જયતિ સંયતિ સઙ્ગતપાણ્ડવ-
પ્રહરણાહરણાહિતકૈતવઃ ।
તરુણદારુણદાશવપુર્ધૃત-
સ્થિરયશા રયશાલિશરો હરઃ ॥ ૧॥

ભુવનપાવનપાદમધર્ષિતં
મઘવતાઽઘવતામપિ સસ્પૃહમ્ ।

મુનિજનીનિજનીતિપરીક્ષણે
ધવલકેવલકેલિકૃતં સ્તુમઃ ॥ ૨॥

સ્થિરમગારમગાત્મજયા શ્રિતં
સ્મરવિકારવિકાસપરાઙ્મુખમ્ ।
ભુજગરાજગરાગ્નિશિખાવલી-
વિષમવેષમવેપથુદાયિનમ્ ॥ ૩॥

શમિષુ કામિષુ કારુણિકેષુ વા
વરમઘોરમઘોપશમક્ષમમ્ ।
ઘનવિપન્નવિપન્નિધને સદા
પરમધીરમધીશમુપાસ્મહે ॥ ૪॥

શ્રુતનયાસ્તનયાસ્તનુમધ્યમા
યુવતયો બત યોગિમનોહૃતઃ ।
યદઘનામઘનામયવૈશસં
તદમૃતેશમૃતે શમયન્તિ કિમ્ ॥ ૫॥

ન હરિણા હરિણાઙ્કશિખામણે
ન વિધિના વિધિનાઽપિ સપર્યતા ।
તવ પુરા વપુરામમૃશે વયં
ક્વ નુ ભવાનુભવાવૃતચેતસઃ ॥ ૬॥

ચતુરગાસ્તુરગા નગજા ગજાઃ
સ્થિરમુદારમુદાત્તબલં બલમ્ ।
પ્રભવતા ભવતા વિહિતે હિતે
પ્રતિદિશન્તિ દિશં કમલામલામ્ ॥ ૭॥

દ્વિજસમાજસમાધિકદર્થન-
પ્રવણરાવણરાજ્યહૃતૌ કૃતી ।
ચરણયો રણયોગ્યબલોઽભવ-
ન્નવનતો વનતો ભરતાગ્રજઃ ॥ ૮॥

શુભરતો ભરતોઽપ્યભવદ્વિષદ્-
ગરિમહારિમહાઃ સમવાપ્ય યમ્ ।
દિશ તમીશ તમીપતિશેખર
સ્થિરમનુગ્રમનુગ્રહમેહિ મે ॥ ૯॥

ભૃશમનીશમનીતિપથસ્થિતં
મદવશાદવશાક્ષમુપપ્લુતમ્ ।
અહરહર્હર હર્ષયતે ન કિં
હિતવતી તવ તીવ્રશુચં રુચિઃ ॥ ૧૦॥

કુશલપેશલપેલવદૃગ્વમન્
રસનયા સનયાર્ત્તિહૃતામૃતમ્ ।
મદનસાદન સાન્ત્વય સમ્પદા-
મપદમાપદમાશ્રિતમેહિ મામ્ ॥ ૧૧॥

કથમનાથમનાગસમન્તિકે
મદનમર્દન મર્ષયસે ન મામ્ ।
ભુવનભાવન ભાતિ વિના ત્વયા
જગતિ કોઽગતિકોદ્ધરણક્ષમઃ ॥ ૧૨॥

યદિ કૃપાપર પાપરતસ્ય મે
ન કુરુષે પરુષે પદમાશયે ।
હિતતમા કતમા કલુષાત્મનો
મમ હરાઽમહરા ઘટતે ગતિઃ ॥ ૧૩॥

સ્થિરવિભા રવિભાતિરિવોન્મદં
મદમયં દમયન્ત્યસમન્તમઃ ।
તવ દયા વદ યાત્યુદયં ન ચેદ્
ભવતમી બત મીલતિ મે કથમ્ ॥ ૧૪॥

રજનિરાજનિરાકરણક્ષમઃ
ક્ષતનિશાતનિશાતિમિરોત્કરઃ ।
કૃતવિભાતવિભાભરભાસ્વરો
દિનકરો ન કરોત્યુદયં યદા ॥ ૧૫॥

દિવિ યદા વિયદાભરણં કૃપા-
પરમતે રમતે ન સુધાકરઃ ।
ન શુચિરાશુ ચિરાપતિતં યદા
સ્થિરમપારમપાકુરુતે તમઃ ॥ ૧૬॥

તનુકૃશાનુકૃશાં ગ્રસતે યદા

મિહિરજાહિરજાતઘૃણસ્તનુમ્ ।
શિવ તદા બત દાસ્યતિ મે ધૃતિં
ત્વદિતરઃ કતરઃ કરુણાપરઃ ॥ ૧૭॥

નિધનસાધનસાન્દ્રલસદ્વિષા-
નલકરાલકરાત્તમહોરગઃ ।
નિયમનાય મનાઽમમ સસ્પૃહે
ભવતિ ધાવતિ ધામ યમઃ કથમ્ ॥ ૧૮॥

પલિતમીલિતમીશ મમ સ્મર-
શ્ચતુરમાતુરમારચયન્વપુઃ ।
ઘનબલેઽનવલેપપરે ત્વયિ
પ્રભવિતા ભવિતાપકરઃ કથમ્ ॥ ૧૯॥

કિમધુના મધુનાપિ યુતો વહન્
રતિમભીતિમભીષ્ટતમામપિ ।
શ્રિતમવન્તમવન્ધ્યબલં વિભું
જયતિ માં યતિમાનહરઃ સ્મરઃ ॥ ૨૦॥

વિષમરોષમરોઃ પથિ પાતય-
ન્મતિમનીતિમનીક્ષિતસત્પથામ્ ।
ભૃશમયં શમયન્નિયમં કથં
તવ પુરો વપુરોષતિ મે મદઃ ॥ ૨૧॥

મમ નિકામનિકારકૃતો વૃથા
વપુરવાપુરવાર્યરુષોઽરયઃ ।
ન હિ તદાહિતદાહમદન્ત્યમી
તવ હિતાવહિતા હિ નતેષુ ધીઃ ॥ ૨૨॥

યદિ વિભા દિવિ ભાતિ ન તાવકી
યદિ ન મે દિનમેતિ ભવન્મયમ્ ।
વદ મહાદમહારિ તમઃ કથં
વિષમદોષમદો વિનિવર્તતે ॥ ૨૩॥

કમલિની મલિનીક્રિયતે યયા
વિહતસન્તતસન્તમસાપિ યા ।
સ્મરચિતા રચિતાપિ ચ યત્ર તાં

વિતર કાતરકામદુઘાં દૃશમ્ ॥ ૨૪॥

તુહિનવાહિનવાનિલજે મનઃ
સહસિ રંહસિ રઞ્જયતિ પ્રિયા ।
ન રસિકોરસિ કોષ્ણકુચા તથા
તવ ગુણાનુગુણા નુતિગીર્યથા ॥ ૨૫॥

અયમસૌ યમસૌષ્ઠવહૃત્પુરઃ
પરુષપૌરુષપૌષ્ટિકચેષ્ટિતઃ ।
વિધુરબન્ધુરવન્ધ્યપરિગ્રહઃ
સ્ફુરતિ મે રતિમેત્ય મહેશ્વરઃ ॥ ૨૬॥

અનિધનેન ધનેન મનસ્વિના-
મનુગુણેન ગુણેન ગરીયસા ।
અભિજનેન જનેન સુદુષ્કૃતૈ-
રશબલેન બલેન ચ વર્ધતે ॥ ૨૭॥

અભિનવેન નવેન શિવસ્ય યઃ
સ્તુતિમુદારમુદારભતેઽમુના ।
અવહિતસ્ય હિ તસ્ય તનોતિ શં
વિભવદો ભવદોષહરો હરઃ ॥ ૨૮॥

સ સકલાસુ કલાસુ વિચક્ષણઃ
સ મતિમાનતિમાનસમુન્નતઃ ।
ન શશિખણ્ડશિખણ્ડમૃતે સ્તુતિં
સુકૃતવાન્ કૃતવાનપરસ્ય યઃ ॥ ૨૯॥

રવિરહો વિરહોધ્દુરણાદ્વિ-
શન્ધૃતિમુદેતિ મુદે રથપક્ષિણામ્ ।
યદવિષાદવિષાભિભવં જગ-
ત્કૃતમસન્તમસં સ્તુતિભિઃ પ્રભોઃ ॥ ૩૦॥

વિનયશોભિઃ યશોભિરતં મનઃ
પરહિતારહિતા વિમલા મતિઃ ।
વિપુલમઙ્ગલમઙ્ગમિતિ પ્રભોઃ
પ્રતિફલન્તિ ફલં સ્તુતિવીરુધઃ ॥ ૩૧॥

જિતસુધારસુધારસભારતી-
વિભવસમ્ભવસમ્ભૃતકીર્તયઃ ।
કવિબુધા વિબુધાધિપવન્દિતં
સુકૃતિનઃ કૃતિનઃ સ્તુવતે શિવમ્ ॥ ૩૨॥

ન મહતામહતામલસંવિદાં
મદયિતા દયિતાધિગમસ્તથા ।
મધુરસાધુરસાર્દ્રપદા યથા
સયમકા યમકામરિપુસ્તુતિઃ ॥ ૩૩॥

કા નામ નામરવધૂરવધૂતકાન્તા
કાન્તા ન કા નરજની રજનીપતિશ્રીઃ ।
શ્રીમન્તમન્તકરિપું કરિપુઙ્ગવાન્ત-
હેતું સ્તુવન્તમવિરામવિરાવમેતિ ॥ ૩૪॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"પાદમધ્યયમકાખ્યં" સપ્તવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૮. પાદાન્તયમકસ્તોત્રં અષ્ટાવિંશં સ્તોત્રમ્

અન્તશ્ચેતસિ નિર્વૃતિર્ન ગમિતા નાશં કયા શઙ્કયા
નૈષા પુષ્યતિ તેન સંહૃતગતિઃ શોભારતી ભારતી ।
ભક્તિઃ કિં તુ વિજૃમ્ભતે મમ યથૈવાભા સ્વતો ભાસ્વતો
યાદૃક્તાદૃગતઃ કિમપ્યભિદધે સમ્પ્રત્યહં પ્રત્યહમ્ ॥ ૧॥

વક્ત્રં બિભ્રદદભ્રદીર્ઘદહનજ્વાલં ભયં લમ્ભ-
યન્નુદ્ગ્રીવં ઘટયન્કરે વિદધતં વ્યાલં ઘનં લઙ્ઘનમ્ ।
પ્રત્યાસીદતિ મૃત્યુરિત્યુપચિતસ્ફારોચિતાં રોચિતાં
શ્રુત્વા માં ન કથં વિભુર્ગિરમિમાં ચિત્રાયતાં ત્રાયતામ્ ॥ ૨॥

મન્યે તાં સ્પૃહણીયગૌરવગુણામાયામિનીં યામિનીં
તત્સેવારસમાદધત્તવ સુધા સંવાદિનં વા દિનમ્ ।
યત્રોપાન્તગતં વચોભિરુચિતૈરાનન્દિનં નન્દિનં
કુર્વદ્ભિશ્ચરિતં સુચારુ જગતામીશસ્ય તે શસ્યતે ॥ ૩॥

તસ્યોદેતિ સદઃસદાં વિદલિતગ્લાનિર્ભરો નિર્ભરો
વાચાં વક્ત્રસરોરુહે પરિણમત્પાકોડમલઃ કોમલઃ ।
લક્ષ્મીસ્તં ન જહાતિ કિં ચ વિભવૈરાભાસિતાભાસિતા
યેન ત્વં હૃદયામ્બુજે ભવભયાત્ત્રાતોષિતસ્તોષિતઃ ॥ ૪॥

સેવ્યન્તે ભગવન્નપાસ્ય(અવાપ્ય)કલિતોલ્લાસં મદં સમદમ્ (પદં સમ્પદં)
બિભ્રાણાસ્તરુણીજનેન મધુરવ્યાહારિણા હારિણા ।
વીજ્યન્તે દિવિ ચન્દ્રરશ્મિરુચિતૈઃ કિઞ્ચાડમરૈશ્ચામરૈ-
રાબાલ્યાદ્વિદધે ત્વદેકવિષયા યૈઃ શેમુષી શેમુષી ॥ ૫॥

તૂર્ણં ચૂર્ણયિતું વપુર્યમભટો ઝમ્પારયં પારય-
ન્નુચ્ચણ્ડભ્રુકુટીકરાલિતમુખો યત્રાસકૃત્ત્રાસકૃત્ ।
તાં ભૂમિં પરિહર્તુમીશ્વર ભવત્સેવાધનં બાધનં
દુઃખાનામધિગમ્ય હન્મિ કુમતિપ્રાદુષ્કૃતં દુષ્કૃતમ્ ॥ ૬॥

મુઞ્ચદ્ભિર્યમકિઙ્કરૈઃ કૃતમહાજૃમ્ભૈરવં ભૈરવં
યાવદ્દર્શિતમાનનં ન ઘુસૃણક્ષોદારુણં દારુણમ્ ।
તાવત્સત્ત્વરમેહિ દેહિ મહસાં ધામેદૃશં મે દૃશં
યા દૂરીકુરુતે નિરન્તરસુધાસન્દોહદં દોહદમ્ ॥ ૭॥

યાવદ્દુઃસહવહ્નિહેતિવિહિતસ્ફીતાપદં તાપદં
જન્તૂનાં ભગવન્ ભજામિ નરકં નાહં સદાહં સદા ।
તાવન્મુઞ્ચ વચો યથા મરુપથે બાધાવતાં ધાવતાં
ભીષ્મગ્રીષ્મકદર્થ્યમાનવપુષાં સઞ્જીવનં જીવનમ્ ॥ ૮॥

ન્યસ્તં યેન મનસ્ત્વયીદમહતોત્સાહં તયાડહન્તયા
ગાઢોદ્વેગવિધાયિની ઘટયતે સાયાસતાં યા સતામ્ ।
તં ભોગૈરુપસેવતે સુમનસામાનન્દને નન્દને
દિવ્યસ્ત્રીજનતા વિલાસવિકસચ્છોભા સુરં ભાસુરમ્ ॥ ૯॥

યસ્યા હન્તિ ધૃતિં વિવેકવિહિતહ્રાસા વિલાસાવિલા
મુગ્ધા દૃઙ્મદિરામદેન વિગલદ્વાચારુણા ચારુણા ।
રામા કામમહાસ્ત્રમર્પયતિ મે સા હન્ત મોહં તમો
યેનાડજ્ઞાનમયં મનસ્યુપરમત્તાપપ્રથે પપ્રથે ॥ ૧૦॥

લજ્જેડહં ભજ દૂરમેવ રભસાદેવં ધુતા બન્ધુતા-
સમ્મૂઢેન મયા યયા વિધૃતવાનેતામહન્તામહમ્ ।

કિં કિં શ્રીમદમોહિતેન વિભવસ્થેનાઽહિતં નાહિતં
યેનૈતાં ન ભજે પુનર્મયિ વરં બાધે હિતં ધેહિ તમ્ ॥ ૧૧॥

આનીતા ચરણાન્તિકપ્રણયિતાં કામેન કા મેનકા
કાર્યં કિં ઘનભોગસમ્ભૃતવિધૌ સારમ્ભયા રમ્ભયા ।
કાન્તા મે પરમેશ્વરે હતવિપત્સમ્ભાવના ભાવના
ચિત્તે કાપિ રતિર્યયાહિતહિતવ્રાતાયતે તાયતે ॥ ૧૨॥

ધત્તે યસ્ય જટા કપાલપટલં ભવ્યા કુલં વ્યાકુલં
હંસાનામિવ રુન્ધતીં ભગવતીં ગઙ્ગાં તરઙ્ગાન્તરમ્ ।
તસ્યાધાય મહેશિતુર્નુતિગિરાં નવ્યાકૃતિં વ્યાકૃતિં
ભક્ત્યા નિશ્ચલયા નૃજન્મ સકલં સમ્માનયામાનયા ॥ ૧૩॥

કશ્ચિચ્છ્રીર્વસતેઃ કરોતુ વિકસચ્છોભા જનં ભાજનં
કશ્ચિદ્બન્દિજનઃ પ્રશંસતુ મુદં પ્રીત્યા ગતસ્ત્યાગતઃ ।
મન્યેઽહં તુ સમગ્રશોકશમનં સંન્યાસમન્યાસમં
યસ્મિન્મૃત્યુજિતં ભજામિ મનસા વાચેષ્ટયા ચેષ્ટયા ॥ ૧૪॥

રૂપં યદ્ભવતો દધત્પરિકરં ભૌજઙ્ગં જઙ્ગમં
સેવન્તે યદપિ શ્રિયા કૃતધિયઃ સ્વસ્થા વરં સ્થાવરમ્ ।
પ્રાજ્યં જ્યોતિરિવ પ્રસહ્ય તમસાં વૈકર્તનં કર્તનં
લબ્ધ્વા તત્પ્રતિભા કથં ન જનિતસ્વાભા સતાં ભાસતામ્ ॥ ૧૫॥

સ્તોતું વાઞ્છસિ સંશ્રિતં મરકતશ્યામં ગલં મઙ્ગલં
લબ્ધું માનસ તત્પરં ભગવતઃ સેવાસુ કિં વાસુકિમ્ ।
ભક્તિશ્ચેદ્ભવતિ સ્થિતિં મદમરુદ્વેગાહતે ગાહતે
તદ્બધ્નાસિ ધૃતિં ત્વમપ્યહિપતિપ્રાવારસેવારસે ॥ ૧૬॥

દૃષ્ટ્વા યન્મઘવા વિહાય ગતવાનૈરાવણં રાવણં
પશ્યન્પાણ્ડુતયા ભયાદનુકૃતશ્યામાધવં માધ્વમ્ ।
સર્વોઽયં ભવતઃ પ્રસાદમહિમા હન્તા નવં તાનવં
સેવા કસ્ય ન સિદ્ધયે હતવૃથાસઙ્કલ્પ તે કલ્પતે ॥ ૧૭॥

તં હત્વા સબલં નિશાચરપતિં લઙ્કાલયં કાલય-
ન્નાર્તિં નાકસદામુપેત્ય વિભવં વૈભીષણં ભીષણમ્ ।
વૈદેહીમનઘાં લભેત સ કથં રામો હિ તાં મોહિતાં
ત્વદ્ભક્તિં યદિ ન વ્યધાસ્યતનુતો ભ્રાજિષ્ણુના જિષ્ણુના ॥ ૧૮॥

લોકં શોકહરં પરં પ્રતિ ભૃશં સન્દેહિનાં દેહિનાં
માયા મોહતમોવિમોહિતદૃશામાયાસદા યા સદા ।
તાં હન્તું મમ કિં કરોષિ વિહિતજ્ઞાનોદયાં નો દયાં
યસ્યા દાસ્યમપીહ નાર્હતિ ઘનસ્ફારા સુધારા સુધા ॥ ૧૯॥

દોષાણાં સહસા વિધાતુમુદયં નો સામ્પ્રતં સામ્પ્રતં
સ્વાલોકક્ષપણં કરોતુ તિમિરં તન્માદૃશાં મા દૃશામ્ ।
ખ્યાતઃ પૌષ્ણ ઇવ પ્રસહ્ય કમલોલ્લાસાદયં સાદય-
ન્નાર્તિં ન પ્રકટીકરોતિ બત કામાશાં કરઃ શાઙ્કરઃ ॥ ૨૦॥

શીતસ્નિગ્ધં પરિમલસુખં ઘાનસારં ન સારં
નાપિ પ્રેમ્ણા કલિતલલિતોદ્દામહેલામહેલા ।
તસ્માજ્જિત્વા ભવમનુદિતસ્તમ્ભજેયં ભજેયં
ભૂયો ભૂયો હર પરહિતારમ્ભવન્તં ભવન્તમ્ ॥ ૨૧॥

દૃષ્ટિઃ સ્ત્રીણાં મમ નિવસતો હાનિશાન્તે નિશાન્તે
ચિત્તં રુન્ધે શિશુમિવ મૃગં વાગુરા ભઙ્ગુરાભમ્ ।
તત્સમ્પર્કાદહમિવ સહે દેવ માનાઽવમાના-
વાર્ત્તઃ પ્રાપ્તઃ શરણમધુના ત્વામુદારં મુદારમ્ ॥ ૨૨॥

પ્રાજ્યં રાજ્યં નૃપતિમકરીરત્નનિર્યત્નનિર્ય-
દ્રશ્મિસ્રોતઃસ્નપિતચરણં ક્રાન્તસામન્તસામ્ ।
સભ્રૂભઙ્ગં મુનિજનમનઃક્ષોભિરામાઽભિરામા
વક્ત્રં બિભ્રત્યુપચિતરતિર્ઘસ્મરેણ સ્મરેણ ॥ ૨૩॥

દ્વારિ ક્ષોભઃ ક્ષિતિધરગુહાભોગજાનાં ગજાનાં
કા વા સઙ્ખ્યા પ્રકટિતવિપદ્બાધનાનાં ધનાનામ્ ।
ઇત્થં લક્ષ્મીઃ કથમિવ ભજેદ્ધામહીનં મહીનં
સ્યાચ્ચેન્નૈકસ્તવ કૃતરિપુક્ષિપ્રસાદઃ પ્રસાદઃ ॥ ૨૪॥

ભીમાં પઙ્ક્તિં પુરુષશિરસાં મસ્તકેઽશસ્તકેશ-
પ્રોતાં ધત્સે વિબુધસરિતો યાં તરઙ્ગાન્તરઙ્ગામ્ ।
સૈવ શ્રેયઃ પ્રથયતિ યથા દેવ રાજીવ રાજી
ત્વત્સમ્પર્કાદ્ઘટયતિ ન કિં મઙ્ગલાભઙ્ગલાભમ્ ॥ ૨૫॥

કૃત્વા શય્યામુપાન્તે વિરચિતકલિકાદામશેષામશેષાં

સમ્પત્તિં માનયન્તઃ કુસુમબલગલદ્બાલતાનાં લતાનામ્ ।
સેવ્યન્તે હન્ત વૃન્દૈરવિરતરતયઃ સુન્દરીણાં દરીણા-
મન્તસ્ત્વદ્ભક્તિભાજઃ સિતકરકિરણૈરુત્તમાયાં તમાયામ્ ॥ ૨૬॥

હન્તાઽહન્તાવૃતાનાં મહ ઇવ રજની ભાસમાનં સમાનં
જ્ઞાનં જ્ઞાનન્દકારિ ગ્લપયતિ વિલસદ્બોધનાશા ધનાશા ।
વાચા વાચાલભાવં તવ વિહિતવતાં વાસ્તવેન સ્તવેન
શ્રેયઃ શ્રેયસ્કરસ્ત્વં ભવ ભવસિ વિપદ્ભાજનાનાં જનાનામ્ ॥ ૨૭॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“પાદાન્તયમકસ્તોત્રં” નામાષ્ટાવિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨૯. એકાન્તરયમકસ્તોત્રં એકોનત્રિંશં સ્તોત્રમ્

ઉદારવર્ણૈરથ સઙ્ગતૈરહં
મુદાભિધાવદ્ભિરુપોઢલક્ષણૈઃ ।
પદૈરમન્દધ્વનિભિર્મહેશ્વરં
પ્રભું પ્રપદ્યે તુરગોત્તમૈરિવ ॥ ૧॥

શિવેન દેવ્યા જગૃહે કરોહિત-
સ્ત્રસન્યદા કુઙ્કુમપઙ્કરોહિતઃ ।
તદાસ્ય યોઽર્કાગ્નિનિશાકરોહિતઃ
સ્તવઃ સ વઃ સ્યાદભયઙ્કરો હિતઃ ॥ ૨॥

અનઙ્ગજં નેત્રવિકાસકારણં
નિરઙ્કુશં કર્ણકરેણુવારણમ્ ।
અચન્દ્રિકં ચિત્તચકોરપારણં
ક્રિયાદ્વ ઈશાર્ચનમાર્તિદારણમ્ ॥ ૩॥

સુખાકરોતિ ક્લમહૃન્ન માધવ-
સ્તથામરૌ વોપવનેઽપિ માધવઃ ।
યથા શરીરાર્ધનિરુદ્ધમાધવઃ
પ્રશસ્યમાનો ભગવાનુમાધ્વઃ ॥ ૪॥

દિનાન્તરાત્ર્યાગમયોરિવાથવા

સુરસ્રવન્તીયમુનૌઘયોરિવ ।
ઉમારમાકામુકયોઃ સમાગમઃ
સિતાઽસિતસ્તાપમઘં ચ હન્તુ વઃ ॥ ૫॥

ઉમાખ્યમાસાદ્ય મહાનિયોઽગતઃ
પ્રિયં નિધિં સૌખ્યમહાનિ યો ગતઃ ।
કરોતુ યુષ્માકમહાનિ યોગતઃ
શુભાન્યસાવિદ્ધમહા નિયોગતઃ ॥ ૬॥

દ્વિજાધિપાધિષ્ઠિતશેખરં મહા-
ભુજં ગવિન્યસ્તભરં સમુદ્વહન્ ।
વપુઃ સદાભઙ્ગદયાસમાશ્રિતં
તનોતુ વઃ સમ્પદમચ્યુતઃ શિવઃ ॥ ૭॥

અઘદ્રુમધ્વંસમહાકરેણવઃ
સુધાસિતાઃ પાવકકલ્કરેણવઃ ।
વસન્તિ યસ્મિન્નભયઙ્કરેઽણવઃ
કરોતુ શં તેન હરઃ કરેણ વઃ ॥ ૮॥

ધૃતિસ્ત્વદીયેન સુદર્શનેન મે
ભવત્યભેદસ્તુ હરે કિમુચ્યતે ।
પરસ્પરં શઙ્કરકૃષ્ણયોરિદં
વચઃ સુખાયૈકમુખોત્થમસ્તુ વઃ ॥ ૯॥

ન જન્મ યસ્યાદ્રિનિવાસ દારુણઃ
સ તે જ્વલત્યક્ષિણ શિખી સદારુણઃ ।
યમં ન કિં તેન શિરઃસદાઽરુણ-
સ્ત્વદાશ્રિતં કિં ગ્રસતાં સ દારુણઃ ॥ ૧૦॥

સદા નગોપાહિતબન્ધુરસ્થિતિં
સ્તુવે પિનાકેન સમેધિતશ્રિયમ્ ।
મહર્દ્ધિકં સોપશમે કૃતાદરં
હરં હરિં વા તરસા રસાદહમ્ ॥ ૧૧॥

મનો ભૃશં ભ્રામ્યતિ બાલિશં ભવે
જહાતિ ભક્તિં ચ દિવાનિશં ભવે ।
અતઃ પરં નામ કિમસ્ય શં ભવે-

ન્નિવેદયેત્સ્વં યદિ કર્મ શમ્ભવે ॥ ૧૨॥

સમુદ્રજન્માનમુપાદધત્કરે
સિતદ્યુતિં વક્ત્રનિવેશનોચિતમ્ ।
રતઃ સદાસ્કન્દકદર્થનાહતૌ
હરો હરિર્વા દુરિતં ધુનોતિ વઃ ॥ ૧૩॥

જિગીષવઃ ક્લેશપરમ્પરાભવં
વનેષુ ભિક્ષાધૃતકર્પરા ભવમ્ ।
અસોઢવન્તઃ કુનૃપાત્પરાભવં
ભજન્તિ સન્તઃ સ્તુતિતત્પરા ભવમ્ ॥ ૧૪॥

કદા દધાનો ઘનશાન્તિશોભિનીં
શુભામ્બરાલઙ્કરણોચિતાં તનુમ્ ।
ભજામ્યહં દૃષ્ટિનિવેશનૌચિતીં
શશીવ તિગ્માંશુરિવાઽચ્યુતસ્ય તે ॥ ૧૫॥

કિમામ્રવન્યા સૃમરાલવાલયા
પ્રિયાકબર્યા કિમરાલબાલયા ।
સરઃશ્રિયા કિં સમરાલબાલયા
ધૃતેશભક્તિર્હ્યમરાઽલવાઽલયા ॥ ૧૬॥

કદાઽનવદ્યામતિનિર્મલામહં
મહાનદીનાં સલિલૈઃ પ્રસાદિભિઃ ।
વહામિ હંસૈરુપશોભિતામ્બરાં
પ્રભુપ્રસાદાચ્છરદં યથા તનુમ્ ॥ ૧૭॥

પ્રભું પ્રપત્તું સ્થલમેહિ માલયં
મહીધરં માનસ વા હિમાલયમ્ ।
રસાતલે વૌપયિકાહિમાલયં
શ્રયન્તમન્વેષય યાહિ મા લયમ્ ॥ ૧૮॥

નિધાય ચક્ષુર્દહતો મનોભવં
ન કામહાનિં પ્રવિતન્વતો દૃશા ।
અનષ્ટમૂર્તેર્દધતોઽષ્ટમૂર્તિતાં
જયન્તિ શમ્ભોર્વિવિધા વિભૂતયઃ ॥ ૧૯॥

સમાશ્રિતસ્ત્વાં કરુણાપરાઽજ યઃ
ક્વચિન્ન તસ્યાસ્તિ રણે પરાજયઃ ।
પરે તમારબ્ધપરસ્પરાજયઃ
શ્રયન્તિ નાથં ધૃતચાપરાજયઃ ॥ ૨૦॥

ધ્રુવં સ કૃષ્ણસ્તમધશ્ચકાર ય-
શ્ચિરાય પક્ષદ્વયકલ્પિતસ્થિતિમ્ ।
દ્વિજાધિરાજં વિનતાર્તિહારિણં
બિભર્તિ યો મૂર્ધ્નિ સ તુ ત્વમીશ્વરઃ ॥ ૨૧॥

વિભું વિરિઞ્ચોઽપિ ન વેદ નામ યં
નતસ્ય દુઃખં ઘનવેદનામયમ્ ।
નિહન્તિ તસ્યાપિ ભવેદનામયં
શુચં ભજેન્નાપ્યનિવેદનામયમ્ ॥ ૨૨॥

સમુદ્રજાલિઙ્ગિતકણ્ઠપીઠં
સદૈવ સત્યાહિતસક્તિમચ્યુતમ્ ।
અનન્યગા યસ્ય નવોક્તિમૌક્તિકૈ-
રલઙ્કરોતિ પ્રચુરા સરસ્વતી ॥ ૨૩॥

અભીષ્ટદાયી યમધામહોદયાદ્-
ધ્વનિર્યયા શ્વેતનૃપે મહોદયા ।
ધૃતિં દિશન્તી નમતામહો દયા
ક્વ સા તવાસ્માસ્વધુના મહોદયા ॥ ૨૪॥

અયમહં પુરુષોત્તમમચ્યુતં
બલિજિતં કૃતસત્યપરિગ્રહમ્ ।
અચલિતશ્રિયમાશ્રિતનન્દકં
ધૃતસુદર્શનમીશ્વરમાશ્રયે ॥ ૨૫॥

વિતન્વતી ભક્તિમતાં સમાનતાં
બિભર્તિ યા કલ્પલતાસમાનતામ્ ।
કથં દધન્મૂર્તિમિમાં સમાન્તાં
તવ સ્તુતિં વચ્મિ શતં સમા ન તામ્ ॥ ૨૬॥

ઇહ પરશુચિતોર્જિતાકૃતિ-
દ્વિજપતિશેખરતાં બિભર્તિ યઃ ।

ત્રિજગતિ ગિરિશં સતાં હિતં
પ્રણમતરામતનું તમચ્યુતમ્ ॥ ૨૭॥

યમં યયારબ્ધમહામહાઽનયઃ ક્ષયં
દૃશા યસ્ય સ શર્મહાઽનયઃ ।
દદાસિ ચેત્તામુદિતો મહાનયઃ
ક્ષતાશ્ચ વિઘ્નાઃ કૃતકામહાનયઃ ॥ ૨૮॥

અનલસમ્ભૃતકાન્તિ દધત્સદા
રુચિરમારચિતાસ્પદમીક્ષણમ્ ।
સુમતયે વિધુરોપકૃતિપ્રિયો
ભવતુ વો ભગવાન્ ભગવાનિવ ॥ ૨૯॥

ન જાતુ તજ્જ્ઞાઃ કૃતિનોઽવહન્ત યા-
મધોગતૌ કારણમેવ હન્ત યા ।
ત્વયિ પ્રસન્ને સુમતાવહન્તયા
ન યામિ દુઃખં નરકાવહં તયા ॥ ૩૦॥

પ્રિયાં મુખે યો ધૃતપઞ્ચમસ્વરાં
ગિરં વહન્તીમમૃતસ્ય સોદરામ્ ।
વિશેષવિશ્રાન્તરુચિર્બિભર્તિ માં
વપુષ્યસૌ પુષ્યતુ વઃ શિવોઽચ્યુતઃ ॥ ૩૧॥

નુતિર્મયેયં ભજતાં હિતાય તે
કૃતાઽનયા શર્મ સતાં હિ તાયતે ।
મનસ્યપિ ગ્લાનિરપોહિતા યતે
ધૃતા યદેષા શ્રુતિસંહિતાયતે ॥ ૩૨॥

અમેયમહિમા હિમાદ્રિતનયા-
નયાત્તહૃદયો દયોર્જિતમતિઃ ।
વિભુર્ભવરુજં રુજન્નવિકલં
કલઙ્કરહિતં હિતં દિશતુ વઃ ॥ ૩૩॥

ઉદારકરુણોઽરુણોર્જિતમહા
મહાહિવલયો લયોજ્ઝિતવપુઃ ।
અઘૌઘશમનો મનોધૃતમુદા-
મુદાત્તવિભવો ભવો ભવતુ વઃ ॥ ૩૪॥

એકઃ પાદોદકમધિશિરઃ શ્લાઘ્યમન્યસ્ય ધત્તે
ચક્રે પૂજાં નયનકમલેનાઽપરસ્ય દ્વિતીયઃ ।
ઇત્યન્યોન્યં પ્રકૃતિમહતામન્તરજ્ઞૌ ગુણાનાં
હર્ષોત્કર્ષં કમપિ કુરુતાં કામકંસદ્વિષૌ વઃ ॥ ૩૫॥

યસ્મિન્નદ્રિસમુદ્રજાવહનયોરુત્સૃજ્ય નૈસર્ગિકં
વૈરં કેસરિકુઞ્જરપ્રવરયોઃ સૌહાર્દહૃદ્યા સ્થિતિઃ ।
યસ્મિન્નપ્યહિરાજપન્નગભુજૌ નિર્વ્યાજમૈત્રીયુજૌ
નિષ્પ્રત્યૂહમસૌ મહાપુરુષયોઃ સન્ધિર્નિબધ્નાતુ વઃ ॥ ૩૬॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“એકાન્તરયમકસ્તોત્રં” નામૈકોનત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૦. મહાયમકસ્તોત્રં ત્રિંશં સ્તોત્રમ્

શારદીમિવ નદીં પ્રસાદિની-
મુચ્ચકૈરવસરોજરાજિતામ્ ।
સ્તોતુમેષ મમ મૂર્તિમૈશ્વરી-
મુચ્ચકૈરવસરોઽજરાજિતામ્ ॥ ૧॥

રોહિણીરમણખણ્ડમણ્ડનં
નન્દિનન્દિનમનં દિનં દિનમ્ ।
નૌમિ બિભ્રતમુપોઢકાલિકા-
સઙ્ગમં ગલમસઙ્ગમઙ્ગલમ્ ॥ ૨॥

નૌમિ ભક્તજનકણ્ઠનિઃસર-
ન્નાદરઞ્જિતમકાલકામદમ્ ।
કાલકામદમનાદરં જિત-
ક્લેશમીશમમૃતાંશુશેખરમ્ ॥ ૩॥

ભ્રામ્યતુ દ્રવિણતૃષ્ણયા ભૃશં
માનસં સદિનમાનસંસદિ ।
ત્વત્સ્તવામૃતમૃતે તુ દુસ્તરે
બન્ધુરધ્વનિ ન બન્ધુરધ્વનિ ॥ ૪॥

સાધુ નાથ નુતિરીપ્સયા મયા
યા મયાર્ચિત કૃતાત્ર સાધુના ।
સા ધુનાતુ વિપદં ભવામયા-
યામયાપનલસદ્રસાઽધુના ॥ ૫॥

ન મેઽભિભૂતસ્ય પિતા ન માતા
ન વા સનાભિર્ધનવાસનાભિઃ ।
અરિસ્તુ રુન્ધે સુહૃદા વિયુક્તં
સમાધિના માનસમાધિનામા ॥ ૬॥

દર્પકાન્તક વિરાજમાનયા-
ઽદર્પકાન્તકવિરાજમાનયા ।
ત્વત્પ્રસાદવિધિલબ્ધયા ધિયા
સાધવો દધતિ વૈબુધીં ધુરમ્ ॥ ૭॥

યેન શીતકરખણ્ડશેખર
ત્વત્પ્રસાદવશતઃ કરોત્કરઃ ।
કોઽપિ તામરસભાસનોઽર્જિતઃ
કોપિતાઽમરસભાસનોર્જિત ॥ ૮॥

રવિરલઙ્કુરુતે નવરઞ્જનં
સ કિલ યત્તવ દક્ષિણમીક્ષણમ્ ।
ઇમમપાસ્ય તમઃ સહજં શનૈ-
રવિરલં કુરુ તેન વરં જનમ્ ॥ ૯॥

મહતામતામસમહાવપુષં
તવ ભક્તિમર્થિતવતાં ભગવન્ ।
મહતામતામસમહાવપુષં
પ્રથયન્તિ કીર્તિમિહ સિદ્ધગણાઃ ॥ ૧૦॥

અધ્યાસ્યતે શમજુષા ભવતઃ પ્રસાદા-
દામોદરાજિતરુચારુ ચિરં જનેન ।
દામોદરાજિતરુચા રુચિરઞ્જનેન
કીર્ણં તૃણેન મૃદુના વનમાર્તવેન ॥ ૧૧॥

તવ સવહરિણં ઘ્નતી મહર્ષિં

યમકૃત ચાપલતા નવાસમાધિમ્ ।
પુનરપિ દૃગલમ્ભયત્તવૈનં
યમકૃતચાપલતાનવા સમાધિમ્ ॥ ૧૨॥

સભાજનેઽનલ્પરતેર્નૃપસ્ય
ત્વદ્ભક્તિભાજઃ પ્રસભાજનેન ।
સભાજનેન પ્રગુણેન પૂર્ણા
વિભાતિ નિઃશ્રેયસભાજનેન ॥ ૧૩॥

અનન્તરાઽયન્ત્રિતવાગ્ભવસ્ત્વાં
ગૃણાતિ યો નિત્યમનન્તરાયમ્ ।
અનન્તરાયં સ્વયમેત્ય લક્ષ્મી-
ર્નિષેવતે તં સમનન્તરાયમ્ ॥ ૧૪॥

સહો મયાધૈરપિ યસ્ય દુર્ધરં
યમઃ સ ધર્તું હૃદિ દુઃસહો મયા ।
સહોમયાઽભ્યેત્ય ભજ પ્રસન્નયા
દૃશા કૃતાનઙ્ગભુજાંસહોમયા ॥ ૧૫॥

કલે વરં દાતુમુદીરિતેઽસ્તિ યા
સુધા સુવાક્યે તવ નિષ્કલે વરમ્ ।
કલેવ રઙ્ક્વઙ્કુતનોરસૌ કદા
મમેદમાપ્યાયયતે કલેવરમ્ ॥ ૧૬॥

સદાનવારિદ્વિરદા વરૂથિની
હરેરિવ ધ્વસ્તસહિંસદાનવા ।
સદા નવારાદ્ધશિવા શિવાશ્રયે
ન કસ્ય ગીર્ભક્તિવિકાસદા નવા ॥ ૧૭॥

ધનૈરહન્તાકૃતલઙ્ઘનૈરહં
મહારિભિર્નિર્મલશર્મહારિભિઃ ।
નિરાકૃતૌજા ધૃતહાનિરાકૃતૌ
ન તેઽવલેપાવસરો નતેઽબલે ॥ ૧૮॥

મનસ્યદોષેઽપ્યતિદૌર્મનસ્યદો
મહારયઃ પન્નગભીમહાર યઃ ।
તમન્તકમ્પૈકનિમિત્તમન્તકં

નયાશુ ભઙ્ગં હતદુર્નયાશુભમ્ ॥ ૧૯॥

ન વારબાણા ન હયા નવારવા
ન દન્તિનઃ સદ્મનિ વા નદન્તિ નઃ ।
ક્ષતાપદાજ્ઞા તુ વિપક્ષતાપદા
જિતો ભવઃ સાધુ હિ પૂજિતો ભવઃ ॥ ૨૦॥

જલાશયા યાન્તિ મૃગા જલાશયા
મરાવલઙ્ઘ્યે ધ્નતિ પામરા બલમ્ ।
પરં હસન્તો જિતકોપરંહસં
જના ભવેઽપ્યુજ્ઝિતપૂજના ભવે ॥ ૨૧॥

અમન્દરાગાશ્રિતમન્દરાગા-
સ્તે દેવજાતાવિહ દેવ જાતાઃ ।
યે સિદ્ધસાધ્યાર્ચિત સિદ્ધસાધ્યા
રતા નવં તેનુરતાનવં તે ॥ ૨૨॥

સદય મોદય મોદયમોક્ષદં
કૃશમદઃ શમદઃ શમદઃ કુરુ ।
ન હિ તતા હિતતાઽઽહિતતાયનૈઃ
કૃતનુતે તનુ તે તનુતે શુભમ્ ॥ ૨૩॥

રસમયે સમયેઽસમયેહયા
ધનમહીનમહીનમહીષ્વપિ ।
કૃતમુદાત્તમુદાત્તમુદાહૃતં
તદિદમાપદમાપ દમાપહમ્ ॥ ૨૪॥

મદનવાદનવાદનવાસના-
યતનયાતનયા તનયાઽમ્બુધેઃ ।
અકૃત વૈ કૃતવૈકૃતવૈશસા
સકમલા કમલા કમલાધવમ્ ॥ ૨૫॥

કમલયાઽમલયા મલયાદ્રિવ-
ત્ત્રસદયાસદયા સદયાપ્યયા ।
પ્રવરધીવર ધીવર ધીરયા
કલયમાઽલયમાલયમાપદામ્ ॥ ૨૬॥

વિતરણાભરણા ભરણાભય-
ક્ષમમના મમ નામ મનાગપિ ।
શુભવને ભવને ભવ નેપ્સિત-
પ્રદ રમાઽદરમાદરમાદધે ॥ ૨૭॥

અનયતો નયતો ન યતો ધૃતિ-
પ્રદ યમાદયમાદયમાશ્રિતઃ ।
ત્રસતિ શંસતિ શંસતિ શં ચ યો
ધૃતમુદં તમુદન્તમુદઞ્ચય ॥ ૨૮॥

શુભવતા ભવતા ભવતારિણા
શકલિતાઽકલિતા કલિતાપભૂઃ ।
હર કૃતાન્તકૃતાન્તકૃતાન્ત નો
કિમમતા મમતા મમ તાદૃશી ॥ ૨૯॥

વિશદશોભયશોભય શોભય
ત્રિજગદક્ષમદક્ષમદક્ષમ ।
સ્વપદમાનય માનય મા નય-
ક્ષતસમક્ષયમક્ષયમક્ષય ॥ ૩૦॥

ઘનાઽઘનાશનૈઃ શનૈર્નવૈર્નવૈરિહાઽરિહા ।
ભવાન્ભવાઽન્વહં વહન્નહીનહીનદાનદાઃ ॥ ૩૧॥

દયોદયોર્જિતોઽર્જિતો મયોમયોચિતશ્રિતઃ ।
યતેય તે હિતેહિતે રવૈરવૈરધીરધીઃ ॥ ૩૨॥

તવાત્તબાધને ધને ગદં ગદન્તિ કેઽન્તિકે ।
મયાઽઽમયાવિના વિના વિભો વિભોજના જનાઃ ॥ ૩૩॥

સ્તવાસ્તવાઽઽહિતા હિતા ન કેન કેવલં બલમ્ ।
શુભાઽઽશુ ભારતી રતીશનાશનાઽઽપદાપદા ॥ ૩૪॥

નતાનતાનવાનવારિતારિતાપદં પદમ્ ।
હરાહરામિ તેઽમિતે શમે શમેવમેવ મે ॥ ૩૫॥

પરાઽપરાધબાન્ધવાઃ સવાસવાઃ સુરાસુરાઃ ।
સદા સદાનમાનમાશ્રયં શ્રયન્તિ યન્તિ યમ્ ॥ ૩૬॥

સ મા સમાહિતં હિતં બતાઽવતાદમન્દમમ્ ।

કલઙ્કુલઙ્ઘને ઘને હ્યબાહ્યવાસનઃ સ નઃ ॥ ૩૭॥

અલં ઘના અલઙ્ઘનાસ્તપસ્યતસ્તપસ્યતઃ ।
તનુર્હિ મેઽતનુર્હિમેઽઙ્ગતાનવં ગતા નવમ્ ॥ ૩૮॥

મલમલક્ષવલક્ષબલસ્મર-
સ્મરણકારણકાર કદઙ્કુદમ્ ।
હર હરસ્વ ભજસ્વ ભજન્ દિશં
દિશ વિભાસવિભાસદૃશં દૃશમ્ ॥ ૩૯॥

ભવસમ્ભવસંહતમોહતમો-
દમનેદમનેકમશઙ્કુમશમ્ ।
સવિકાસવિકારચિત્તં રચિતં
હર મે હર મેદુરિતં દુરિતમ્ ॥ ૪૦॥

કૃપણં ભગવન્ બહુશોઽભિહિતં
બહુશોભિ હિતં દિશ મે વચનમ્ ।
દિશમેવ ચ નન્દિતમાનસ તાં
દિતમાન સતાં ન પતામિ યતઃ ॥ ૪૧॥

મન્યામહે ગતિમૃતે ત્વયિ ભક્તિમન્યા-
મન્યાયગાં તવ દૃશૈવ તમઃશમન્યા ।
મન્યાભિધાભૃતિ નતિં સહતે ધમન્યા-
મન્યાભિધેષુ નહિ ધીરભિમાનિમન્યા ॥ ૪૨॥

માઽનારતં નિજપરૈરુપભુજ્યમાના
માનાતિવૃત્તવિભવાઽન્વહમેધમાના ।
મા નાથ ભૂદ્ભવતુ ધીરભિનન્દ્યમાના
માનાઽલસૈઃ સુહૃદરાતિષુ મે સમાના ॥ ૪૩॥

દોષારયસ્તરલયન્તિ મહામદોષા
દોષા ધૃતિં હરતિ મોહમયપ્રદોષા ।
દોષાકરાઙ્કવપુરેષ્યતિ માં કદોષા
દોષાત્તકણ્ઠમનિરુદ્ધમિવોન્મદોષા ॥ ૪૪॥

કા રામણીયકકૃતેન્દુકરાનુકારા-
કારા વિના તવ કૃપાં પ્રથિતોપકારા ।

કારાગૃહેઽત્ર ભવનામનિ મોચિકા રા-
કારાજખણ્ડશિખર ક્ષપિતાન્ધકારા ॥ ૪૫॥

કાશાન્તચિત્તધૃતમુક્તિપથાઽવકાશા-
કાશાન્તવર્તિરવિવત્ પ્રચુરપ્રકાશા ।
કાશાવકીર્ણખિલતુલ્યકૃતાન્તકાશા
કા શામ્ભવીં દૃશમૃતે ભૃતસેવકાશા ॥ ૪૬॥

કાં તાપતાન્તિમુપયાન્તિ શુચૌ ન કાન્તાઃ
કાન્તાવલમ્બિતકરાઃ સ્ખલિતાંશુકાન્તાઃ ।
કાન્તા હઠાદ્વનચરૈર્મૃદિતાલકાન્તાઃ
કાન્તારગાસ્ત્વદનુરક્તનૃપારિકાન્તાઃ ॥ ૪૭॥

માયાઽર્કરશ્મિપટલીં મરુક્ષમાયા-
માયાસમર્પયતિ મે દુરિતક્રમા યા ।
માયાઃ પદં તવ કૃપાઽત્ર મહાતમાયા-
માયાત્યુષેવ હિ કદા કલિતોત્તમાઽયાઃ ॥ ૪૮॥

રામાદિસેવ્યભવભક્તિભૃતોઽભિરામા-
રામાશ્રિતૌષધિરિવ ક્ષતદુસ્તરામા ।
રામા સતીવ કૃતસાધુવિપદ્વિરામા
રા માન્યમુજ્ઝતિ ન સદ્મ ન ચાઽસ્થિરા મા ॥ ૪૯॥

વારાન્નિધેરિવ સુધા તવ દુર્નિવારા
વારાણસીવ દૃગઘક્ષયકૃદ્ધ્રુવારા ।
વારાઙ્ગનેવ પૃતનેવ ચ સાશ્વવારા
વારાનુવારમુદયત્યુરુકૂર્ચવારા ॥ ૫૦॥

ભદ્રાભિધે ગજ ઇવેશમકૢપ્તભદ્રા
ભદ્રાસનેઽર્ચિતવતઃ કૃતભાલભદ્રા ।
ભદ્રા સિતા તિથિરિવેપ્સિતદા વિભદ્રા
ભદ્રા તનુર્ગુણવિડમ્બિતરામભદ્રા ॥ ૫૧॥

નાઽગાધમાપ તવ હૃન્મમ ધીરનાગા
નાગાલયં સુરપુરીવ સકાઞ્ચનાગા ।
નાઽગાત્ પરત્ર ચ સૃજન્ત્યકદર્થના ગા
નાગાશ્રિતેન્દ્રદિગિવોન્નતનન્દનાગા ॥ ૫૨॥

સારાસહાઽપિ મમ ધીસ્ત્વયિ મન્દસારા
સારાધના વિહિતમોહતમોઽભિસારા ।
સારાવકોકિલવચઃસમસૂક્તિસારા
સારાવલીવ ગુરુતાપકૃતાપસારા ॥ ૫૩ ॥

સામાત્યભૂપસદસીક્ષિતસૂક્તિસામા
સામાજિકાહિતનુતિઃ કૃતસેર્ષ્યસામા ।
સામાન્યવર્ત્મ ન યયાશ્રયમોજસા મા
સા માન્યતા ત્વયિ વિભો મુચદઞ્જસા મા ॥ ૫૪ ॥

ધારા ગિરેરિવ તરીવ સકર્ણધારા-
ધારાઽર્પણી તવ દૃગૂષરવર્ષધારા ।
ધારાપુરીવ સુખદા દુરિતાસિધારા
ધારા પરાર્તિહરણે હતષડ્વિધારા ॥ ૫૫ ॥

કાલાયસોપમરુચિર્ગલભૂઃ સુકાલા
કાલાગ્નિવદ્દૃગપિ તે ક્ષણદગ્ધકાલા ।
કાલા યથોક્તિરમૃદુઃ ક્ષતસેવકાલા
કા લાભકૃન્મમ વિનાઽઽભિરનન્તકાલા ॥ ૫૬ ॥

મુક્તાર્પિતસ્વપદપૂર્ણકૃપાઽવિમુક્તા
મુક્તાર્ચનાદિરતિનાઽઽર્કિભયાદ્વિમુક્તા ।
મુક્તાવલીવ વિમલા ત્વયિ ગીરમુક્તા
મુક્તાન્યમાર્ગગમનેન મયેયમુક્તા ॥ ૫૭ ॥

કલ્પાહ્વવલ્લિરિવ ધૌતવિપદ્વિકલ્પા
કલ્પાઞ્ચિતા કૃતનુતિર્ભવતીન્દુકલ્પા ।
કલ્પાખ્યસૂત્રવિદુરાગમદૃષ્ટકલ્પાઽઽ-
કલ્પાક્ષયાઽસ્તુ મમ ગીરમૃતાનુકલ્પા ॥ ૫૮ ॥

સહસાઽર્ક ઇવાઽસ્મિ કૃતઃ સહસા-
ઽસહસારભૃદાત્મભુવા સહસા ।
સ હ સાયકમસ્યતિ યા સહસા
સહસાધ્વસમેત્યપિ દુઃસહસા ॥ ૫૯ ॥

જનયાઽશુચમાર્તમભાજનયા-

જનયાચનરઞ્જનવેજનયા ।
જનયામલખિન્નમખઞ્જનયા-
ઽજનયાઽમૃતમાત્મનિયોજનયા ॥ ૬૦॥

શમનાય શુચાં ત્વમુમેશ મનાક્
શમનાર્તિકરઃ કૃતભીશમ ના ।
શમનામય દેહિ વિપાશમના-
શમનાથજનપ્રથિતાશમનાઃ ॥ ૬૧॥

મધુનાશિનાઽર્ચિત સમં મધુના
મધુનામપુષ્પજનુષા મધુના ।
મધુનાઽલસામિવ વધૂમધુના-
મધુનાપ્લુતાં ત્વયિ ગિરં મધુના ॥ ૬૨॥

વસુ ધાન્યમુજ્ઝિતુમપીવસુ ધા-
વ સુધાસિતચ્છવિયશોવસુધા ।
વસુધાતૃવન્દ્ય યદસાવસુધા
વસુધામ દૃક્તવ નવેવ સુધા ॥ ૬૩॥

સમયાસિષુઃ ક્વ ન વિકાસમયાઃ
સમયાપતિં જગતિ યં સમયા ।
સમયા ભવન્તિ ચ વિલાસમયાઃ
સ મયા ગિરાઽર્ચ્યત સુધાસમયા ॥ ૬૪॥

કલિકાલતામ્યદમૃતોત્કલિકા
કલિકાતરે હૃદિ નવોત્કલિકા ।
કલિકા સ્રજીવ જિતશાકલિકા-
ઽકલિ કાન્તિભૃચ્ચ મુકુટે કલિકા ॥ ૬૫॥

કલયાઽઽશ્રિતં વિરુજમેકલયા
કલયા વિધોર્દલિતપાકલયા ।
કલયા ગિરા ચ સકલાઽકલ યા
કલયા વિના વિહિતશોકલયા ॥ ૬૬॥

પરમારકાઽન્તકકૃતોપરમા-
ઽપરમાનતં તવ દૃશાઽઽપ રમા ।
પરમાર્થસદ્ગુણપરમ્પર મા

પરમાર્ત્તમુજ્ઝ કરુણાપર મા ॥ ૬૭॥

કલકલકલકલકણ્ઠવદસ્મા-
નવ નવનવનવરોચિતવાચઃ ।
ભવ ભવ ભવભવભીતિભિદસ્ય-
ન્મદમદમદમદનાઽન્તક દૂરમ્ ॥ ૬૮॥

અવિકલકલ કલકલકલકણ્ઠં
દિશ નવનવનવનવન વરવચઃ ।
સવિભવ ભવ ભવ ભવભવભયભિ-
દ્દુર મદમદમદમદમદયમિમમ્ ॥ ૬૯॥

દેવ્યાં ભ્રમદ્ભ્રુવિ જયાવિજયાર્ચિતાયાં
સક્તા તવાઽસ્તવિજયા વિજયાય દૃષ્ટિઃ ।
વૃષ્ટ્યેવ ભૂર્દિવિજયા વિજયાખ્યયા તે
મૂર્ત્યા ત્રસદ્રવિજયાઽઽવિ જયાહ્વયા ચ ॥ ૭૦॥

હરમુપેત રસાદમલં ઘનં
દમલઙ્ઘનં તનુત મા કૃતિનઃ ।
તનુતમાકૃતિ નઃ શ્રયતાઽઽદૃતં
શ્રયતાદૃતં ભવત ઇત્યુદિતમ્ ॥ ૭૧॥

શમિતસઙ્ગમસજ્જનતાપદં
શમિતસઙ્ગમસજ્જનતાપદમ્ ।
નમતકામમહીનવિભાસિતં
નમત કામમહીનવિભાસિતમ્ ॥ ૭૨॥

કલિતમોહનમારવરાજિતં
સ્મર હરં શિખિચન્દ્રકલાઞ્છિતમ્ ।
કલિતમોહનમારવરાજિતં
સ્મરહરં શિખિચન્દ્રકલાઞ્છિતમ્ ॥ ૭૩॥

અસૌ હૃદન્તર્હિતમોહરોધને
સદા યતે રક્ષ યશો ભિયો જય ।
અસૌહૃદં તર્હિ તમોહરો ધને
સદાયતેરક્ષયશોભિ યોજય ॥ ૭૪॥

સકલશં સકપાલમલઙ્કૃત-
પ્રમદમસ્થિરસં મદનાશનમ્ ।
ભવમદભ્રમહાનિધને હિતં
શમનમજ્જનમાનમતાડલયમ્ ॥ ૭૫॥

સકલશંસકપાલમલં કૃત-
પ્રમદમસ્થિરસમ્મદનાશનમ્ ।
ભવમદભ્રમહાનિધનેહિતં
શમનમજ્જનમાનમતાલયમ્ ॥ ૭૬॥

તનુશઙ્કરવૈરસમાડયતયા-
ઽતનુ શઙ્કર વૈ રસ માડયતયા ।
તનુ શં કરવૈ રસમાયતયા-
ઽતનુશં કર વૈરસમાયતયા ॥ ૭૭॥

પ્રકાશકલિતાપદં શકલિતાપદં શંસતા-
મસારસમયે હિતં રસમયેહિતં શઙ્કરમ્ ।
હૃદિ સ્મરત રઙ્ગિતં સ્મરતરઙ્ગિતં શાન્તતાં
નયન્તમસમાનસન્તમસમાનસં ચાન્તકમ્ ॥ ૭૮॥

ઇયં વિચિત્રતાવિરાજિતા મયા મનોહરા
જિતામયા મનો હરાઽઽહિતા નુતિર્ધિનોતુ તે ।
ત્વયિ પ્રસન્નમાનસેઽસમસ્તમોહરાશયે
સમસ્તમોહરાશયે કરોમિ ન સ્પૃહાં પુનઃ ॥ ૭૯॥

કાન્તા કાન્તારમધ્યે સરિદિવ સકુલક્ષ્માધરાયાં ધરાયાં
યાતા યા તારતમ્યં ક્વ ન વિમલમતિપ્રેક્ષણેન ક્ષણેન ।
સાભાસા ભારતીયં તનુરિવ તરણેરન્ધકારેઽન્ધકારેઃ
સ્તુત્યા સ્તુત્યા બુધાનાં મદયતુ હૃદયં ગ્લાનિતાન્તં નિતાન્તમ્ ॥ ૮૦॥

વર્ષાવર્ષાયમાણા સહૃદયશિખિનાં સંહિતાનાં હિતાનાં
દાત્રી દાત્રી તૃણાનામિવ લવનપટુર્દુષ્કૃતાનાં કૃતાનામ્ ।
કલ્યા કલ્યાણદાને નુતિરિયમશુભં તર્જયન્તી જયન્તી
વિશ્વં વિશ્વમ્ભરાન્તં પ્રસરતુ સુરભીનન્દનસ્યન્દનસ્ય ॥ ૮૧॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ

“મહાયમકસ્તોત્રં” નામકં ત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૧. નતોપદેશસ્તોત્રં એકત્રિંશં સ્તોત્રમ્

મનઃ સમાધૌ પરમાન્તરઙ્ગં
વિધાય નિઃસ્પન્દમનુત્તરઙ્ગમ્ ।
બુધા વિધાતું ભવભીતિભઙ્ગં
વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૧॥

પાશ્ચાવશેનેવ મહાવિહઙ્ગં
વલ્ગાબલેનેવ મહાતુરઙ્ગમ્ ।
નિરુધ્ય યોગેન મનઃપ્લવઙ્ગં
વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૨॥

મન્ત્રૌષધાદિક્રિયયા ભુજઙ્ગં
યથા યથા વાગુરયા કુરઙ્ગમ્ ।
મનસ્તથાऽऽયમ્ય ધિયાऽસ્તસઙ્ગં
વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૩॥

ભિત્ત્વાऽલિકં સભ્રુકુટીવિભઙ્ગં
યસ્યાऽગ્નિરુદ્યન્નભસાદનઙ્ગમ્ ।
દદાહ તં મોહતમઃપતઙ્ગં
વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૪॥

વહન્તમુદ્દામભુજઙ્ગમઙ્ગં
જટાભરં નિર્ભરનાકગઙ્ગમ્ ।
વિલોચનં ચાગ્નિશિખાપિશઙ્ગં
વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૫॥

ભવબન્ધબદ્ધવિધુરોદ્ધરણં
ફણિમણ્ડલજ્વલદલઙ્કરણમ્ ।
વ્રજત ક્ષમાધરદરીશરણં
શરણં તુષારકિરણાભરણમ્ ॥ ૬॥

કૃતઘસ્મરસ્મરનિરાકરણં
કટુકાલકૂટકવલીકરણમ્ ।

વ્રજત પ્રપન્નજનતાશરણં
શરણં તુષારકિરણાભરણમ્ ॥ ૭॥

મરુમેદિનીરચિતસઞ્ચરણં
ત્રિદશેન્દ્રશેખરસરચ્ચરણમ્ ।
વ્રજત ત્રિદુઃખહરણસ્મરણં
શરણં તુષારકિરણાભરણમ્ ॥ ૮॥

પ્રણતં જનં જિતજરામરણં
રચયન્તમાપ્તભવનિસ્તરણમ્ ।
વ્રજતાऽऽહિતત્રિપુરસંહરણં
શરણં તુષારકિરણાભરણમ્ ॥ ૯॥

અવધૂતમોહતિમિરાવરણં
કરિકૃત્તિકલ્પિતપરાવરણમ્ ।
વ્રજત પ્રકલ્પિતપુરેશરણં
શરણં તુષારકિરણાભરણમ્ ॥ ૧૦॥

તરુણતમાલમલીમસનાલં
જ્વલનશિખાપટલોજ્જ્વલભાલમ્ ।
શિરસિ લસત્પરમેષ્ઠિકપાલં
શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૧॥

નરમુખકલ્પિતશેખરમાલં
નતજનજમ્ભિતમોહતમાલમ્ ।
નયનશિખાશતશાતિતકાલં
શ્રયત વિભું હતકિલ્વિષજાલમ્ ॥ ૧૨॥

વિષમવિષાગ્નિશિખાવિકરાલં
ફણિપતિહારમતીવવિશાલમ્ ।
ગલભુવિ બિભ્રતમુગ્રસિરાલં
શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૩॥

વિદલયિતું યમૃતે ભવતાલં
ત્રિભુવનસીમનિ કશ્ચન નાऽલમ્ ।
તમમલમાનસવાસમરાલં
શ્રયત વિભું હતકિલ્બિષજાલમ્ ॥ ૧૪॥

કમલપરાગપિશઙ્ગજટાલં
જલધિસમર્પણતર્પિતબાલમ્ ।
ભવભટભઙ્ગમહાકરવાલં
શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૫॥

અતિઘસ્મરભસ્મરજોધવલં
નતલોકસમર્પિતબોધબલમ્ ।
ધ્વજધામવિરાજિમહાધવલં
ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૬॥

પ્રભયા પરિભૂતદલદ્ધવલં
ગલમઙ્ગદરત્નશિખાશબલમ્ ।
દધતં વિષકૢપ્તમહાકવલં
ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૭॥

શિખરં દ્યુનદીલહરીતરલં
ગલમૂલમુપોઢમહાગરલમ્ ।
દધતં હૃદયં ચ સુધાસરલં
ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૮॥

અપનીતકુકર્મકલઙ્કમલં
નતલોકવિતીર્ણમહાકમલમ્ ।
દદતં શુભસિદ્ધિવિપાકમલં
ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૯॥

દદતં વચનં ઘનહાસકલં
નમતાં દલયન્તમઘં સકલમ્ ।
ભજતાં ચ દિશન્તમભીષ્ટફલં
ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૨૦॥

અવિરતનતિપરસુરવરશિખર-
પ્રણિહિતમણિગણમસૃણિતચરણમ્ ।
સિતકરકરભરધવલિતમુકુટં
પ્રણમત પુરહરમશરણશરણમ્ ॥ ૨૧॥

ભવભવપરિભવધુતવિધુરધિયા-

મધિગતશમદમનિયમિતમનસામ્ ।
અભિમતવિતરણપરિણતકરુણં
પ્રણમત પુરહરમશરણશરણમ્ ॥ ૨૨॥

તનુતૃણગણનિભમનસિજશમન-
પ્રશમનપરિચિતહુતવહમહિતમ્ ।
પરહિતકૃતમતિમતિમૃદુહૃદયં
પ્રણમત પુરહરમશરણશરણમ્ ॥ ૨૩॥

દિનકરહિમકરહુતવહનયનં
પદકરકચભરધૃતસિતકિરણમ્ ।
વિઘટિતનતજનઘનતમતમસં
પ્રણમત પુરહરમશરણશરણમ્ ॥ ૨૪॥

અવિરલજલભરસુરસરિદુદય-
ત્સરસિજભરનિભધૃતનરશિરસમ્ ।
ભવદવહુતવહવિદલનજલદં
પ્રણમત પુરહરમશરણશરણમ્ ॥ ૨૫॥

જહત કલ્પિતકલુષલોચનતિમિરભઞ્જનમઞ્જનં
ત્યજત દુઃસ્થિતહૃદયનન્દનમલયચન્દનરઞ્જનમ્ ।
ભજત નિર્જિતવિષમવૈભવભવમહાર્ણવમજ્જનં
ક્ષિતિધરાધિપ દુહિતૃવલ્લભચરણપઙ્કજપૂજનમ્ ॥ ૨૬॥

(ક્ષિતિધરાપતિપુત્રિકાપતિપાદપઙ્કજપૂજનમ્)॥ ૨૬॥

સકલકલિમલપટલપન્નગનિગડખણ્ડનપણ્ડિતં
વિશદશશધરશકલશોભિતમુકુટમણ્ડનમણ્ડિતમ્ ।
હૃદયમીહિતુમભયમુન્મદમદનદુર્નૃપદણ્ડિતં
ભજતદુસ્તરદુરિતવારિધિતર(વર)તરણ્ડમખણ્ડિતમ્ ॥ ૨૭॥

જિતસુધાકરગિરિસુતાકરસરસિજાદરલાલિતં
નતપુરન્દરરુચિરશેખરકુસુમકેસરરઞ્જિતમ્ ।
દ્રુહિણમાધવકુમુદબાન્ધવકમલિનીધવસેવિતં
વિતર મૂર્ધનિ ચરણપઙ્કજમમૃતશીકરશીતલમ્ ॥ ૨૮॥

અવટમજ્જનજનિતતર્જનવૃજિનભઞ્જનસાધનં

કૃતનમજ્જનહૃદયરઞ્જનચિરનિરઞ્જનપૂજનમ્ ।
ત્રિપુરમારણદુરિતદારણદરનિવારણકારણં
વિતર મૂર્ધનિ ચરણપઙ્કજમમૃતશીકરશીતલમ્ ॥ ૨૯॥

ઇદમકૃત્રિમરસમસમ્ભૃતબહુવિધૌષધસાધનં
સ્તુતિરસાયનમયમુપાયનમનુગૃહાણ ગૃહાણ મે ।
વરમુદાહર વરમુદા હર પરમદાહરુજાહરં
વિતર મૂર્ધનિ ચરણપઙ્કજમમૃતશીકરશીતલમ્ ॥ ૩૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"નતોપદેશસ્તોત્ર" નામૈકત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૨. શરણાગતોદ્ધરણં દ્વાત્રિંશં સ્તોત્રમ્

ભવમરુભ્રમવિષમસમ્ભ્રમસમુદિતક્લમવિક્લવં
કુલિશકર્કશહૃદયદુર્જનકૃતપરાભવવિપ્લવમ્ ।
અતિભયઙ્કરરવિજકિઙ્કરવિકૃતહુઙ્કૃતિકાતરં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૧॥

કૃતનિકેતનમકરકેતનદલિતચેતનવેતનં
લલિતલોચનવરવધૂજનવચનતર્જનભાજનમ્ ।
ગુણલવોદ્ધતગુરુમદજ્વરજનિતતીવ્રરુજાતુરં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૨॥

પ્રમુખપેશલવિષમવૈશસવિષયપાશવશીકૃતં
પ્રકૃતિદુર્ગ્રહગુરુપરિગ્રહનિબિડપીડિતવિગ્રહમ્ ।
જ્વલદનર્ગલભવદવાનલકવલિતાકુલચેતસં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૩॥

પવનવેલ્લિતકમલિનીદલતલચલજ્જલચઞ્ચલં
વિભવયૌવનસુતસુખાદિકમિતિવિવેકવિસંસ્થુલમ્ ।
બલવદિન્દ્રિયકપટતસ્કરહઠવિલુણ્ઠનવિહ્વલં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૪॥

સમદનન્દનમદનમર્દન દુરિતતર્દનલોલુભં

ભુવનભાવન પરમપાવન સુદૃઢભાવનમાનતમ્ ।
શશિકલાઞ્છિતમુકુટલાઞ્છિત વિફલવાઞ્છિતમાકુલં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૫॥

જગદનુગ્રહમહિતવિગ્રહ કૃતપરિગ્રહસદ્ગ્રહં
ત્રિપુરશાસન શબલવાસનમસદુપાસનલાલસમ્ ।
ઘનચમત્કૃતિકૃતનમસ્કૃતિમુચિતસત્કૃતિસસ્પૃહં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૬॥

વરદ નન્દય વિપદમર્દય કિમિતિ નિર્દયતેદૃશી
કૃતનિવેદનમતુલવેદનમુદિતખેદનવાપદમ્ ।
દિશ યશોધન હૃદયશોધનવિમલબોધનદીં દૃશં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૭॥

અભયમર્પય કપટમલ્પય શિરસિ કલ્પય મે પદં
મુખમુદઞ્ચય વચનમઞ્ચય વરદ વઞ્ચય મા નતમ્ ।
ભૃશમવિશ્રમકૃતપરિશ્રમશતમતિશ્રમનિઃસહં
ચતુરમુદ્ધર હર જગદ્ધરમશરણં શરણાગતમ્ ॥ ૮॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“શરણાગતોદ્ધરણં” નામકં દ્વાત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૩. કર્ણપૂરસ્તોત્રં ત્રયસ્ત્રિંશં સ્તોત્રમ્

કાઞ્ચીકાઞ્ચનકિઙ્કિણીકલકલઃ શિઞ્જાનમઞ્જીરજો
ઝાઙ્કારઃ સકલાઙ્ગભૂષણમણિશ્રેણીઝણાડમ્બરઃ ।
વાગ્દેવ્યાઃ પ્રચલસ્ખ (પ્રચલોચ્છલત્)લદ્ભુજલતાક્ષેપક્વણત્કઙ્કણ-
ક્વાણશ્ચઙ્કમણક્રમે વિજયતે ચન્દ્રાર્ધમૌલેઃ સ્તવઃ ॥ ૧॥

સ્વામિન્ વાઙ્મયદેવતા ભગવતી સ્વેચ્છાવિહારક્રિયા-
ક્રીડાકાનનમાનનં ભવ ભવદ્ભક્તસ્ય નૂનં વ્યધાત્ ।
નોચેન્નૂતનનૂતનઃ પ્રતિદિનં હૃદ્યઃ સમુદ્યન્ક્રમા-
દસ્મિન્નુજ્જ્વલવર્ણકોમલપદન્યાસઃ કથં લક્ષ્યતે ॥ ૨॥

સ્વૈરં કૈરવિણીકુટુમ્બકલિકાલઙ્કાર સારસ્વત-

સ્ફારસ્વારસિકપ્રસાદવિશદસ્વાધીનવાગ્દેવતાઃ ।
ધન્યાઃ સત્કવયસ્તવ સ્તવનિભાત્ત્વદ્ભક્તિભાજાં વિપ-
ત્તાપાઽપાકૃતયે દિશન્તિ શિશિરસ્નિગ્ધાઃ સુધાવિપ્રુષઃ ॥ ૩॥

યસ્ય ત્વન્નમનૈઃ શિરોદશશતી સૌન્દર્યસન્દર્શનૈ-
શ્ચારિત્રશ્રવણોત્સવૈશ્ચ ભવતશ્ચક્ષુઃસહસ્રદ્વયમ્ ।
સાફલ્યં રસનાસહસ્રયુગલં ત્વત્કીર્તનૈશ્ચાશ્નુતે
ત્રૈલોક્યાદ્ભુતમૂર્તયે ભગવતે શેષાય તસ્મૈ નમઃ ॥ ૪॥

રાકેન્દોરપિ માધવાદપિ સતાં સઙ્ગાદપિ સ્વામિનઃ
સમ્માનાદપિ કામિનીકુચયુગાભોગોપભોગાદપિ ।
શમ્ભો શર્વ શશાઙ્કશેખર શિવ શ્રીકણ્ઠ વિશ્વેશ્વર
ત્રાયસ્વેતિ સતાં હરન્તિ હૃદયં સાન્દ્રામૃતાર્દ્રા ગિરઃ ॥ ૫॥

શ્યામાકામુકમાધવાદિવિરસં નાસીરકસ્તૂરિકા-
કાશ્મીરાદિનિરાદરં મલયજાલેપાવલેપાવહમ્ ।
કુર્વન્તિ પ્રવિધૂતનૂતનવધૂગાઢાઙ્ગસઙ્ગસ્પૃહં
ચેતઃ કસ્ય ન શામ્ભવસ્તવસુધાસિક્તાઃ સતાં સૂક્તયઃ ॥ ૬॥

યસ્યૈતાઃ સ્તવસૂક્તયસ્તવ મુખે ખેલન્તિ હેલાજિત-
જ્વાલાજાલજટાલકાલરસનાસંરમ્ભસમ્ભાવનાઃ ।
વલ્ગન્ત્યસ્ય પુરઃ પુરન્દરપુરીકાન્તાકટાક્ષચ્છટા-
બાણશ્રેણિશરવ્યદિવ્યવપુષઃ સ્વર્વન્દિવૃન્દોક્તયઃ ॥ ૭॥

હર્ષોત્કર્ષવિવર્દ્ધિનીઃ પરિણતક્ષૌદ્રદ્રવસ્પર્ધિની-
ર્ધન્યાનાં મધુરાસ્તવ સ્તવગિરઃ કર્ણે ચિરં કુર્વતામ્ ।
માન્દ્યં વિન્દતિ નન્દનેન્દુવદનાસન્દિગ્ધમુગ્ધાધર-
પ્રોન્મીલન્મધુબિન્દુસુન્દરસુધાસન્દોહદો દોહદઃ ॥ ૮॥

સદ્વિદ્યાભ્યસનઃ સભાનિવસનઃ સૌધાસનાધ્યાસનઃ
શુદ્ધાન્નગ્રસનઃ સુધૌતવસનઃ સત્સાધ્વસધ્વંસનઃ ।
સહ્લાદોલ્લસનઃ પ્રસન્નહસનઃ સમ્પન્નસદ્વાસનઃ
સત્કાવ્યવ્યસનઃ સુધાર્દ્રરસનઃ શમ્ભોઃ કૃતોપાસનઃ ॥ ૯॥

રાકાકાન્તરુચઃ ક્ષતાખિલશુચઃ પીયૂષધારામુચઃ
સ્વાન્તક્લાન્તિહૃતશ્ચમત્કૃતિકૃતઃ સઙ્ગીતભઙ્ગીભૃતઃ ।
શમ્ભોરમ્બુદનાદવિહ્વલવલદ્બાલાઙ્ગનાલિઙ્ગન-

હ્લાદસ્વાદસુખસ્પૃહામિહ જહત્ત્યન્તર્મૃશન્તઃ સ્તુતીઃ ॥ ૧૦॥

સારાસારવિદઃ સતાં ભયભિદઃ પ્રહ્વોપતાપચ્છિદઃ
કારુણ્યાર્દ્રહૃદઃ પ્રસન્નસુહૃદઃ સ્ફારીભવત્સંવિદઃ ।
ત્રાતાશેષવિશઃ પ્રકાશિતદિશઃ કીર્ત્યા મહીનિર્વિશઃ
કર્ષન્તીશ નિશઃ પ્રસક્તસુદૃશસ્ત્વત્પાદપીઠસ્પૃશઃ ॥ ૧૧॥

દુર્ધર્ષર્દ્ધિપુષઃ સહર્ષવપુષસ્તર્ષપ્રકર્ષપ્લુષઃ
સર્વોત્કર્ષજુષઃ ક્ષણક્ષતરુષઃ કલ્યાણપૂર્ણાયુષઃ ।
ઉત્સર્પત્સહસઃ સમિદ્ધમહસઃ ક્ષિપ્તોર્જિતાનેહસ-
શ્ચિત્તાન્તપ્રહસઃ સુખાપ્તરહસસ્ત્વદ્ધ્યાનધૌતાંહસઃ ॥ ૧૨॥

કાલં બાલકુરઙ્ગકેતનકૃતોત્તંસપ્રશંસામૃત-
સ્યન્દાસ્વાદવિનોદનૈર્યદનયન્નિઃસ્પન્દમન્દં મનઃ ।
તસ્યાન્યત્ર કવિક્રમે કમલિનીકિઞ્જલ્કપાનોત્સવ-
વ્યગ્રસ્યેવ મધુવ્રતસ્ય કુસુમેઽન્યસ્મિન્કથં સ્યાદ્રતિઃ ॥ ૧૩॥

ખટ્વાઙ્ગે મુકુટે કરે શ્રવણયોઃ પ્રાયેણ યો ભૂષણં
બ્રહ્મોપેન્દ્રપુરઃસરામરશિરઃશ્રેણિં બિભર્તિ પ્રભુઃ ।
તત્પાદામ્બુજભક્તિભાવિતમતિર્ધન્યઃ શિરોભૂષણ-
ખ્યાતિં નિશ્ચિતમશ્નુતે ત્રિભુવનપ્રષ્ઠપ્રતિષ્ઠાજુષામ્ ॥ ૧૪॥

રોહન્મોહમહીરુહોરુપરશુર્દુર્વારમારજ્વર-
પ્લોષોલ્લાઘભિષગ્વિષૌઘવિષમક્લેશોગ્રશાપાવધિઃ ।
તામ્યલ્લોચનચક્રવાકમિથુનબ્રધ્નોદયશ્ચન્દ્રિકા-
પૂરશ્ચિત્તચકોરકસ્ય જયતિ શ્રીકણ્ઠપૂજાવિધિઃ ॥ ૧૫॥

અર્ચાં વીક્ષ્ય વિચિત્રચારુરચનાં ચન્દ્રાર્ધચૂડામણે-
ર્વ્યક્તિં ભક્તિચમત્કૃતિઃ કૃતધિયો યસ્યૈતિ ચિત્તે મુહુઃ ।
તસ્મિન્સસ્પૃહમર્પિતાઃ સચકિતાઃ સાચીકૃતાઃ સસ્મિતાઃ
સાકૂતાશ્ચ પતન્તિ પક્ષ્મલદૃશાં પ્રેમામૃતાર્દ્રા દૃશઃ ॥ ૧૬॥

સ્વામિન્ સૌમનસં નિબધ્ય વપુષિ સ્રગ્દામ દૃગ્દામભિ-
ર્ભસ્મીભાવિતમન્મથસ્ય ભવતો ભિન્દન્તિ ભક્તિસ્પૃશઃ ।
દોલાન્દોલનવિહ્વલેન્દુવદનાદોઃકન્દલીચન્દન-
સ્યન્દાનન્દનિમીલિતાર્ધનયનાસ્તાપવ્યથાં માન્મથીમ્ ॥ ૧૭॥

સ્વામિન્ યસ્તવ પાદપઙ્કજયુગં ભક્ત્યાઽભ્યષિઞ્ચન્મુહુઃ
પૂજાન્તેષુ નમન્નમન્દમુદિતાનન્દાશ્રુલેશોત્કરૈઃ ।
તસ્યાઙ્ઘ્રી લલિતાક્ષિપક્ષ્મપટલપ્રાન્તસ્રુતાર્ણઃકણ-
શ્રેણીભિઃ સ્નપયન્ત્યનઙ્ગવિગલન્માનાઃ કુરઙ્ગીદૃશઃ ॥ ૧૮॥

ત્વામક્ષામશુભાનુભાવવિભવં ભાલાગ્નિકીલાવલી-
સંરમ્ભાદભિયોક્તુમક્ષમતયા સાક્ષાદુપેક્ષ્ય સ્મરઃ ।
નૂનં હન્તિ નિરન્તરં ભવ ભવત્સેવૈકહેવાકિનં
કર્ણાભ્યર્ણવલત્કટાક્ષવિશિખશ્રેણીભિરેણીદૃશામ્ ॥ ૧૯॥

આદૌ ભક્તિવયસ્યયા પરિચયાન્નીતોન્મુખત્વં શનૈ-
રારૂઢા વિષમેષુવર્ત્મસુ ચિરં ભ્રાન્તાઽથ તાન્તેઃ પદમ્ ।
દૂતીકૃત્ય નવાનવદ્યવચસં દેવીં પુરો ભારતી-
મેષા ત્વામુપગન્તુમિચ્છતિ પતિં પ્રોદ્દામકામા મતિઃ ॥ ૨૦॥

ધૂમોદ્ગારગભીરઘસ્મરવપુર્નિર્ભર્ત્સિતાર્કપ્રભં
સ્ફૂર્જત્ફૂત્કૃતકર્બુરીકૃતસિતશ્રીકાન્તદેહદ્યુતિ ।
ગ્રાસીકર્ત્તુમુદગ્રવિગ્રહગલદ્વહ્નિસ્ફુલિઙ્ગં વિષં
કો જગ્રાહ કરેઽમરેશ્વરનુતસ્ત્વામન્તરેણાઽપરઃ ॥ ૨૧॥

ક્રોધોદ્ભ્રાન્તકૃતાન્તકિઙ્કરકરદ્રોણીમુખપ્રેઙ્ખિત-
વ્યાલાલિઙ્ગિતકન્ધરઃ પ્રકટયન્નાક્રન્દદીનાં ગિરમ્ ।
ચક્ષુર્દિક્ષુ વિદિક્ષુ ચ ક્ષતધૃતિર્નિક્ષિપ્ય રક્ષાક્ષમં
કાઙ્ક્ષન્કં શરણં વૃણોતિ મરણે ત્વામન્તરેણાતુરઃ ॥ ૨૨॥

વર્ષન્તી ભવદોષપોષપરુષપ્લોષપ્રમોષક્ષમં
પીયૂષં વિશદાંશુ(ઽશનાંશુ)ભિર્દશ દિશત્કાશપ્રકાશા દિશઃ ।
કર્ષન્તી વિષમં તમઃ પ્રમથિતાલોકસ્ય લોકસ્ય ગી-
શ્ચાન્દ્રી મૂર્ધ્નિ કલેવ દેવ ભવતો વક્ત્રે વિધત્તાં પદમ્ ॥ ૨૩॥

યત્પર્યાપ્તકૃપાવિપાકવિકસન્માધુર્યધુર્યં તવ
સ્વાન્તં ભીમભવોપતાપવિપદિ સ્ફીતાઽવહેલં મયિ ।
સ્વામિન્નેષ વિધિર્મમૈવ વિધુરો દૂરાધ્વખિન્નો જન-
સ્તીરાદ્રત્નનિધેર્વ્યપૈતિ વિફલઃ સ્વૈરેવ દુષ્કર્મભિઃ ॥ ૨૪॥

યત્સૌન્દર્યસમુદ્રસાન્દ્રલહરીહેલાચલચ્ચામર-
વ્યગ્રાઙ્ગાઙ્ગુલિબાલમાલવવધૂદૃક્પાતપાત્રં વપુઃ ।

સેવાસન્નિધિશંસિસમ્ભ્રમનમત્સામન્તમૌલિસ્થલી-
લીઢાઙ્ઘ્રિદ્વયમુદ્વહન્તિ કૃતિનઃ સૌભાગ્યભાગ્યાસ્પદમ્ ॥ ૨૫॥

યચ્ચ પ્રેઙ્ખદખર્વગર્વઘટિતભ્રૂભઙ્ગભીમાકૃતિ-
ક્ષ્માભૃત્પાશમુખાવલોકનઘનપ્રોલ્લઙ્ઘનાભીરુભિઃ ।
ઉન્મીલન્મૃદુશાદ્વલે તરુતલે સ્વર્લ્લોકકલ્લોલિની-
કૂલે મૂલફલાશનૈઃ શમસુધાસ્વાદાર્થિભિઃ સ્થીયતે ॥ ૨૬॥

યચ્ચાઽસ્મિન્ભવડમ્બરે પરિણમન્મન્દાનિલાન્દોલન-
વ્યાલોલન્નલિનીદલાગ્ચલચલપ્રાલેયલેશોપમે ।
દુષ્કાલવ્યસનાવસન્નજનતાસન્તાપનિર્વાપણ-
વ્યાપારૈકસુકર્મનિર્મલફલારમ્ભૈઃ સુખં જીવ્યતે ॥ ૨૭॥

નિઃશઙ્કં વિકલઙ્કમઙ્કુવિકસલ્લક્ષ્મીકટાક્ષેક્ષિતં
યન્માનુષ્યમુપેત્ય નિત્યમુદિતા નન્દન્તિ દન્તિવ્રજૈઃ ।
યચ્ચાન્તે પુરુહૂતવારવનિતાગીતામૃતાકર્ણન-
પ્રોન્મીલત્પુલકાવકીર્ણવપુષઃ સ્વર્મધ્યમધ્યાસતે ॥ ૨૮॥

સોઽયં સર્વજગત્પ્રભોરશરણત્રાણૈકહેવાકિનઃ
કારુણ્યામૃતસાગરસ્ય ગિરિજાભર્તુઃ પરોઽનુગ્રહઃ ।
કસ્તં ન સ્તુતિભિર્વિમર્શરસિકઃ પ્રૌઢાર્પિતપ્રીતિભિઃ
પ્રાપ્તું શર્મદકર્મનિર્મલફલં નન્દત્યમન્દાદરઃ ॥ ૨૯॥

દૃષ્ટિઃ પીયૂષવૃષ્ટિર્મધુરમધુરસસ્યન્દિની દેવ વાણી
પાણી ત્વત્પાદપીઠીપરિમિલનરજોરાજિમૈત્રીપવિત્રૌ ।
ચેતઃ સ્વચ્છન્દચર્યાપરિણતકરુણારામવિશ્રામધામ
ત્વામક્ષામપ્રસાદામૃતજલધિમહો ભેજુષામેષ પાકઃ ॥ ૩૦॥

તસ્યૈકસ્યાઙ્ઘ્રિપીઠં સ્ફુટમુકુટમણિપ્રૌઢરોચિઃપ્રતાનૈઃ
ક્ષોણીપાલાઃ શિરોભિઃ કરપુટઘટિતૈરઞ્જસા રઞ્જયન્તિ ।
ધત્તે ધન્યઃ સ ચૈકઃ સિતરુચિરુચિરચ્છત્રશુભ્રોત્તરીયાં
લક્ષ્મીમુદ્દામરામાકરકમલચલચ્ચામરોદારહારામ્ ॥ ૩૧॥

તં વાણીભિર્ગૃણન્તિ શ્રવણપુટસુધાસ્યન્દિનીભિર્મુનીન્દ્રા
ગીતૈર્ગાયન્તિ વિદ્યાધરવરવનિતાસ્તસ્ય ચિત્રં ચરિત્રમ્ ।
વિદ્વદ્ગોષ્ઠીષુ તસ્ય પ્રસરતિ કૃતિનો દાનદાક્ષિણ્યવાર્તા
કીર્તિર્જાગર્તિ તસ્ય પ્રવરકવિવચોભઙ્ગિસન્મઙ્ગલેષુ ॥ ૩૨॥

કિં વાઽન્યન્નૈષ પશ્યત્યલમનલશિખાપિઙ્ગજિહ્વાસ્ફુલિઙ્ગ-
સ્ફૂર્જદ્દંષ્ટ્રાકરાલં ભ્રુકુટિકુટિલિતં ભીષણં કાલવક્ત્રમ્ ।
સ્વામિન્મન્દાનિલાન્દોલિતલલિતલતાનૃત્તકાન્તે વનાન્તે
શાન્તેર્ષ્યસ્ત્વામવિદ્યાજડજગદગદઙ્કારમારાધયેદ્યઃ ॥ ૩૩॥

આકર્ણાકૃષ્ટચાપઃ પ્રહરતિ નિભૃતં નિર્નિમિત્તાપકારી
નારીનેત્રાન્તતિર્યગ્વિવલનવિશિખશ્રેણિભિઃ પુષ્પચાપઃ ।
ફૂત્કારસ્ફારફાલઃ સ્ફુરદુરુગરલજ્વાલજિહ્વાજટાલઃ
કાલવ્યાલઃ કરાલઃ કવલયતિ વપુર્હન્તુકામઃ ક્વ યામઃ ॥ ૩૪॥

તસ્માદસ્માકમાકસ્મિકવિકસદસત્કર્મપાકોપતાપ-
વ્યાપત્તાપાતુરાણામવિરલકરુણાસિન્ધુરાપન્નબન્ધુઃ ।
ભક્તિશ્રદ્ધાપ્રબન્ધાનમદમરશિરઃશ્રેણિમાણિક્યમાલા-
જ્વાલાલીઢાઙ્ઘ્રિપીઠઃ શરણમશરણત્રાણશીલસ્ત્વમેકઃ ॥ ૩૫॥

યા નિઃશેષૌષધીનાં જનિરજનિ પુનર્ન ક્વચિત્કમ્પસમ્પ-
ત્સમ્પર્કો યત્ર યત્ર સ્થિતિરુપરિ પરિભ્રંશભાજાં જનાનામ્ ।
એષા શેષાહિપીઠપ્રકટિતવસતિઃ સમ્પદાં ભૂતધાત્રી
પાત્રીકુર્વત્યજસ્રં જનમનઘમઘઃ પ્રક્રમસ્તે નમસ્તે ॥ ૩૬॥

સંસારેઽસ્મિન્નસારે પરમિહ કુશલં કર્મ ધર્મપ્રધાનં
ધર્મઃ શર્મપ્રદોઽપિ પ્રભવતિ સુધિયાં સિદ્ધયે શુદ્ધિહેતોઃ ।
શુદ્ધૌ બદ્ધસ્પૃહાણાં ન ભવતિ કૃતિનાં યદ્વિનાઽઽપદ્વિનાશ-
સ્ત્રૈલોક્યાપ્યાયકં તજ્જલમપિ ભગવન્ વિભ્રમસ્તે નમસ્તે ॥ ૩૭॥

યં મુક્ત્વા જીવયન્તં જગદગદમદઃ સન્તતં સન્તમન્ત-
ર્જન્તૂનાં શીતભીતિપ્રકટિતવિપદામસ્તિ ન સ્વસ્તિહેતુઃ ।
ગીર્વાણાનાં હવિર્ભિર્ગ્લપયતિ વિપદં યજ્વનામપ્યનલ્પૈઃ
સઙ્કલ્પૈઃ કલ્પિતૈર્યઃ સ ભવતિ વિભવઃ પાવકસ્તે નમસ્તે ॥ ૩૮॥

અન્તઃ સન્તિષ્ઠમાનઃ સ્થગયતિ જગતાં પઞ્ચતાં પઞ્ચધા યઃ
સન્ધાય સ્થાયિભાવં પ્રસરતિ સતતં યત્ર તેજસ્વિચક્રમ્ ।
યત્ર સ્થૈર્યં બિભર્તિ ત્રિભુવનભવનં બિભ્રદાધારભૂતાં
ભૂતાનાં મૂર્તિમેષ પ્રથયતિ વિભુતાં મારુતસ્તે નમસ્તે ॥ ૩૯॥

યત્ર બ્રહ્માણ્ડપિણ્ડઃ પ્રસરતિ સરલાલાબુતુમ્બીવિડમ્બી

સ્થૈર્યં ઝાઙ્કારિ વારિ પ્રથયતિ તદપિ સ્કન્ધબન્ધેષુ યસ્ય ।
સોઽપિ સ્ફારેણ ભર્તું પ્રભવતિ પવનો યસ્ય નોદ્દેશલેશં
ધામ્નામાધારભૂતં ભવ ભવતિ વપુસ્તન્નભસ્તે નમસ્તે ॥ ૪૦॥

ધાતુશ્ચાતુર્યભાજો જનજનનવિધૌ યા મુખેભ્યશ્ચતુર્ભ્યઃ
સાકં નાકસ્થિતાનામજનિષત કૃતપ્રીતયઃ સ્ફીતભાસામ્ ।
તાસામાસાં શ્રુતીનાં જનયતિ નિયતં કર્મભિઃ શર્મકૃદ્ભિઃ
સાફલ્યં યઃ સ યજ્વા વપુરધૃતવિપત્સઙ્ગમસ્તે નમસ્તે ॥ ૪૧॥

પ્રેઙ્ખદ્ભિર્યન્મયૂખૈર્વિદધતિ ધવલે નિર્જરાઃ પ્રાણયાત્રાં
પ્રોદ્દામાનન્દધામ પ્રથયતિ બહુલે પારણં યઃ પિતૃણામ્ ।
કુર્વન્નુર્વન્તરિક્ષં પ્રશમિતતિમિરં યઃ સમસ્તૌષધીનાં
પીનાં પુષ્ણાતિ ભાતિં તનુરતનુરસૌ ચન્દ્રમાસ્તે નમસ્તે ॥ ૪૨॥

પ્રાતઃ પ્રાભઞ્જનેઽસ્મિન્પથિ પથિકમિવ ધ્વાન્તકાન્તારતામ્ય-
લ્લોકાલોકાર્પણાર્થં પ્રમુદિતમુદિતં યં સમર્ચન્તિ સન્તઃ ।
સાયં ધ્યાયન્તિ સન્ધ્યાવિધિમધિ સુધિયો બાધિતાધિં સમાધિં
સાધિમ્નાઽધિષ્ઠિતાયં ત્વમિહ સ મિહિરઃ સદ્ગભસ્તે નમસ્તે ॥ ૪૩॥

દિગ્દેશાકારકાલૈરકલિતવિભવં યન્મહદ્બીજભૂતં
ભૂતગ્રામસ્ય યસ્ય ત્રિભુવનવિષયં વસ્તુજાતં વિવર્ત્તઃ ।
યસ્મિન્હેમ્નીવ નાનાભરણપરિકરો લીયતે વિશ્વમન્તે
તદ્ભિન્નેષ્વપ્યભિન્નં ભવ ભવસિ પરં બ્રહ્મ તસ્મૈ નમસ્તે ॥ ૪૪॥

ઇત્થં મત્સૂક્તયસ્તે શશધરશિખર સ્ફારસારસ્વતૌઘ-
પ્રોન્મીલદ્વક્ત્રશુક્તિસ્ખલદમલમિલન્મૌક્તિકવ્યક્તિભાજઃ ।
તીવ્રાપત્તાપતામ્યત્સહૃદયહૃદયક્લાન્તિશાન્તિપ્રગલ્ભા-
દર્ભાગ્રસ્પર્દ્ધિબુદ્ધિગ્રથિતદૃઢગુણાઃ કર્ણપૂરીભવન્તુ ॥ ૪૫॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“કર્ણપૂરસ્તોત્રં” નામકં ત્રયસ્ત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૪. અગ્ર્યવર્ણસ્તોત્રં ચતુસ્ત્રિંશં સ્તોત્રમ્

સર્પત્કન્દર્પદર્પજ્વરભરહરણવ્યગ્રવર્ચઃપ્રપઞ્ચ-

પ્રત્યગ્રબ્રધ્નચન્દ્રજ્વલદનલવલત્પક્ષ્મલત્ર્યક્ષવક્ત્રઃ ।
શર્વસ્તર્ષપ્રકર્ષશ્રમશમનમનસ્તર્પણસ્વર્ણવર્ષ-
સ્વસ્થં તન્વન્સહર્ષં જનમનઘમઘઃ કલ્પયત્વક્ષયં વઃ ॥ ૧॥

યદ્વદ્વન્દ્યં પ્રસન્નં લસદસમરસસ્પન્દસન્દર્ભગર્ભં
મઙ્ગલ્યં નર્મનદ્ધં તવ વચનમદઃ શસ્યમસ્યત્કલઙ્કમ્ ।
તદ્વદ્ભર્ગસ્ય વર્યં શશધરશકલં ધત્વવદ્યં કપર્દ-
ન્યસ્તં વક્ત્રં પ્રશસ્તં પ્રબલતમતમઃખણ્ડનં મણ્ડનં વઃ ॥ ૨॥

ષટ્ચક્રસ્થઃ ષડધ્વપ્રસરસરભસઃ સર્ગબન્ધપ્રગલ્ભઃ
પ્રત્યગ્રપ્રહ્વનવ્યસ્તવપઠનપરબ્રહ્મસચ્ચક્રશક્રઃ ।
દક્ષક્રત્વન્તકત્વં દધદધમમદધ્વંસલક્ષ્યપ્રશંસઃ
સંસર્ગધ્વસ્તપઙ્ગો ગણગણમચલં કલ્પયન્હન્ત્વશં વઃ ॥ ૩॥

વક્ષઃસદ્મસ્થપદ્મં કરકમલતલપ્રજ્વલચ્છઙ્ખચક્રં
કંસઘ્નં સર્પતલ્પં ખગવરવહનં નન્દયત્યર્ધગં યઃ ।
ધર્મં બધ્નન્ધ્વજસ્થં કરગતકલશં વર્ષ્મ યશ્ચ વ્રતસ્થં
શંસન્તં સંસ્મરન્તં નતમનવરતં સોઽવ્યયઃસ્યત્વઘં વઃ ॥ ૪॥

સંરક્ષન્ભક્તવર્ગં યમભટભયતઃ સભ્યમભ્યર્ણલભ્યં
ધન્યમ્મન્યં વદન્યં પ્રણયપરવશં પર્ષદગ્ર્યવ્યવસ્થમ્ ।
વર્ષત્વચ્છિન્નચઞ્ચદ્વરગવલગલઃ કસ્થરઙ્ગત્તરઙ્ગ-
સ્વર્ગઙ્ગઃ શશ્વદઙ્કસ્થલગતનગજસ્ત્ર્યમ્બકઃ સમ્પદં વઃ ॥ ૫॥

અમ્ભઃકમ્પ્રં કટપ્રં સબહલગરલં પન્નગં કણ્ઠલગ્નં
ગ્રથ્નન્મહ્યમ્નભસ્વત્ખરકરદહનસ્વર્ક્ષપત્યમ્બરત્વમ્ ।
સ્કન્ધસ્થં ચર્મ ભર્મપ્રભમલકચયં ચન્દનત્વં પ્રપન્નં
પ્રત્યઙ્ગં ભસ્મ સદ્મચ્છદદલધવલં સ્યત્વજઃ કલ્મષં વઃ ॥ ૬॥

સદ્યઃ સન્યસ્તગર્વગ્રહમહતમહસ્ત્યક્તસઙ્ગપ્રસઙ્ગં
સત્ત્વસ્થં લબ્ધતત્ત્વં મલશબલગલત્સર્વસમ્બન્ધબન્ધમ્ ।
યત્સમ્પર્કપ્રયત્નક્ષમમલયદયં તથ્યપથ્યપ્રસક્તં
યચ્છત્વચ્છં મનસ્તત્સ્મરહરચરણદ્વન્દ્વનમ્રસ્ય શં વઃ ॥ ૭॥

સત્યં નશ્યત્યવશ્યં ઘનમઘપટલં યત્પદસ્પર્શબદ્ધ-
શ્રદ્ધસ્ય સ્પષ્ટકષ્ટપ્રશમનમનસઃ કસ્ય ન વ્યક્તકલ્કમ્ ।
તસ્ય વ્યસ્યત્વશં વઃ સિતકરશરણં મસ્તકં ધ્વસ્તકમ્પં

સમ્પત્સમ્પર્કરમ્યપ્રભમભયકરસ્યર્ષભસ્યન્દનસ્ય ॥ ૮॥

અત્યન્તસ્વચ્છમન્તઃકરણમશરણપ્રત્તરક્ષં સમક્ષં
વ્યઞ્જન્ભઞ્જન્નજસ્રં નયનતવદનસ્તમ્ભસંરમ્ભદમ્ભમ્ ।
સર્વજ્ઞઃ સત્ત્વસઙ્ઘક્લમકરણચણં જન્મકર્મપ્રબન્ધં
મથ્નન્નત્યર્થમર્થં ક્ષતસકલમલં વર્ધયત્વવ્યયં વઃ ॥ ૯॥

ગલ્વર્કપ્રસ્થપસ્ત્યં ધરમથમલયં મન્દરં સહ્યમન્ત-
ર્નન્દદ્ગન્ધર્વયક્ષં સકનકકટકં કલ્પતર્વન્તરઙ્ગમ્ ।
ભદ્રં સઙ્ક્રન્દનસ્ય પ્રહસનસદનં નન્દનં સ્વર્ગરઙ્ગં
ગચ્છન્સ્વચ્છન્દચર્યઃ પરબલદલનસ્તર્પયત્વન્વહં વઃ ॥ ૧૦॥

પદ્મસ્થં પદ્મહસ્તં ગજવરવદનં નન્દનં સ્કન્દસંજ્ઞં
પર્જન્યં હંસમબ્જં દશશતનયનં હવ્યભક્ષં સદણ્ડમ્ ।
રક્ષઃપ્રખ્યં જલસ્થપ્રથમથ પવનં મર્ત્યપત્રં મખઘ્નં
સમ્પશ્યત્યત્યજન્તં ચરણતલમલં યઃ સ કર્ષત્વઘં વઃ ॥ ૧૧॥

અવ્યક્તં યઃ સમગ્રં જગદગનગરં વ્યઞ્જયત્યબ્જજઃ સ-
ન્યઃ સંરક્ષત્યનન્તઃ સ્મરયમદમનઃ સંહરત્યક્રમં યઃ ।
સ ત્ર્યક્ષસ્તન્ત્રમન્ત્રપ્રણયનસફલગ્રન્થકર્મણ્યખર્વ-
જ્ઞાત્વઃ સદ્રમ્યવર્ત્મપ્રકટનપરમઃ સ્પર્શયત્વદ્વયં વઃ ॥ ૧૨॥

દ્રષ્ટવ્યં સમ્યગર્થપ્રવચનપરમં શર્મદં પદ્યબદ્ધં
પ્રષ્ઠપ્રજ્ઞપ્રશસ્યં નમદમરવરઃ શઙ્કરઃ સઙ્કરઘ્નઃ ।
વર્ષન્તં ભગ્નઘર્મં પ્રમદમયપયઃ સત્યસઙ્કલ્પજલ્પ-
શ્રવ્યં ભવ્યં વસવ્યં નવમવગમયત્વગ્ર્યવર્ણસ્તવં વઃ ॥ ૧૩॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
"અગ્ર્યવર્ણસ્તોત્રં" નામકં ચતુસ્ત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૫. ઈશ્વરપ્રશંસાસ્તોત્રં પઞ્ચત્રિંશં સ્તોત્રમ્

અનાથાનાં નાથો ગતિરગતિકાનાં વ્યસનિનાં
વિનેતા ભીતાનાં શરણમધૃતીનાં ભરવશઃ ।
સુહૃદ્બન્ધુઃ સ્વામી શરણમુપકારી વરગુરુઃ

પિતા માતા ભ્રાતા ત્રિજગતિ જયત્યન્તકરિપુઃ ॥ ૧॥

ઉદારૈર્મન્દારૈરચિતશિખરં ચન્દ્રશિખરં
સમભ્યર્ચ્ય પ્રેમ્ણા વિપુલપુલકાલઙ્કૃતતનુઃ ।
કદા ગન્ધાબન્ધપ્રમદમુદિતોદ્દામમધુપ-
સ્ફુરદ્ગુઞ્જાગર્ભૈર્વિભુમભિભજેયં નુતિપદૈઃ ॥ ૨॥

ઇતો દ્વન્દ્વક્લેશા વિષયમૃગતૃષ્ણાસ્થિતિરિતો
જરામૃત્યુવ્યાધિપ્રતિભયમિતઃ સર્વસુલભમ્ ।
મહામોહૈર્ઘોરૈરુપહતમિતો બોધલસિતં
કથં કુર્યાદાર્યઃ કૃતમતિરપિ સ્વાત્મનિ હિતમ્ ॥ ૩॥

અશેષક્લેશૌઘગ્લપનપરિપન્થી પ્રકટય-
ન્નયં વિઘ્નવ્રાતઃ પ્રબલવિપદાપાદનવિધિમ્ ।
વિવેકાખ્યં ચક્ષુસ્તિરયતિ સતાં યેન સહસા
ભવશ્વભ્રે પાતઃ પ્રતિપદમદભ્રઃ પ્રભવતિ ॥ ૪॥

ભવદ્ભક્તિં તસ્ય વ્યુપશમસમર્થામથ દૃશઃ
પ્રસાદં તન્વાનાં ઘનમહસમાસાદ્ય સુધિયઃ ।
પ્રકાશાત્માનં ત્વામતિવિમલયા હંસમુદિતં
દૃશા સાક્ષાત્કૃત્ય પ્રતિજહતિ મોહાન્ધતમસમ્ ॥ ૫॥

અનિત્યે નિત્યાશામશુચિનિ શુચિત્વવ્યસનિતા-
મનાત્મન્યાત્માસ્થામથ મહતિ દુઃખે સુખમતિમ્ ।
ચતુર્ધા દુર્ભેદ્યામવિરતમવિદ્યાં પરિણતાં
હતાશેષસ્વાભામભિદધતિ મૂલં ભવતરોઃ ॥ ૬॥

નરાસ્તત્ત્વાલોકે નિયતમનયા દૂષિતદૃશો
વિવેકપ્રધ્વંસાદ્વિદધતિ ભવે કન્દુકગતિમ્ ।
ઉપાસાભિર્લબ્ધ્વા ભવભયભિદં નિર્મલધિયઃ
સમાધિં સાધિમ્ના દધતિ ન પુનર્જન્મવિપદમ્ ॥ ૭॥

ચકાશે નાકાશે રવિરવિરલૈરંશુપટલૈ-
રમન્દાભૈરિન્દુસ્તિમિરમહરન્નાપિ કિરણૈઃ ।
ન ચાન્યન્નક્ષત્રગ્રહદહનરત્નૌષધિતડિ-
ત્પ્રદીપાદિજ્યોતિઃ ક્વચિદપિ પુરા નાથ દદૃશે ॥ ૮॥

તમોભૂતં વિશ્વં કિમપિ ગહનં ધામ તદભૂ-
દથ સ્વેચ્છાશક્તિપ્રકટિતમહાવૈભવભરમ્ ।
વિભજ્યાત્માનં ક્ષ્માવનપવનવહ્નીન્દુતપન-
સ્વખૈરંશૈરીશ ત્રિજગદસૃજત્કસ્ત્વદપરઃ ॥ ૯॥

અનાદૌ સંસારે વિદધતિ રજોબાધિતધિયઃ
શુભં વા ઘોરં વા શબલમથ વા કૃત્યમણવઃ ।
તતસ્તદ્ભોગાર્થં તરુણકરુણાપૂર્ણહૃદયો
વિધત્સે યત્તેષાં તનુભુવનનિર્માણમખિલમ્ ॥ ૧૦॥

તદેતત્સઙ્કલ્પપ્રકટિતસમસ્તત્રિજગતઃ
પ્રભોર્લીલામાત્રં ભુવનમહનીયસ્ય ભવતઃ ।
તવૈકસ્ય સ્વામિન્યદિહ સહજે સર્વવિષયે
ક્રિયાજ્ઞાને નિત્યે કરણનિરપેક્ષે પ્રભવતઃ ॥ ૧૧॥

પ્રસિદ્ધોઽયં પન્થા ન ભવતિ વિચિત્રા વિરચના
વિના યત્કર્તારં સ ચ ન ભવતિ જ્ઞાનરહિતઃ ।
અતોઽવશ્યં કર્તા ત્રિજગતિ વિચિત્રે જ્ઞ ઉચિતઃ
સ ચ ત્વં ત્વય્યન્યે કિમિવ વિવદન્તે હતધિયઃ ॥ ૧૨॥

અથૈવં ચેદ્બ્રૂયુઃ કિમયમપરપ્રેરિતમતિઃ
સ્વતન્ત્રો વા દેવસ્ત્રિભુવનવિધાને પ્રયતતે ।
અમુષ્યાદ્યે પક્ષે નહિ પરવિધેયસ્ય વિભુતા
પરસ્મિન્પક્ષે વા ફલમપિ કિમુદ્દિશ્ય યતતે ॥ ૧૩॥

અથાસ્યેયં વાઞ્છા પ્રભવતિ ન કર્મક્ષયમૃતે
નૃણાં મુક્તિઃ સોઽપિ ક્વચન ન વિના ભોગમુચિતઃ ।
વિનાધારં ભોગો ન ભવતિ વપુર્નાપિ ભુવનં
તતોઽર્હં જન્તૂનાં તનુભુવનનિષ્પાદનમિતિ ॥ ૧૪॥

ઇદં યુક્તં સાન્દ્રામૃતમધુરયાઽન્તઃ કરુણયા
પ્રયુક્તસ્યાઽજસ્રં પરહિતવિધાનવ્યસનિનઃ ।
દયાલુશ્ચેલ્લોકં સૃજતિ સકલં કિં ન સુખિનં
કુતો વાઽઽધિવ્યાધિક્ષત ઇહ જનોઽનેન જનિતઃ ॥ ૧૫॥

અથોપાદાનં યદ્ભવતિ પરમાણ્વાદિ જગત-
સ્તથા કર્માઽનેહઃપ્રભૃતિ સહકાર્યેતદુભયમ્ ।

વિના સૃષ્ટૌ નૈષ પ્રભવતિ યદીશઃ કિમમુના
તદેવાઽસ્તુ વ્યક્તં તનુભુવનનિર્માણનિપુણમ્ ॥ ૧૬॥

ઇતીત્થં મુગ્ધાનામિહ મતિવિમોહાય કુધિયઃ
કુતર્કપ્રાગલ્ભીમુખરિતમુખા મૂઢમનસઃ ।
અધિષ્ઠાતારં ત્વાં વરદ જડવર્ગસ્ય સદયં
ન જાનન્તિ સ્વામિન્ પરમપુરુષં ચેતનમમી ॥ ૧૭॥

યથોપાદાનં મૃત્તદનુ સહકારીહ લગુડો
જલં ચક્રં સૂત્રં વરદ જડવર્ગોઽયમખિલઃ ।
ન યત્નં કૌલાલં પ્રભવતિ વિના કુમ્ભઘટને
તથાધિષ્ઠાતારં ન ભવતિ વિના ત્વાં ભવવિધિઃ ॥ ૧૮॥

અવિજ્ઞાયૈવાઽજ્ઞઃ પરુષવિષમં કર્મ કુરુતે
વિપાકે તસ્યાસૌ નિપતતિ ભવક્લેશકલિલે ।
અતો જ્ઞાનાલોકઃ પ્રકટિતસમસ્તાર્થગહનો
મહામોહધ્વાન્તવ્યવહિતદૃશોઽવશ્યમુચિતઃ ॥ ૧૯॥

ઉપાયસ્તત્પ્રાપ્તૌ ભવતિ ન વિના શાસ્ત્રમપરો
ન શાસ્ત્રં તત્વામિન્નિહ યદુપદિષ્ટં ન ભવતા ।
વિવિઞ્ચન્તઃ સન્તો હિતમહિતમેતે વિદધતે
હિતે સક્તિં મુઞ્ચન્ત્યહિતમિતિ નાર્હન્તિ પતનમ્ ॥ ૨૦॥

ભવાન્ધર્મં સાક્ષાદકૃત સહજજ્ઞાનમહસા
તમોધ્વંસં પુંસામથ તદુપદેશેન વિદધે ।
પ્રમાણં ચોક્તિસ્તે નહિ ઘનઘૃણાનિઘ્નમનસો
જગદ્ભર્ત્તુર્યુક્તં વિતથમભિધાતું ભગવતઃ ॥ ૨૧॥

તદેતત્કારુણ્યં ઘનતમતમઃપઙ્કપટલી-
વિલીનોઽયં લોકસ્તવ વરદ સમ્ભાવ્ય સહજમ્ ।
દધચ્છ્રદ્ધાબન્ધં ત્વદુદિતમનુષ્ઠાતુમસકૃત્
પ્રવૃત્તો દુષ્પારં હર તરતિ સંસારજલધિમ્ ॥ ૨૨॥

ઇત્યેવં ભગવન્નબન્ધ્યમહિમા નિર્માય નિર્માનુષં
વિશ્વં વિશ્વસિતં વિતત્ય તદનુ સ્ફીતૈર્વિભૂતિક્રમૈઃ ।
સંહૃત્યાથ નિજે મહિમ્નિ નિખિલં તત્કન્દુકાન્દોલન-
ક્લેશાવેશવિરામસમ્ભૃતસુખં કૈવલ્યમાકાઙ્ક્ષસિ ॥ ૨૩॥

ઇત્થં કિં બહુના ત્વદઙ્ઘ્રિકમલદ્વન્દ્વપ્રસાદાદિદં
ભૂયાન્મે ભવભીતિભઞ્જન વિભો ભક્તાનુકમ્પાપર ।
યત્ત્વત્પાદસરોજપૂજનવિધૌ ભક્તિર્વિરોગં વપુ-
ર્યાવજ્જીવમથ ત્વદેકમનસો મુક્તિસ્તવૈવાગ્રતઃ ॥ ૨૪॥

એવં દેવ તવ સ્તુતિપ્રવચનપ્રાપ્તપ્રસાદસ્ય મે
ભૂયો જન્મ ભવિષ્યતીતિ ભગવન્ મન્યે ખપુષ્પોપમમ્ ।
સ્યાચ્ચેત્પ્રાક્તનકર્મશેષજનિતં તન્નાથ કિં ભૂયસા
ભૂયાસં ભવદીયપાદકમલસ્તુત્યા પુનર્નિર્વૃતઃ ॥ ૨૫॥

ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“ઈશ્વરપ્રશંસાસ્તોત્રં” નામકં પઞ્ચત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૬. સ્તુતિફલપ્રાપ્તિસ્તોત્રં ષટ્ત્રિંશં સ્તોત્રમ્

તે નાથ જન્મ સકલં ન કલઙ્કયન્તિ
ન દ્રોહકર્મરસિકાનપિ શઙ્કયન્તિ ।
તાન્સસ્પૃહં મૃગદૃશઃ પ્રવિલોકયન્તિ
યે ત્વત્પદાબ્જરજસાઽલિકમઙ્કયન્તિ ॥ ૧॥

તે વિદ્વિષામભિમતં હૃદિ મોઘયન્તિ
જ્ઞાનામૃતં ચ કૃપણેષુ સમર્પયન્તિ ।
તેષાં વચઃ ક્ષિતિભુજોઽપિ ન લઙ્ઘયન્તિ
યે ત્વાં સ્તવોક્તિકુસુમર્દ્ધિભિરર્ચયન્તિ ॥ ૨॥

તે જન્મનઃ ફલમનલ્પમુદઞ્ચયન્તિ
ક્લેશાપદઃ સ્વમપરં ચ વિમોચયન્તિ ।
તાન્વૈરિણઃ સહભુવોઽપિ ન વઞ્ચયન્તિ
યે ત્વામનાથજનબાન્ધવમર્ચયન્તિ ॥ ૩॥

તે ધર્મમિન્દુકરસુન્દરમર્જયન્તિ
ગીર્ભિર્વિદગ્ધહૃદયાન્યપિ રઞ્જયન્તિ ।
તાનન્તકભ્રુકુટયોઽપિ ન તર્જયન્તિ
યે ત્વાં ભવામયહરં હર પૂજયન્તિ ॥ ૪॥

તે ત્વત્સ્તુતિં હૃદયધામ્નિ કવાટયન્તિ
દુઃખદ્રુમં ચ દૃઢમાપદિ પાટયન્તિ ।
ભાવં તવૈવ ભુવિ બાલમિવાટયન્તિ
યે વાઙ્નટીમભિમુખં તવ નાટયન્તિ ॥ ૫॥

તે કર્મરજ્જુનિગડં હ્યતિખણ્ડયન્તિ
સૂક્તૈઃ શ્રુતીર્બુધજનસ્ય ચ મણ્ડયન્તિ ।
ત્વદ્ભક્તિમપ્યધિભવાબ્ધિ તરણ્ડયન્તિ
યે ત્વન્મનઃ સ્તુતિધનસ્ય કરણ્ડયન્તિ ॥ ૬॥

પાપાનિ તેઽશ્મશકલાનિ વ ચૂર્ણયન્તિ
ગીર્ભિર્ભ્રુવઃ સુમનસામપિ ઘૂર્ણયન્તિ ।
લોકે નિજાનિ ચ યશાંસ્યુપકર્ણયન્તિ
યે ધીમતાં નુતિકથાસ્તવ વર્ણયન્તિ ॥ ૭॥

તે મારકાનપિ ન સંયતિ ઘાતયન્તિ
કારુણ્યતઃ કૃતરુષોપિ ન યાતયન્તિ ।
લોકસ્ય શોકમભયેન ચ શાતયન્તિ
યે શેખરં ચરણયોસ્તવ પાતયન્તિ ॥ ૮॥

તે પાપપાશ(કર્મબન્ધ)મધિકં હૃદિ કર્તયન્તિ
ભોગસ્પૃહાં ચ વિષયેષુ નિવર્તયન્તિ ।
સૂક્તૈઃ સચેતનમનાંસ્યપિ નર્તયન્તિ
યે ચન્દ્રચૂડચરિતં તવ કીર્તયન્તિ ॥ ૯॥

તે જાન્મિકાનિ દુરિતાન્યવસાદયન્તિ
સૂક્તાનિ નિર્મલમતીનનુવાદયન્તિ ।
ગીતાનિ વૈણિકનટાનપિ નાદયન્તિ
યે ભક્તિતસ્તવ નુતીઃ પ્રતિપાદયન્તિ ॥ ૧૦॥

તે સત્સુ કર્મસુ રિપૂનપિ ચોદયન્તિ
ગીર્ભિઃ સતાં ચ હૃદયાનિ વિનોદયન્તિ ।
તેષાં શુચઃ ક્વચન ચેતસિ નોદયન્તિ
યે તાવકાનિ ચરિતાન્યનુમોદયન્તિ ॥ ૧૧॥

તે વિગ્રહોગ્રમનસોપિ ન ખેદયન્તિ

મોહં દૃઢાર્ગલનિભં હૃદિ ભેદયન્તિ ।
સ્વં કૌશલં મૃદુમતીનપિ વેદયન્તિ
સૂક્તાનિ યે તવ નિજાનિ નિવેદયન્તિ ॥ ૧૨॥

તે ભેજુષાં ભવતિ ભક્તિમમન્દયન્તિ
વાગ્વીરુધસ્ત્વયિ રતિં હૃદિ કન્દયન્તિ ।
ત્વામન્યદર્શનગતાનપિ વન્દયન્તિ
યે વાગ્ભરેણ હૃદયં તવ નન્દયન્તિ ॥ ૧૩॥

તે ભુક્તિમુક્તિસફલર્દ્ધિ વિવર્દ્ધયન્તિ
સત્કર્મ શર્મ શમિતાધિ ચ સાધયન્તિ ।
યે ત્વાં નવૈરભિનવૈરભિરાધયન્તિ
યાનિક્ષુસારમધુરાન્ સુધિયો ધયન્તિ ॥ ૧૪॥

તે સઙ્ગરે ગુરુરુષોઽપિ ન યોધયન્તિ
જ્ઞાનામૃતેન હૃદયં ચ વિશોધયન્તિ ।
રોષોદ્ભવં હૃદિ રિપોરપિ રોધયન્તિ
યે ત્વાં નિજા નુતિકથાઃ પ્રતિબોધયન્તિ ॥ ૧૫॥

તે દુર્મદાન્બુધસદસ્યવમાનયન્તિ
પ્રૌઢાન્પ્રણમ્ય વિનયેન ચ માનયન્તિ ।
તાન્ભૂતયઃ સ્વયમનન્યસમાનયન્તિ
યે વાસરાંસ્તવ નવૈઃ સશમા નયન્તિ ॥ ૧૬॥

તે નિર્ભયે નતિમતઃ પથિ યાપયન્તિ
નોત્કમ્પદાનપિ રિપૂનુપતાપયન્તિ ।
ક્લેશાપદં પશુસમાનપિ હાપયન્તિ
યે ત્વાં પ્રસાદ્ય દૃશમીશ્વર દાપયન્તિ ॥ ૧૭॥

તે દુર્મદં શમનમુગ્રમદર્પયન્તિ
ગર્ધં ચ સાધુસદનાદપસર્પયન્તિ ।
દાનાદિનાર્થિનિવહાનપિ તર્પયન્તિ
યે તાવકે મુકુટમઙ્ઘ્રિતલેઽર્પયન્તિ ॥ ૧૮॥

તે સદ્ગૃહેષુ ગુરુમાપદમલ્પયન્તિ
સ્વં ચાશયં શિશયિષોસ્તવ તલ્પયન્તિ ।
આર્તિસ્પૃશામુપકૃતીરપિ કલ્પયન્તિ

યે બાલકાનપિ નવં તવ જલ્પયન્તિ ॥ ૧૯॥

તે સાપરાધમનસોઽપિ ન કોપયન્તિ
તાપં હ્રિયા વિપુલમાપદિ ગોપયન્તિ ।
ત્વદ્ધામ ચામલમતીનધિરોપયન્તિ
યે નાર્ચનં તવ કદાચન લોપયન્તિ ॥ ૨૦॥

તે શક્તિમપ્રતિહતાં ભુવિ જૃમ્ભયન્તિ
પ્રીતિં પરાં કૃતમતીનુપલમ્ભયન્તિ ।
વંશત્રયીમપિ નિજામભિશોભયન્તિ
યે ત્વાં નિજાસુ નુતિસૂક્તિષુ લોભયન્તિ ॥ ૨૧॥

તે મગ્નમાર્ત્તજનમાપદિ તારયન્તિ
બુદ્ધ્યા વિમૃશ્ય સદસચ્ચ વિચારયન્તિ ।
અજ્ઞાનમાનતિમતાં ચ નિવારયન્તિ
ત્વદ્ભક્તિમિન્દુધર યે હૃદિ ધારયન્તિ ॥ ૨૨॥

તે વિદ્વિષઃ સ્થિરરુષોઽપ્યનુકૂલયન્તિ
મોહં મહીરુહમિવ પ્રવિમૂલયન્તિ ।
આજ્ઞાં ચ મૂર્ધ્નિ મહતામવચૂલયન્તિ
યે ભાલમઙ્ઘ્રિરજસા તવ ધૂલયન્તિ ॥ ૨૩॥

તે પઙ્ગુમઙ્ગગતમાત્મનિ ધાવયન્તિ
દિઙ્મણ્ડલં ચ પરિતઃ પરિપાવયન્તિ ।
ક્લેશાન્ ક્ષણાત્તૃણગણાનિવ લાવયન્તિ
યે ત્વાં પ્રકાશવપુષં હૃદિ ભાવયન્તિ ॥ ૨૪॥

તે પીવરીં વિપદમોકસિ કર્શયન્તિ
સ્વં કૌશલં સુમનસશ્ચ વિમર્શયન્તિ ।
પ્રીતિં સતાં ચ હૃદયેષુ નિવેશયન્તિ
યે ત્વત્સ્તુતીર્વિબુધસદ્મસુ દર્શયન્તિ ॥ ૨૫॥

તે નિર્મલં સુકૃતમાત્મનિ પોષયન્તિ
દુષ્કર્મકર્દમમલં હૃદિ શોષયન્તિ ।
ક્રૂરાન્ વિરોધબિધુરાનપિ તોષયન્તિ
યે નામ તે શિવશિવેત્યભિઘોષયન્તિ ॥ ૨૬॥

તે વિશ્વમેવ ચરિતૈરભિભૂષયન્તિ
ક્રુદ્ધાન્ વિરુદ્ધહૃદયાઁશ્ચ ન દૂષયન્તિ ।
નાત્યુદ્ભટાન્યમભટાનપિ રોષયન્તિ
રાગેણ યે શિવ મનસ્તવ તોષયન્તિ ॥ ૨૭॥

તે ત્વાં કૃપામ્બુતૃષિતે હૃદિ વર્ષયન્તિ
સ્વાન્તૌકસોઽઘભુજગાનપિ કર્ષયન્તિ ।
કમ્પં વિધાય ચ યમં ભ્રુવિ ધર્ષયન્તિ
યે ત્વાં નિજૈ(નવૈ)ર્નુતિપદૈર્હર હર્ષયન્તિ ॥ ૨૮॥

તે મૌનમુદ્રિ તગિરોઽપ્યુપહાસયન્તિ
ગીર્ભિર્મુખાનિ સુધિયામધિવાસયન્તિ ।
વિશ્વં યશોભિરમલૈરભિભાસયન્તિ
યે માનસં તવ નવૈઃ પ્રવિકાસયન્તિ ॥ ૨૯॥

તે ચિત્તભિત્તિમસતામપિ ચિત્રયન્તિ
રોષોદ્ધતાનરિજનાનપિ મિત્રયન્તિ ।
સૂક્તામૃતૈશ્ચ ભુવમેવ પવિત્રયન્તિ
વાઙ્નાવિ યે તવ ચરિત્રમરિત્રયન્તિ ॥ ૩૦॥

ચેતાંસિ તે સુકૃતિનામુપબૃંહયન્તિ
બાહ્યાન્તરાનસુહૃદશ્ચ નિબર્હયન્તિ ।
નાત્માનમાનતમરીનપિ ગર્હયન્તિ
યે ત્વાં નવસ્તવવિભૂતિભિરર્હયન્તિ ॥ ૩૧॥

આત્માનં તે કલુષકલિલે મગ્નમુચ્ચાલયન્તિ
જ્ઞાનામ્ભોભિર્મલમલિકુલશ્યામલં ક્ષાલયન્તિ ।
સ્મૃત્વા ચ ત્વાં પ્રમદરભસાદંસમાસ્ફાલયન્તિ
ત્વદ્ભક્ત્યા યે સકલમલસં ચિત્તમુત્તાલયન્તિ ॥ ૩૨॥

તે રામાણાં મનસિ મદનં સુપ્તમુન્નિદ્રયન્તિ
શ્લાઘાં લબ્ધું સદસિ ચ સતાં ચિત્તમુન્મુદ્રયન્તિ ।
તાનુદ્વૃત્તાઃ કુટિલમતયો ન ક્વચિચ્છિદ્રયન્તિ
ત્વચ્ચિત્તં યે વરદ કરુણાક્રન્દિતૈરાર્દ્રયન્તિ ॥ ૩૩॥

તે સભ્યાનાં સદસિ નયનાન્યશ્રુ વિસ્રાવયન્તિ
ક્રોધોત્કર્ષં ગુરુમુરુરુષાં દૂરમુત્પ્રાવયન્તિ ।

ચેતઃ સૂક્તૈર્મણિમિવ સતામૈન્દવં દ્રાવયન્તિ
સ્વામિન્યે ત્વામભિનવનવવ્યાહૃતીઃ શ્રાવયન્તિ ॥ ૩૪॥

તેષાં સૂક્તીરમલમતયઃ પૂગવચ્ચર્વયન્તિ
ક્રૂરાણાં તે મદમભિમુખં પ્રેઙ્ખિતં ખર્વયન્તિ ।
તાન્વિદ્વાંસસ્તવ નવસુધાસ્વાદનાયાહ્વયન્તિ
ત્વત્પાદાગ્રે મુદિતમનસો યે શિરઃ પ્રહ્વયન્તિ ॥ ૩૫॥

તે દુર્વૃત્તાનપિ ન કૃપયા પેશલાઃ ક્લેશયન્તિ
ગ્લાનિં જ્ઞાનાં વ્યસનજનિતામાશયે નાશયન્તિ ।
તૃષ્ણાર્ત્તાનપ્યમૃતમધુરાઃ સ્વા ગિરઃ પ્રાશયન્તિ
ત્વામન્તર્યે શકલિતકલિક્લેશમાવેશયન્તિ ॥ ૩૬॥

તે રાગાદીન્મનસિ મિલિતાનાશુ વિશ્લેષયન્તિ
ક્રોધાન્ધાનપ્યતનુવિનયા ન ક્વચિદ્દ્વેષયન્તિ ।
મોહધ્વાન્તં ઘનમધિમતિવ્યોમ નિઃશેષયન્તિ
ત્વત્પાર્શ્વે યે ગિરમભિમતપ્રાપ્તયે પ્રેષયન્તિ ॥ ૩૭॥

તે નિર્વેદં મનસિ શમિનામહ્નુ તં હ્રાસયન્તિ
ત્રસ્તાનસ્તઙ્ગમિતવિપદઃ શશ્વદાશ્વાસયન્તિ ।
ત્વદ્ભાવૈકપ્રવણભણિતૈરન્તકં ત્રાસયન્તિ
સ્તુત્યા યે ત્વાં નતજનહૃતત્રાસમુલ્લાસયન્તિ ॥ ૩૮॥

તે તજ્જ્ઞાનાં પરિષદિ ગુણાનાત્મનઃ શંસયન્તિ
સ્વાન્તે ચાન્તર્યમભુજગજં સાધ્વસં ધ્વંસયન્તિ ।
ક્લેશાન્પાશાનિવ ચ નિબિડાનાશુ વિસ્રંસયન્તિ
પ્રૌઢાનાં યે તવ નુતિમધિશ્રોત્રમુત્તંસયન્તિ ॥ ૩૯॥

તે ત્વદ્ભક્તિવ્યસનમનઘં કર્મ નિર્વાહયન્તિ
ત્વત્સેવાસુ સ્થિરમવિરતં ચિત્તમુત્સાહયન્તિ ।
સ્વં ચાઘૌઘં યમમદનવત્ત્વદ્દૃશા દાહયન્તિ
ત્વાં વિજ્ઞપ્તિં સ્વયમવહિતં યેઽન્વહં ગ્રાહયન્તિ ॥ ૪૦॥

તે તક્ષાણં તરુમિવ ગુરું ત્વામઘં તક્ષયન્તિ
પ્રાપ્તું તૃપ્તિં શુભફલભરં નિર્ભરં ભક્ષયન્તિ ।
પ્રત્યાસન્નાં શ્રિયમપિ ધિયા તીક્ષ્ણયા લક્ષયન્તિ
ત્વદ્ભક્તાન્યે શ્રુતિમિવ નુતિં તાવકીં શિક્ષયન્તિ ॥ ૪૧॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“સ્તુતિફલપ્રાપ્તિસ્તોત્રં” નામકં ષટ્ત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૭. સ્તુતિપ્રશંસાસ્તોત્રં સપ્તત્રિંશં સ્તોત્રમ્

ઇહ હિ સ્વાત્મમહેશ્વરપરિભાવનશુદ્ધસંવિદઃ સુધિયઃ ।
કમલદલાનિ જલૈરિવ બહિરાવરણૈર્ન લિપ્યન્તે ॥ ૧॥

કવિમુખકમલોપવને કૃતવસતિર્જયતિ સૂક્તિકલ્પલતા ।
યા ફલતિ ભુક્તિમુક્તી શિવભક્તિસુધારસાસેકૈઃ ॥ ૨॥

જય જય હર રક્ષ ભયાદેવં દેવં શિવં શિવં લબ્ધુમ્ ।
યઃ સ્તૌતિ તસ્ય સફલઃ સારઃ સારસ્વતઃ સ્વતઃ સ્ફારઃ ॥ ૩॥

શિવ શિવ શઙ્કર શઙ્કર ભવગતિરિતિ યઃ પ્રલાપમુખરમુખઃ ।
તસ્ય હિ સફલા દિવસાઃ શિવસાયુજ્યં ચ હસ્તગતમ્ ॥ ૪॥

ઇહ ખલુ પશુપતિનુતિભિઃ કતિપયમપિ યઃ કૃતાર્થયતિ કાલમ્ ।
સકલકલિકલુષમુક્તો જીવન્મુક્તઃ સ કિં બહુના ॥ ૫॥

ઉપચિતકુશલશ્રેણિઃ પરમપદારોહણૈકનિશ્રેણિઃ ।
જયતિ મહામૃતવેણિર્વિબુધજનાહ્લાદિની નુતિઃ શમ્ભોઃ ॥ ૬॥

કિમિયં સદ્ગુરુદૃષ્ટિર્હ્લાદૈકમયી નુ કિં જગત્સૃષ્ટિઃ ।
કિં વા નિરભ્રવૃષ્ટિઃ શ્રવણામૃતવર્ષિણી નુતિઃ શમ્ભોઃ ॥ ૭॥

અક્ષયસુખોપભુક્તિઃ પરમશિવાવાપ્તયે નવા યુક્તિઃ ।
યદિ વા જીવન્મુક્તિઃ શ્રવણામૃતવર્ષિણી નુતિઃ શમ્ભોઃ ॥ ૮॥

ક્ષેત્રં તદિહ પવિત્રં તત્તીર્થં પાવનં તદાયતનમ્ ।
તદિહ તપોવનમનઘં યત્ર નુતિઃ શામ્ભવી શ્રુતિં વિશતિ ॥ ૯॥

સા ક્રીડા સા ગોષ્ઠી સા વિશ્રાન્તિઃ સ ભૂમિકાલાભઃ ।
સાઽખિલદુઃખનિવૃત્તિર્યત્ર નુતિઃ શામ્ભવી શ્રુતિં વિશતિ ॥ ૧૦॥

તદ્ધ્યાનં સ સમાધિઃ સ મહાયાગસ્તદર્ચનં સકલમ્ ।
સા ખલુ પરમા દીક્ષા યત્ર નુતિઃ શામ્ભવી શ્રુતિં વિશતિ ॥ ૧૧॥

યદિ પારિજાતકુસુમસ્તવકસ્તવ કર્ણયોરલઙ્કરણમ્ ।
ભવિતું ભવતિ ન સુલભઃ શ્રુતિપથમેતા નય સ્તુતીઃ શમ્ભોઃ ॥ ૧૨॥

અભિલષસિ યદિ નિરોદ્ધું પવનાદપિ દુર્ગ્રહં મનોહરિણમ્ ।
તદિમા ગૃહાણ નિભૃતં દૃઢગુણગુણગુમ્ફિતાઃ સ્તુતીઃ શમ્ભોઃ ॥ ૧૩॥

યદમૃતમમ્બુધિમન્થનસમુત્થિતં તસ્ય કઃ સ્વિદાસ્વાદઃ ।
ઇતિ યદિ હૃદિ તવ કૌતુકમાકર્ણય તત્સ્તુતીરિમાઃ શમ્ભોઃ ॥ ૧૪॥

વિષયોપભોગરહિતઃ સહજો હ્લાદઃ સતાં મતો મોક્ષઃ ।
તમપિ યદીચ્છસિ વેદિતુમવહિતહૃદયઃ શ◌ૃણુ સ્તુતીઃ શમ્ભોઃ ॥ ૧૫॥

અશુચિ શુચામાયતનં મલકલિલમિદં કલેવરં સત્યમ્ ।
ભગવદુપાસનસાધનમિતિ ભવતિ ન કસ્ય કમનીયમ્ ॥ ૧૬॥

યદિ મનુષે યમનિયમપ્રાણાયામાદિ દુર્ઘટં કર્ત્તુમ્ ।
તદિમં સુગમમુપાયં શ્રય પરમપદાપ્તયે નુતિં શમ્ભોઃ ॥ ૧૭॥

સિદ્ધં સમ્યગભીષ્ટં સત્યગિરામાશિષઃ સતાં ફલિતાઃ ।
લબ્ધં સુકૃતસ્ય ફલં નિર્વ્યૂઢેયં યતઃ સ્તુતિઃ શમ્ભોઃ ॥ ૧૮॥

મમ સારઃ સંસારઃ સકલમિદં મર્ત્યજન્મ મમ સફલમ્ ।
મમ સદૃશોઽસ્તિ ન કશ્ચન યદહં સ્તોતા શિવસ્ય સંવૃત્તઃ ॥ ૧૯॥

પ્રણમામિ પ્રણમામિ સ્તૌમિ સ્તૌમિ પ્રભું જગન્નાથમ્ ।
ધ્યાયામિ ધ્યાયામિ ચ યામિ ચ વિમલં પરં ધામ ॥ ૨૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“સ્તુતિપ્રશંસા” નામકં સપ્તત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૮. પુણ્યપરિણામસ્તોત્રં અષ્ટાત્રિંશં સ્તોત્રમ્

સહસ્રશીર્ષા પુરુષઃ પુનાતુ વઃ
સહસ્રચક્ષુર્ભગવાન્ સહસ્રપાત્ ।
ગલેઽઙ્ઘ્રિમૂલે નયને ચ નિશ્ચલા-
સ્ત્રયોઽપ્યમી યં પુરુષા ઉપાસતે ॥ ૧॥

(ઉપાસતે યં પુરુષાસ્ત્રયોઽપ્યમી) ॥ ૧॥

સરસ્વતીવેન્દુકલોદ્ગતા કરૈઃ
સરસ્વતીવ શ્રવણામૃતૈઃ સ્વરૈઃ ।
સરસ્વતીવોર્મિભિરીશ્વરસ્તવૈઃ
સરસ્વતી વર્ષતુ વઃ સુધામિયમ્ ॥ ૨॥

વિમર્શશૂન્યેન મયા નિરર્થકઃ
ખલેન કાલઃ સકલોઽતિવાહિતઃ ।
ઇદં ત્વસારાદતિસારમુદ્ધૃતં
ધૃતં યદીશસ્તુતિવેતનં મનઃ ॥ ૩॥

ન હૃદ્યતામેતિ પરસ્ય દુર્મુખઃ
શિશુઃ સ્રવત્પીનસદિગ્ધનાસિકઃ ।
પિતુઃ સ્વકીયસ્ય તુ જીવિતાધિક-
સ્તથોપહાસ્યોઽપિ મમાઽયમુદ્યમઃ ॥ ૪॥

અવૈમિ ભાગ્યોપચયઃ સ પુષ્કલઃ
સશક્તિપાતઃ ખલુ પારમેશ્વરઃ ।
સ વા મહાર્હો મહતામનુગ્રહો
યદીશ્વરારાધનસાધનં મનઃ ॥ ૫॥

અહો કૃતાર્થોઽસ્મિ મનોભિરામયા
ગિરા ગુણાલઙ્કૃતયેહ રામયા ।
તનુઃ સ્થિરેયં ધ્રિયતે નિરામયા
ભવે ચ યદ્ભક્તિરભઙ્ગુરા મયા ॥ ૬॥

ન વિદ્યયા પ્રીતિરનર્ઘમાનયા
તથા શ્રિયા વાઽન્વહમેધમાનયા ।
શિવસ્તવૈકવ્રતયાઽસમાનયા (મમાનયા)
યથા ગિરા સાન્દ્રસુધાસમાનયા ॥ ૭॥

પુરઃ સ્ફુરન્તં વિમૃશન્મહેશ્વરં
વિલીનવેદ્યાન્તરવેદનો દશામ્ ।
નવસ્તવોલ્લેખવિધૌ સ્પૃશામિ યાં
મમાન્તરાત્મા વિભુરેવ વેત્તિ તામ્ ॥ ૮॥

મનુષ્યતા પૂરુષતાઽગ્ર્યવર્ણતા
મનીષિતા સત્કવિતા શિવૈકતા ।

ઇયં મમ ક્ષેમપરમ્પરા વિભોઃ
સ્તુતિપ્રસઙ્ગેન ગતા કૃતાર્થતામ્ ॥ ૯॥

ધ્રુવં નવાનાં રસગર્ભનિર્ભર-
ધ્વનિર્ઘનાનામનઘેયમાવલિઃ ।
પૃથુપ્રભાવં શશિખણ્ડમણ્ડિતં
પ્રહર્ષિણં નીલગલં કરિષ્યતિ ॥ ૧૦॥

યદિ હ્યયોગ્યાશ્ચરણાન્તિકે વયં
તથાપિ નઃ પ્રાઙ્ગણસીમસેવિનામ્ ।
ચમત્કરિષ્યન્તિ ગિરઃ પ્રભોરિમા
જનઙ્ગમાનામિવ ગીતરીતયઃ ॥ ૧૧॥

પરોપકારૈરિવ રાજસેવનં
દરિદ્રગાર્હસ્થ્યમિવાર્થિતર્પણૈઃ ।
ઇદં બહુક્લેશમપીશ્વરસ્તવૈ-
રવૈમિ વર્ષ્મ સ્પૃહણીયમાત્મનઃ ॥ ૧૨॥

(વપુર્બહુક્લેશમપીદમીશ્વરસ્તવૈ-
રવૈમિ સ્પૃહણીયમાત્મનઃ)॥ ૧૨॥

સહસ્રપત્રૈરિવ પલ્વલોદકં
શિરઃ ફણીન્દ્રસ્ય મણિવ્રજૈરિવ ।
સદોષમપ્યેતદવૈમિ માનુષં
મનોરમં જન્મ મહેશ્વરસ્તવૈઃ ॥ ૧૩॥

મૃગેન્દ્રશાવા ઇવ કન્દરોદરા-
ત્કરીન્દ્રકુમ્ભાદિવ મૌક્તિકોત્કરાઃ ।
વિનિઃસરન્તઃ કવિતુર્મુખાદમી
મનોજ્ઞતાં બિભ્રતિ કસ્ય ન સ્તવાઃ ॥ ૧૪॥

મરાલમાલા સરસીવ નિર્મલે
કુચસ્થલે હારલતેવ સુભ્રુવામ્ ।
ઇયં ભવત્વાભરણં મહેશ્વર-
સ્તવાવલી વક્ત્રસરોરુહે સતામ્ ॥ ૧૫॥

ઇમાં ઘનશ્રેણિમિવોન્મુખઃ શિખી

ચકોરકઃ કાર્તિકચન્દ્રિકામિવ ।
રથાઙ્ગનામા તરણેરિવ ત્વિષં
સ્તવાવલીં વીક્ષ્ય ન કઃ પ્રમોદતે ॥ ૧૬॥

મધુવ્રતઃ સૌમનસીમિવ સ્રજં
સિતચ્છદઃ પઙ્કજકર્ણિકામિવ ।
પિકો વિકોષામિવ ચૂતમઞ્જરી-
મિમાં ન કશ્ચર્વયતિ સ્તવાવલીમ્ ॥ ૧૭॥

મનસ્વિનીનામિવ સાચિ વીક્ષિતં
સ્તનન્ધયાનામિવ મુગ્ધજલ્પિતમ્ ।
અવશ્યમાસાં મધુ સૂક્તિવીરુધાં
મનીષિણાં માનસમાર્દ્રયિષ્યતિ ॥ ૧૮॥

ઇયં મધુશ્રીરિવ કેલિકાનનં
સરોવરં પ્રાવૃડિવાતપક્ષતમ્ ।
સ્તવાવલી કાવ્યકુતૂહલં સતા-
મકાલજીર્ણં તરુણીકરિષ્યતિ ॥ ૧૯॥

વિમત્સરાણાં સદસદ્વિવેકિનાં
મહાત્મનાં મૂર્ધ્નિ ધૃતોઽયમઞ્જલિઃ ।
વિલોકયન્તુ પ્રભુગૌરવાદિમાં
પ્રસાદબુદ્ધ્યા મયિ વા સ્તવાવલીમ્ ॥ ૨૦॥

સ્તવાવલીઢૌકનકાર્પણચ્છલા-
દલભ્યમભ્યર્ણચરૈઃ સુરૈરપિ ।
પ્રભોઃ પદસ્પર્શમશઙ્કમીપ્સતો
વિકત્થનત્વેપિ ન મે વિડમ્બના ॥ ૨૧॥

કલિમલમષીકલ્માષોઽયં મનોમુકુરઃ પુરઃ
સ્ફુરિતમપિ ન વ્યક્તં વસ્તુ ગ્રહીતુમભવત્ક્ષમઃ ।
સપદિ વિશદૈઃ શબ્દબ્રહ્મોર્મિભિર્વિમલીકૃતે
કરબદરવત્પશ્યામોઽસ્મિન્ સમસ્તમિદં જગત્ ॥ ૨૨॥

આનન્દિનિ સ્તુવતિ નન્દિનિ ગૂઢમર્થં
દેવશ્ચમત્કૃતિકૃતાઙ્ગુલિભઙ્ગભઙ્ગિઃ ।
અઙ્ગસ્થિતાં ભગવતીમધિરૂઢહાસા-

માસામવશ્યમવબોધયતિ સ્તુતીનામ્ ॥ ૨૩॥

મન્યે મનોવચનકર્મભિરદ્ભુતાનિ
યાન્યૂર્જિતાનિ સુકૃતાનિ પુરાકૃતાનિ ।
એતાનિ તાનિ શિવભક્તિપવિત્રિતાનિ
કર્ણામૃતાનિ ફલિતાનિ સુભાષિતાનિ ॥ ૨૪॥

એતે પ્રભોઃ પ્રમથભર્ત્તુરભીષ્ટમષ્ટા-
ત્રિંશત્સ્તવા વિમૃશતાં વિદુષાં દિશન્તુ ।
તેનૈવ દૃક્ષુ ધૃતધર્મકરામૃતાંશુ-
સપ્તાર્ચિષામિવ કલાઃ સકલાર્થલાભમ્ ॥ ૨૫॥

અયમિહ કિઙ્કરેણ રચિતશ્ચરણામ્બુજયોઃ
"સ્તુતિકુસુમાઞ્જલિ"ર્ભગવતસ્તરુણેન્દુભૃતઃ ।
અવિરલભક્તિસિક્તનવસૂક્તિલતાઽવચિતઃ
કલયતુ સૌરભેણ સુકૃતાં સ્પૃહયાલુ મનઃ ॥ ૨૬॥

અયિ પ્રમથનાયક ત્રિજગતામધિષ્ઠાયક
પ્રસન્નમુખ ષણ્મુખ ત્રિદશવન્દ્ય નન્દીશ્વર ।
નિવેદયત ભક્તિતશ્ચરણકિઙ્કરેણાઽર્પિતં
પુરઃ પુરરિપોરિમં વિકચવાક્યપુષ્પાઞ્જલિમ્ ॥ ૨૭॥

ઇતિ પરિષદિ સિંહસ્યન્દનસ્કન્દનન્દિ-
પ્રભૃતિભિરભિરાદ્ધૈર્વન્દ્યમાવેદ્યમાનમ્ ।
સ્તુતિકુસુમસમૂહં પ્રાભૃતીકૃત્ય શમ્ભો-
ર્યદમલમુપલબ્ધં શર્મ તેનેદમસ્તુ ॥ ૨૮॥

ભુવિ ભુવિ કુવિકલ્પઃ સ્વલ્પતામેતુ જેતું
ધુરિ ધુરિ દુરિતૌઘં વર્દ્ધતાં શુદ્ધબોધઃ ।
પથિ પથિ મથિતોગ્રવ્યાપદાપન્નતાપા
નરિ નરિ પરિપૂર્ણા જૃમ્ભતાં શમ્ભુભક્તિઃ ॥ ૨૯॥

ઇતિ શુભં ભગવચ્ચરિતસ્તુતિ-
વ્યતિકરેણ યદર્જિતમૂર્જિતમ્ ।
ભવતુ તેન મનસ્યનપાયિની
સુકૃતિનાં શિવભક્તિચમત્કૃતિઃ ॥ ૩૦॥

ઇતિ કાશ્મીરકમહાકવિશ્રીમજ્જગદ્ધરભટ્ટવિરચિતે
ભગવતો મહેશ્વરસ્ય સ્તુતિકુસુમાઞ્જલૌ
“પુણ્યપરિણામસ્તોત્રં” નામષ્ટાત્રિંશં સ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩૯. ગ્રન્થકર્તુર્વંશવર્ણનમ્

પુરા પુરારેઃ પદધૂલિધૂસરઃ
સરસ્વતીસ્વૈરવિહારભૂરભૂત્ ।
વિશાલવંશશ્રુતવૃત્તવિશ્રુતો
વિપશ્ચિતાં “ગૌરધરઃ” કિલાઽગ્રણીઃ ॥ ૧॥

ભ્રમાદનિર્માય પુરાતનઃ કવિ-
ર્યમગ્રિમશ્લોકમવશ્યમગ્રતઃ ।
વિમૃશ્ય પઙ્ક્તેરુપરિ દ્વિજન્મનાં
ન્યવીવિશત્કાકપદાઙ્કિતં પુનઃ ॥ ૨॥

અનન્તસિદ્ધાન્તપથાન્તગામિનઃ
સમસ્તશાસ્ત્રાર્ણવપારદૃશ્વનઃ ।
ઋજુર્યજુર્વેદપદાર્થવર્ણના
વ્યનક્તિ યસ્યાઽદ્ભુતવિશ્રુતં શ્રુતમ્ ॥ ૩॥

સુતોઽભવદ્રત્નધરઃ શિરોમણિ-
ર્મનીષિણામસ્ય ગુણૌઘસાગરઃ ।
યમાશ્રિતાહ્વાસ્ત સરસ્વતી હરે-
રુરઃસ્થલં “રત્નધરં” શ્રિતાં શ્રિયમ્ ॥ ૪॥

ઉદારસત્ત્વં વિપુલં સુનિર્મલં
પ્રરૂઢમર્યાદમગાધમાશયમ્ ।
પ્રવિશ્ય યસ્ય સ્વવશા સરસ્વતી
પદં બબન્ધ સ્થિરમમ્બુધેરિવ ॥ ૫॥

કપોલદોલાયિતકર્ણભૂષણં
તરઙ્ગિતભ્રૂયુગભઙ્ગુરાલિકમ્ ।
સચેતસામર્ધનિમીલિતેક્ષણં
ક્ષણં વિતન્વન્તિ મુખં યદુક્તયઃ ॥ ૬॥

અથાऽસ્ય ધીમાનુદપાદિ વાદિનાં
વિતીર્ણમુદ્રો વદનેષ્વનેકશઃ ।
ઉદારસંસ્કારસુસારભારતી-
પવિત્રવક્ત્રામ્બુરુહો "જગદ્ધરઃ" ॥ ૭॥

અપિ સ્થવીયઃસ્વકૃતસ્થિરસ્થિતિઃ
કુશાગ્રતીક્ષ્ણામધિરુહ્ય યન્મતિમ્ ।
અહો બત સ્વૈરવિહારલીલયા
પદં ન્યધાદસ્ખલિતં સરસ્વતી ॥ ૮॥

નિર્મત્સરઃ સહૃદયઃ શ્રુતપારદૃશ્વા
વિશ્વાતિશાયિવિનયઃ પ્રિયવાક્ સુશીલઃ ।
કિં વાऽપરં કવિગિરાં સદસદ્વિચાર-
ચાતુર્યધુર્યધિષણઃ શરણં ય એકઃ ॥ ૯॥

તેનાદૃતેન શિશુનૈવ નિવેદ્યમાન-
માનન્દકન્દલિતભક્તિકુતૂહલેન ।
એતં મૃગાઙ્કકલિકાકલિતાવતંસ-
શંસારસાયનરસં રસયન્તુ સન્તઃ ॥ ૧૦॥

ગૃહ્ણન્તુ કઞ્ચન વિશેષમશેષમસ્મા-
દસ્માકમાત્તવચનાઃ(નાત્)ક્વચનાऽન્તરઙ્ગાઃ ।
ચિન્વન્તિ પલ્વલજલાત્કુશલા વિશાલ-
શેવાલજાલકલિલાત્કમલૌઘમેવ ॥ ૧૧॥

યદ્યપ્યાસામનલસરસસ્ફારસારં ન કિઞ્ચિ-
દ્વાચામન્તર્વિરચિતચમત્કારમસ્ત્યર્થતત્ત્વમ્ ।
તત્રાऽપ્યેતાસ્ત્રિભુવનગુરુસ્તોત્રમૈત્રીપવિત્રાઃ
કર્ણાભ્યર્ણાભરણસરણિં નેતુમર્હન્તિ સન્તઃ ॥ ૧૨॥

પ્રેમાણં મણિકર્ણિકાં પ્રતિ બુધા મન્દીકુરુધ્વં મતિં
મુક્તાદામનિ માકૃત સ્પૃશત મા તામ્બૂલહેવાકિતામ્ ।
ભૂષાર્થં પ્રભવન્તિ કર્ણપુલિને કણ્ઠે મુખામ્ભોરુહે
દેવસ્ય સ્મરશાસનસ્ય યદિમાઃ સ્તોત્રાવલીસૂક્તયઃ ॥ ૧૩॥

નિક્ષિપ્તં શતસપ્તકેન સહિતં પાદાયુતાર્ધં મયા
નિર્હિંસે ગુણિનિ દ્વિજેન્દ્રમુકુટે ધર્મૈકધામ્નીશ્વરે ।

પ્રાયેણ ક્લિશિતસ્ય દીનવચસઃ ક્ષ્માક્ષિપ્તમૂર્ધ્નોઽપિ મે
પાદં નૈકમયં પ્રયચ્છતિ વિધૌ વક્રે કરોમ્યત્ર કિમ્ ॥ ૧૪॥

કારઙ્કારમકારિ વારિતશમૈરક્ષૈરરક્ષૈરિદં
નિઘ્નં વિઘ્નિતશમ્ભુસેવનસુખાભોગોપભોગં મનઃ ।
કિન્તુ ક્વાપિ કદાપિ કાઽપિ પતિતા સા સાધુદૃષ્ટિર્યતઃ
પ્રાપ્તઃ સૂક્તિવપુર્જિતોર્જિતસુધાસ્વાદઃ પ્રસાદઃ પ્રભોઃ ॥ ૧૫॥

યત્સત્યં સદસદ્વિવેકવિકલગ્રામીણકગ્રામણી-
મિથ્યાસ્તોત્રપરા પરાભવભુવં નીતાસિ ભીતાસ્યતઃ ।
માતઃ કાતરતાં વિમુઞ્ચ યદસૌ સૌભાગ્યભાગ્યાવધિઃ
સઞ્જાતો જગદેકનાથનુતિભિર્વાગ્દેવિ તે વિભ્રમઃ ॥ ૧૬॥

ઇતિ શ્રીમજ્જગદ્ધરભટ્ટકવિવંશાવલીવિવરણં સમ્પૂર્ણમ્ ।

॥ ઇતિ કાશ્મીરકમહાકવિ શ્રીમજ્જગદ્ધરભટ્ટવિરચિતઃ સ્તુતિકુસુમાઞ્જલિઃ સમ્પૂર્ણા ॥

Notes

Stutikusumāñjaliḥ સ્તુતિકુસુમાઙ્જલિઃ is a composition by Kāśmīra Mahākavi કાશ્મીર મહાકવિ Jagaddhara Bhaṭṭa જગદ્ધરભટ્ટ who belongs to the lineage of Ratnadhara રત્નધર (father)and Gauradhara ગૌરધર (grandfather).

Proofread by Ruma Dewan

*Stutikusumanjalih*
pdf was typeset on June 25, 2024

Please send corrections to *sanskrit@cheerful.com*